UNIVERSAL LIBRARY
OU_184333
UNIVERSAL LIBRARY

OSMANIA UNIVERSITY LIBRARY

Call No S 294.1 S34 S

Accession No. S 1372

Author सत्याषाढ

Title श्रौतसूत्रम् Vol II 1907

This book should be returned on or before the date last marked below.

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५३

महादेवकृतवैजयन्तीव्याख्यासमेतम्

आद्यप्रश्नषट्कात्मकं

सत्याषाढविरचितं श्रौतसूत्रम् ।

तत्र चतुर्थपञ्चमषष्ठप्रश्नात्मको द्वितीयो भागः ।

एतत्पुस्तकं

वे. शा. सं. रा. " काशीनाथशास्त्री आगाशे "

इत्येतैः संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८२९

ख्रिस्ताब्दाः १९०७

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

मूल्यमाणकदशकाधिको रूपकः (१।१०)

ॐ तत्सद्ब्रह्मणे नमः ।

सत्याषाढविरचितं श्रौतसूत्रं

महादेवकृतवैजयन्तीव्याख्यासमेतम् ।

अथ चतुर्थप्रश्नप्रारम्भः ।

तत्र प्रथमः पटलः ।

हविर्यज्ञेषु नियतोपक्रमास्तु निरूपिताः ॥
दर्शाद्या इष्टिपर्यन्ताश्चत्वारोऽथ निरूप्यते ।
नित्याभ्यासः पशुः पूर्वमनित्याभ्यासकर्मतः ।
चातुर्मास्येभ्य एवैव सौत्रामण्याश्च पूर्वतः ॥
प्रश्ने चतुर्थ ऐन्द्राग्नो निरूढो विकृतैः सह ।

सर्वेभ्यः कामेभ्यः पशुबन्धोऽपि विधीयमानो दर्शितो बौधायनेनार्थवादफत्र[1] आपस्तम्बेनात्र पक्षेषु प्रथमप्रश्ने प्रथम पटल एवाधिकारिनिर्णयो दर्शपूर्णमासवदेव वृत्तोऽतो न व्याख्यायते । अभ्यासचोदनायां यावज्जीवचोदनासमानाधिकारोऽपि तृतीयप्रश्न आद्यपटल एव वृत्तस्तस्मात्प्रयोगमेव व्याचष्टे—

ऐन्द्राग्नेन पशुना षाण्मास्ये षाण्मास्ये यजत आवृत्तिमुख आवृत्तिमुखे संवत्सरे संवत्सरे वा ।

इन्द्राग्नी देवते यस्य स तथा । पशुशब्देन च्छागोऽभिधीयते । छागस्य वपाया इति लिङ्गात् । अनादेशे छाग इति बौधायनः । उत्पत्तिविधिरयं कालविधिश्च । फलतो जीवनं वा न विकल्पादूर्ध्वं कर्म पशुद्रव्यको यागः पशुशब्देनोच्यते । पशुबन्धाख्यं कर्मोच्यते पशुर्बध्यते यस्मिन्निति । षण्मासा एव षाण्मास्यं समुदाये षट्सु षट्सु मासेषु व्यतीतेषु यत्र पर्वणि प्रथमः पशुबन्धस्तस्मात् । अत्रोदगयनमेव विशेषानभिधानादनादेश उदगयनमिति वचनात् । वीप्सया कालावधेरभावाद्यावज्जीवमिति गम्यते । आवृत्तिः सूर्यस्यायने इत्ययनयोर्मुखे संक्रान्त्यनन्तरपर्वणि केचिन्मुख इति संक्रान्त्यनन्तरदिन इत्याहुः । अत्राप्युदगयन एवाऽऽरम्भः । संवत्सरपक्षेऽपि तथैव ।

---

१ क. ख. च. छ. ट. 'दकफ' ।

सौर्यः प्राजापत्यो वा ।

पशुरेषु कालेषु कर्तव्य इति शेषः । सूर्यदेवताकः प्रजापतिदेवताको वा पूर्वेण विकल्प एतयोः शाखान्तरीययोरुपक्रमनियमः कात्यायनेनोक्तः । सोऽस्माकमपीष्टः ।

त्रिविधं पशुबन्धम्—

तं व्याख्यास्यामः ।

पश्वङ्गानि ज्योतिष्टोमाङ्गैः संकीर्णानीति तान्युत्कृष्य संभूय निरूढ एव व्याख्यायन्त इत्यर्थः । यद्यपि सौमिकाग्नीषोमीयादिपशुष्वाध्वर्यवसामान्यमिह निरूढेऽतिदेशत एव प्राप्तं तथाऽपि हौत्रस्याङ्गानि त्वेत्यादेरस्मच्छाखायां निरूढ ऐन्द्राग्न एवोपदेशात्सोऽपि प्रकृतिरिति सर्वाण्यतिदिष्टान्यप्याध्वर्यवाण्यत्रैव व्याख्यायन्ते । तानि पशुत्रये समानानि यूपवेद्यादीनि चौपदेशिकानि यानि वैशेषिकाणि तान्यूह्यानि । सौर्यप्राजापत्ययोरूह्यानीन्द्राग्निभ्यां त्वा जुष्टमुपाकरोमीत्यादीनि । एवं त्रयस्य व्याख्यानम् । अत्रोदवसानस्याविधानाद्गृहेष्वेव पशुबन्धः । गृहेष्विति कात्यायनः । दर्शपूर्णमासप्रकृतित्वाच्च गृहेष्वेवान्यत्र पाशुकं विहार कल्पयित्वा कृतस्य वाऽग्रे सति संभवे ।

सूर्यं ते चक्षुरिति षड्ढोतारं मनसाऽनुद्रुत्य सग्रहꣳ हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपति ।

शरीरैरित्यन्तः षड्ढोतृनामको मन्त्रस्तं मनसा पठित्वा वाचस्पत इति ग्रहनामको मन्त्रः । ग्रहो भवतीति श्रुतेः । तमुपांशु पठित्वाऽन्ते होमस्तूष्णीकेनाऽऽज्येन सग्रहमिति ग्रहस्तत्सहकारी षड्ढोता होममन्त्रः । त्वाप्रत्ययेन पौर्वापर्यमुक्तं नाङ्गतेष्टिं प्रति । पशुबन्धेन यक्ष्यमाणः षड्ढोतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहुयादिति यक्ष्यमाण इति यागारम्भात्पूर्वतोक्ता । तस्मादन्यं प्रणीयान्वारम्भणीयामिष्टिं निर्वपति । इदमेव प्रणयनं प्रधानार्थं यः प्रधानार्थं प्रणीतस्तत्रैव तदङ्गानि प्रधानस्याग्निः सोऽङ्गानामित्युक्तत्वादग्नत्वङ्गार्थं प्रणीते प्रधानमिष्टिस्तु प्रधानार्थं प्रणीत एव कार्या । अन्वारम्भणीयाशब्देन वा प्रधानार्थस्याग्नेरन्वारम्भोऽनयेति तथा तेन धारयत्याहवनीयमिति वक्ष्यमाणमुपपद्यते । इदमेव चान्वारम्भणीयानामधेयप्रयोजनं ननु दर्शपूर्णमासान्वारम्भणीयातिदेशतः प्राप्ता तस्या बाधेनेयं विधीयतेऽतोऽन्वारम्भणीयाकार्यकारणत्वादन्वारम्भणीया । सा चाऽऽरम्भनिमित्तेति चेत् । न । तथात्वे धारयत्याहवनीयमिति न युक्तं स्यात्तस्मादग्निसंस्कारार्थेयम् । अत एवाऽऽपस्तम्बोऽग्न्यन्वाधानस्येयं प्रत्याम्नाय इति । तस्य मतेऽन्वाधानमग्निसंस्कारार्थमिति तस्य निवृत्तिरस्मन्मते देवतापरिग्रहार्थं वेष्टितो देवतापरिग्रहस्याभावात्क्रियते वाऽन्वाधानमपि । तथाऽन्वारम्भणीया यदीयमारम्भाङ्गं स्यात्तदाऽऽरभमाण इति वदेद्द्वितीयप्रयोगादौ तदा न प्राप्नुयादिष्यते च । ननु आरम्भनि-

१ ग. ठ. ण ॰ष्टः । तं त्रि॰ । २ ग. ठ. ण. ॰ते चान्वा॰ ।

मित्तातिदेशेनान्वारम्भणीयाऽपि प्राप्ता सा तर्हि केन निवार्यतामिति चेत्, न। अतो हि दर्शपूर्णमासयोर्नचान्वारम्भणीया दर्शपूर्णमासावपि त्वारम्भनिमित्ता नचाऽऽरम्भो दर्शपूर्णमासौ। अथवा प्रथमप्रयोगाङ्गं न च विकृत्यां प्रथमप्रयोगस्यातिदेशोऽपेक्षितोऽपि तु प्रथमाद्वितीयसाधारणस्य प्रयोगस्य। न च प्रथमत्वेन साम्यात्प्रथमप्रयोगो विकृतेर्भवेत्सान्वारम्भण इति वाच्यम्। तदा यासां विकृतीनां नियतः सांतत्येन प्रयोगस्तासां पश्वाग्रयणचातुर्मास्यानामेव स्यान्नतु सर्वविकृतीनां, न हि सर्वविकृतीनां नैमित्तिककाम्याङ्गभूतानां सातत्यप्रयोगोऽस्ति। न चासति तस्मिन्प्रथमप्रयोगता संभवति। यदाऽनेकेषामेकदैव संकल्पस्तदा प्रथमद्वितीयादिविभागः। ननु सकृत्प्रयोगेऽपि फलस्य निमित्तस्य चोद्देशेन संकल्पेऽप्यारम्भशब्ददर्शनान्न च प्रथमारम्भ एवेति चेत्। सत्यम्। तथा सूत्रकृतः पुनर्नेष्टा न्यायेनापि न संगता। तथा हि—अस्ति च लिङ्गं न सर्वविकृतिष्वन्वारम्भणीयेति यदयं सोमेऽङ्गभूतेषु पशुषु नान्वारम्भणीयेति वदत्येवं नाङ्गभूता स्विष्टिष्वित्यपि ब्रूयादतिदिष्टाया उभयत्रापि प्राप्तत्वात्। या तु निषिध्यते सा निरूढे दृष्टा। निरूढपशुबन्धेन कल्पो व्याख्यात इत्यग्नीषोमीये पशौ वक्ष्यति। तेन निरूढवत्प्राप्तिमाशङ्क्य निषेधति नाङ्गभूतेष्विति अङ्गेऽग्नीषोमीयादौ। तत्र चातुर्मास्येषु तान्यालभमान इति प्रकृत्य पञ्चहोतारं मनसाऽनुद्रुत्य सग्रहं हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपतीत्युक्तम्। तत्राऽऽरम्भनिमित्तत्वान्मुख्यैवान्वारम्भणीया न तु दार्शपौर्णमासिकान्वारम्भणीयातिदेशप्राप्त्यर्थोऽन्वारम्भणीयाशब्दो मुख्ये संभवत्यमुख्यस्वीकारस्यान्याय्यत्वात्। तथा च सौत्रामणीवद्विधाऽपि मुख्यैव यदि चेत्तस्याः स्थाने देवतान्तरं विधित्सितं तदा फाल्गुन्यां चैत्र्यां वा वैश्वदेवेन यजते तत्रान्वारम्भणीयां वैश्वानरं द्वादशकपालं पार्जन्यं चरुं निर्वपेदिति लाघवेन ब्रूयान्नतु तान्यालभमानस्येति प्रकृतित एव प्राप्तत्वान्नोपदेशः स्यात्। तस्मादप्राप्ताऽन्वारम्भणीया तस्या निमित्तं कालं च पृथङ्निर्दिश्येष्टिमपूर्वामेव विधत्त इति पशौ नोक्तमेवं तेन तस्या अन्यत्कार्यं पश्विष्टेरन्यदिति ज्ञापयति। तत्रातिदेशेनान्या नेष्टा चातुर्मास्येष्विवात्रापि तथाऽऽग्रयणेष्टावपीति सूत्रतात्पर्यम्। अत्रोपपत्तिः-दर्शपूर्णमासौ हि पशुचातुर्मास्याग्रयणेष्टीनां पूर्वं तत्र कृताऽन्वारम्भणीया पुरुषसंस्कारः। स किं कर्तुर्यजमानस्य भोक्तुर्वा विनाऽपि संस्कारं कर्तृत्वसिद्धेर्भोक्तुरिति वाच्यम्। तेन सा सकलप्रधानार्थैवेति सिध्यति। प्रधानं च यावज्जीवमनुष्ठीयमानम्। तथा दर्शपूर्णमासौ चिकीर्षन्प्रथमप्रयोगेऽन्वारमणीयां कुर्यात्सा च प्रयोगाद्बहिरेव। तत्र कृता यावज्जीवमुत्पद्यमाने फलापूर्वे स्वामिनं संस्करोति नतु प्रथमप्रयोगफलापूर्वमात्रे। नहि पूर्णमासमात्रेण फलापूर्वमुत्पद्यतेऽपि तु दर्शपूर्णमासाभ्याम्। न च पूर्णमासे कृता प्रथमं दर्शस्याङ्गं भवति। तस्मात्प्रयोगाद्बहिरेव पूर्णमासस्य प्रथमस्य संनिधावनुष्ठीयमाना। यथा दर्शाङ्गमेवं यावज्जीवं कृतकर्माङ्गं तन्त्रेणानुष्ठीयमाना भवति। नच काल-

व्यवधानं तत्र विघटकं वचनाद्यथा दर्श एवमुत्तरेषामपीति संतोष्टव्यम् । तथा च तन्त्रेण दर्शपूर्णमासयोरेवं प्रसङ्गेनेतरेषां यावज्जीवं ह्यन्वारम्भणीयापूर्वं न समाप्यते तत्संस्कृते स्वामिनि पश्चादिविकृतीनामपि फलापूर्वमुत्पद्यतां वचनाच्च चातुर्मास्यफलापूर्वेणापूर्वान्तरापेक्षायामन्वारम्भणीयान्तरेऽपि न काचिदनुपपत्तिर्वचनं किं न कुर्यात् । युक्त्यन्तराणि दर्शपूर्णमासान्वारम्भणीयानिरूपण एव दर्शितानि । किंच प्रथमप्रयोगेऽपि न प्रयोगान्तःपातिन्यन्वारम्भणीया । कथम् । अन्वारम्भणीया वैमृधश्च विकृती तत्र दर्शपूर्णमासौ सर्वाङ्गोपसंहृतौ पश्चाद्विकृतिभ्योऽतिदेशेनाङ्गं प्रयच्छतो नासमाप्तौ । यद्यन्वारम्भणीयावैमृधौ गृह्णीतस्तदा प्रयोगः साङ्गः स्यात्तथाऽन्वारम्भणीयावैमृधावुपकाराकाङ्क्षौ दर्शपूर्णमासातिदिष्टाङ्गैः साङ्गौ सन्तौ तदङ्गतां प्राप्नुतोऽत्र साङ्गोपकारस्य च दर्शपूर्णमासयोरप्राप्यसिद्धेरुपकारद्वारा विकृतावङ्गग्रहणमसमञ्जसम् । अन्वारम्भणीयाशब्दोऽत्र व्युत्पन्नोऽन्वारभ्यते पशुबन्धार्थोऽग्निरनयेति । इष्टिं निर्वपति करोतीत्यर्थः ।

कथं तत्राऽऽह—

आग्नावैष्णवमेकादशकपालम् ।

निर्वपतीत्यनुकृष्यते । आग्नावैष्णवमन्वारम्भणीदेवतामेकादशकपालपुरोडाशद्रव्यामिष्टिं कुर्यादित्यर्थः ।

सिद्ध[१] संतिष्ठते ।

दर्शपूर्णमासाभ्यां सिद्धं यथा भवति तथाऽग्नीषोमीयविकारत्वेनेत्यर्थः । संतिष्ठते समाप्नोति । न दक्षिणा प्रधानदक्षिणयैवर्त्विजां परिक्रयसिद्धेर्विशेषविधानाभावाच्च । यज्ञशं चेत्यपि नेति ज्ञेयम् ।

अपि वा चतुर्गृहीतमाज्यमाग्नावैष्णव्यर्चाऽऽहवनीये जुहोति ।

इष्टिस्थाने तूष्णीं संस्कृतेनाऽऽज्येन चतुर्गृहीतेन जुहोति । आहवनीय इति दर्विहोमत्वेन प्राप्तेऽपि वचनं प्रधानार्थमुद्धृत एव यथा स्यान्नत्वस्य त्यागेनान्यस्योद्धरणम् । प्रधानार्थाग्निसंस्कारार्थे होम इष्ट्या समानकार्यत्वात्तस्याः संस्कार्यत्वमुक्तं तप्ते प्रातर्दोह इतिवत् । इष्टिहोमयोरपि संस्कारकत्वं कर्मत्वं च दीक्षणीयेष्टिवत् ।

शेषमाज्यस्य करोति धारयत्याहवनीयम् ।

इष्टिहोमयोरन्यतरस्याऽऽज्यशेषं करोति यूपाहुत्यर्थम् । इष्ट्यां होमे चाऽऽहवनीयस्य प्रधानार्थमुद्धृतस्यैवाङ्गता शेषं करोतीति वचनाच्छेषनाशे पुनर्होमेनोत्पाद्यं न किंतु प्रतिनिधिना कार्यं नतु होमलोपे सति शेष इति ।

---

१ ख. ग. ठ. ण. °टकेव° ।

उरु विष्णो विक्रमस्वेति स्रुवे- णाऽऽहवनीये यूपाहुतिं जुहोति ।

अत्राऽऽहवनीयग्रहणं यूपसमीपेऽरणीमथिते मा भूदिति कात्यायनीये मथितेऽपि तथाऽग्नीषोमीये विधानात्। दर्विहोमत्वेन जुहूप्राप्तिनिवारणार्थं स्रुवेण जुहोतीतिश्रुतिप्राप्त- मुक्तम्। युपाहूतिसंज्ञकामाहुतिम् । सोमे दीक्षायूपच्छेदेऽपूर्वेणाऽऽज्येन होमः । अन्वा- रम्भणीयाहोमयोरभावाच्छेषाभावात् ।

आज्यशेषं स्रुवं चाऽऽदत्ते तक्ष्णे परशुं प्रयच्छति तद्गच्छन्ति यत्र यूपं छेत्स्यन्तो भवन्ति ।

तदरण्यं गच्छन्ति ब्रह्मयजमानाध्वर्यवः । यत्र यूप्या वृक्षाः कृतास्तान्परि- कर्मिणस्तक्षा(क्ष)वच्छेत्स्यन्तो भवन्ति । स्पष्टमन्यत् । परशुं प्रयच्छतीति नाऽऽद्यो बर्हिरर्थे स्वीकृतो दर्शपूर्णमासयोः ।

पालाशः खादिरो बैल्वो रौहीतकश्च यूप्या वृक्षाः ।

यूप्या यूपार्हा यूप्याः ।

पालाशं ब्रह्मवर्चसकामस्याऽन्नाद्यकामस्य वा खादिरꣳस्व- र्गकामस्य बैल्वं ब्रह्मवर्चसकामस्य रौहीतकं प्रजाकामस्य ।

यूपं कुर्यादिति शेषः । एते सत्यां कामनायां तथा संकल्प्य कुर्यादन्यथा नित्या एवोभयार्थाश्चैते । रोहितको वटसदृशः किंचित्सूक्ष्मपर्णः ।

त्र्यवराध्यान्यूप्यान्वृक्षानतिक्रम्य ।

यूपयोग्यान्वृक्षानतिक्रम्य । त्र्यवराध्यान्, त्रयोऽवरोऽध्यो भागो(?)येषां ते वृक्षा- स्तथा ततोऽप्यधिकानप्यतिक्रम्य त्यक्त्वा ।

य ऋजुरूर्ध्व ऊर्ध्वशकल ऊर्ध्वशाखः समे भूम्यै स्वाद्योने रूढः ।

तं वृश्चेदिति वक्ष्यमाणेन संबन्धः । अवक्रोऽतिर्यग्वृद्धो न वेष्टितशकल ऊर्ध्वा- प्रशाख इति क्रमादर्थः । समे देशे भूम्यै भूमेः सकाशान्नतु पाषाणादौ रूढः । स्वाद्योनेः स्वीयोपादानान्नतु शाखायां रूढः । अत आपस्तम्बोपशाखजमिति प्रथम- काण्ड एव रूढ इति ।

यं कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै वृश्चेद्यं कामयेतापशुः स्यादित्यपर्णं तस्मै शुष्काग्रं कामयेत पशुमान्स्यादिति बहुपर्णं तस्मै बहुशाखमशुष्काग्रम् ।

यं कामयेतेति निन्दार्थवादस्तृतीयः काम्यः पक्षः । आरोहो वृक्षमारूढः शाखाज इति यावत् । स्पष्टमन्यत् ।

---

१ ख. ग. ठ. ण. °वृक्षो न ।

प्रतिष्ठितं प्रतिष्ठाकामस्य ।

समे भूम्या इत्यादिब्राह्मणोक्तो नित्यः काम्यश्चेत्यर्थः ।

यः प्रत्यङ्ङुपनतस्तं वृश्चेद्यः प्राङ्कुदङ्वोपनतः।

ऋजुरूर्ध्वं इत्यस्य विकल्पार्थं पक्षत्रये वा शब्दस्त्रिभिः संबन्ध्यते। उपनतो नम्रः ।

यस्य चर्जोः सत ईषदिवाग्रमुपनतम् ।

पूर्वमृजुरूर्ध्वं इत्यनयोर्बाधेन विकल्प उक्त इदानीं तयोरेव गुणान्तरं यः प्रत्यङ्ङुपनत इत्यनेनोक्त इति व्याख्यातुमेतत्सूत्र प्रत्यङ्ङुपनतोऽग्र ईषदिवेति, तेनोर्ध्वमृजुत्वं न बाधितमित्यर्थः ।

एवं रूपं वृश्चेच्छिन्द्यादित्युक्तं तत्प्रकारमाह—

अत्यन्यानगामिति ॥ १ ॥ यं जोषयते तमुपतिष्ठते ।

यज्ञाया इत्यन्तः । यं यूप्यत्वेन प्रीतिकरं मन्यते तमुपतिष्ठते यूप्यं वृक्षमित्यर्थः ।

देवस्त्वा सविता मध्वाऽनक्त्विति स्रुवेण
गुल्फदघ्ने जानुदघ्ने वा पर्यणक्ति ।

गुल्फः पादग्रन्थिः । ऊरुजङ्घयोः संधिर्जानु तन्मितमधस्तात्त्यक्त्वाऽनन्तरे देशे परितोऽनक्ति । हस्तव्यावृत्तये स्रुवेणेत्युक्तम् ।

ओषधे त्रायस्वैनमित्यूर्ध्वाग्रामोषधिमन्तर्दधाति
स्वधिते मैनꣳ हिꣳसीरिति परशुना प्रहरति यः
प्रथमः शकलः परापतति तमुपयच्छते ।

उपयच्छते स्थापयति । स्पष्टमन्यत् ।

अनक्षसङ्गꣳ स्थाणुमुच्छिꣳषन्वृश्चति गुल्फदघ्नं वा ।

अनक्षसङ्गं वृश्चेदिति ब्राह्मणार्थमुच्छिषन्स्थाणुमित्युक्तवान् । अक्षः शकटरथयोस्तेन यथा स्थाणुर्न सज्जते तथा स्थाणुमवशेषयन्नित्येव गुल्फदघ्न इति पूर्वोक्तेन विकल्पः । छेदनदेशस्य देवस्त्वेति सूत्रेणाञ्जनस्थानमुक्तम् । तत्र प्रहारेण शकलं ग्राह्यम् । अञ्जनस्थानं तु शकलार्थमित्यवगम्यते यूपच्छेदस्थानस्य पुनरुक्तत्वात् ।

दिवमग्रेणेति प्राञ्चमुदञ्चं वा प्रहापयति ।

पृथिव्या संभवेति मन्त्रान्तः । हापयति पातयति ।

वनस्पते शतवल्शो विरोहेत्याव्रश्चने जुहोति सहस्रवल्शा वि वयꣳ रुहेमेत्यात्मानं प्रत्यभिमृशति ।

आव्रश्चनं स्थाणुः । जुहोति दर्विहोमधर्मेणाऽऽज्यशेषस्यैव । गतार्थमन्यत् ।

---

१ घ. ङ. ज. ञ. म ढ. °मुपावन° ।

यं त्वाऽयꣳ स्वधितिरित्यनुलोमं परशुनाऽङ्गान्कल्पयति ।

सौभगायेत्यन्तः । अङ्गान्यूपशाखा अनुलोममधस्तदारभ्योर्ध्वं छेदनेन कल्पयति छिनत्ति ।

आच्छिन्नो रायः सुवीर इत्यग्रं परिवासयति ।

छिनत्ति यूपाग्रं मानेन यत्र यूपाग्रं भवति तत्रैव । संस्कारोऽयम् । * अत एव कात्यायनः (नेन) परिवास्याच्छेदनं पुनरिति पुनश्छेदनप्रतिषेधात् ।

एकारत्निप्रभृतीनि ब्राह्मणव्याख्यातानि काम्यानि यूपप्रमाणानि तेषां याथाकामी ।

स यत्पशुना यक्ष्यमाण एकारत्निं यूपं कुरुत इममेव तेन लोकं जयत्यथ यद्य॰रत्निमन्तरिक्षमेव तेन लोकं जयतीत्यादि वाजसनेयब्राह्मणम् । पञ्चारत्निं तेनस्का॰मस्येत्याद्येकविंशत्यरत्निपर्यन्तानि स्वब्राह्मणव्याख्यातानि तानि काम्यान्येव सति कामेऽङ्गीकार्याणि ।

सहोपरेण संख्या स्याद्वा त्रयस्त्रिꣳशदरत्नेः ।

उपरो भूमिखातं तदर्हः प्रदेशोऽतक्षो मूलभागो यावान्भूमिमध्ये गच्छति तेन सह यूपपरिमाणं वेदितव्यमा त्रयस्त्रिंशत्संख्यापर्यन्तम् ।

त्र्यरत्निर्वा चतुररत्निर्वा पालाशो निरूढ॰पशुबन्धस्य यूपोऽतोऽन्ये सौम्यस्याध्वरस्य ।

ये पूर्वमविशेषेण यूपवृक्षा उक्ता यानि यूपमानानि तन्मध्ये त्र्यरत्निश्चतुररत्निर्वा पालाशो निरूढो नित्य ऐन्द्राग्नः सौर्यः प्राजापत्यो वा पशुबन्धस्तस्यान्यमानयुक्ता अन्यवृक्षजाश्च सौम्यस्याध्वरस्याग्निष्टोमप्रभृतेः । एवं हि श्रूयते स वा एष त्र्यरत्निर्वैव चतुररत्निर्वा पशुबन्धयूपो भवतीति वाजसनेयकम् । तथा तत्रैव पालाशमेव यूपं कुर्वी-तेति नियमः ।

अष्टाश्रिं तक्ष्णोति नातिस्थूलं नात्यणुमतष्टमुपरम् ।

अष्टाश्रयो धारा यस्य तथा तक्ष्णोत्येवं तक्षण आनयनं दृष्टार्थं स्यात् । उपरार्ह॰प्रदेशं न तक्ष्णोति । स्पष्ट मन्यत् ।

पुरःपुरोणीयाꣳसं गोपुच्छं वा ।

उपरादूर्ध्वं यावदग्रं किंचित्किंचिदणुपरिणाहं गोपुच्छसदृशं वोपरादूर्ध्वं किंचिन्न्यूनं ततः किंचित्स्थूलं ततः किंचित्किंचिदणुपरिणाहं तथैव गोपुच्छम् ।

---

* अत एवेत्यसंगतम् ।

---

१ ग. ठ. ण. 'स्याग्नीषोम° ।

तस्यैव वृक्षस्याग्रतश्चषालं करोति ।

यस्य यूपस्तस्य वृक्षस्य चषालनामकं परिवासितादग्रभागादुपरितनस्यावशिष्टस्यावयवस्य नान्यवृक्षस्य ।

कथं कार्यं त(र्यस्त)दाह—

अष्टाश्रि पृथुमात्रं मध्ये संनतम् ।

अष्टावश्रयो धारा यस्य तत्त(स त)था । पृथुराकुञ्चिताङ्गुलिकरस्य मणिबन्धमारभ्याङ्गुल्यग्रपर्यन्तं पृथुः । पृथुरूर्ध्वो दशाङ्गुल इति बौधायनः । दशाङ्गुलं दीर्घं मध्ये संनतं पूर्वापरभागापेक्षया ।

यावदिदं प्रथममङ्गुलि काण्डं ताव-
दूर्ध्वं चषालाद्यूपस्यातिरेचयति ।

तर्जन्याः प्रथमं पर्व तत्परिमाणं दीर्घं चषालादूर्ध्वं यूपस्याग्रमतिरिक्तं भवति तथोर्ध्वमुखे चषाले कृतवेधे प्रवेशयति ।

अङ्गुलिमात्रं कनीयो वाऽङ्गुलेः ।

यूपाग्रं प्रवेशनीयं स्थूलमङ्गुलिप्रमाणम् । ततोऽपि वा सूक्ष्मं प्रतिमोचनं वक्ष्यति ।

द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वैतेषा-
मेव तक्षणानां[१] स्वरुं करोति ।

एतेषामेव तक्षणानां तक्षणजनितशकलानामन्यतरेणैकेन द्व्यङ्गुलादिप्रमाणं स्वरनामकं शकलं करोति ।

यं कामयेतान्योऽस्य लोकमभ्यारोहेदित्य-
न्यवृक्षस्य[२] स्वरुं चषालं च कुर्यात् ।

निन्दार्थवादोऽयम् । अस्य यजमानस्य लोकं स्थानमन्यो भ्रातृव्योऽभ्यारोहत्विति तेन तस्यैव वृक्षस्य कुर्यादित्यर्थः ।

वेदं कृत्वाऽग्रेणाऽऽहवनीयम् ॥ २ ॥ रथमात्रीं वेदिं करोति ।

वेदेः पूर्वं वेदकरणं प्राप्तमेव क्रमार्थमनुवादः । आहवनीयग्रहणमतिदेशप्राप्तगार्हपत्यव्यावृत्त्यर्थम् ।

रथमात्रीमित्युक्तं तद्व्याचष्टे—

रथेषामात्रीं प्राचीं[३] रथाक्षमात्रीं पश्चात्ति-
रश्चीं विपथयुगमात्रीं पुरस्तादुदीचीम् ।

ईषादिप्रमाणं तु शुल्बे वक्ष्यति अष्टाशीतिशतमीषा तिर्यगक्षश्चतुःशतं षडशीतियुगमाहुरिति । युगस्य बाह्यच्छिद्रयोर्मध्यो विपथयुग आहवनीयप्राग्रेखामध्यात्प्राची-

१ घ. ङ. झ. ञ. ढ. एतस्यैव । २ घ. ङ. ज. झ. ञ ढ. °न्यस्य वृ° । ३ घ. ङ. ज. झ. ञ. ढ. °स्वातिरश्चीम् ।

मष्टाशीत्युत्तरैकशताङ्गुलं पश्चाद्भागे दक्षिणोत्तरमानेन चतुरधिकं शतं प्राग्भागे दक्षिणोत्तरमानेन षडधिकाशीतिरेवं प्रमाणां निरूढे वेदिं कुर्यात् ।

अपि वा षडरत्निं प्राचीं चतुररत्निं पश्चात्ति-
रश्चीं त्र्यरत्निं पुरस्तात्तिरश्चीमसंनता भवति ।

वेदिशब्दः संस्कारनिमित्त इति प्रकृते वेदिशब्दाभिहिता ससंस्कारा प्राप्ता मध्ये संनामोऽपि प्राप्तः स उपदेशेन निवर्त्यते न संनताऽसंनतेत्युभयोरपि । गतार्थमन्यत् ।

यत्प्रागुत्तरस्मात्परिग्राहात्तत्कृत्वा
पूर्वार्धे वेदेर्यूपावटायावकाशमव-
शिष्य शम्ययोत्तरवेदिं विमिमीते ।

यदित्यनुवादश्चोदकप्राप्तस्योत्तरवेदिकालविधानार्थः । पूर्वार्धः पूर्वो भागस्तस्य प्राग्रेखामध्य एव यूपावटो यूपोच्छ्रयणे खातं तदर्थमवकाशं स्थापयित्वा तस्य पश्चाच्छम्या माननोत्तरवेदिनामिकां वेदिं विस्तारेण मितां करोति । संचरार्थमव-शिष्येत्यपि ज्ञेयं सूत्रान्तरे दर्शनाच्च ।

विमानप्रकारमाह—

पुरस्तादुदीचीनकुम्बा१ शम्यां निधाय वित्तायनी
मेऽसीति स्फ्येनोदीचीं लेखां लिखति ।

वेदिमानं शम्यामात्रमेव । तत्र चिकीर्षिते स्थले पुरस्ताद्भाग उदीचीनं कुम्बमस्या-स्तादृशीं निधाय स्फ्यस्याग्रेणोदगपवर्गां शम्यामानेन लिखेदन्तरत इत्यग्रे वक्ष्यति । शम्याग्रं कुम्बं व्याख्यातं दर्शपूर्णमासव्याख्याने ।

दक्षिणतःप्राचीनकुम्बां निधाय तिक्तायनी मेऽसीति
दक्षिणतः प्राचीं पश्चादुदीचीनकुम्बां निधायावतान्मा
नाथितमिति पश्चादुदीचीमुत्तरतः प्राचीनकुम्बां निधाया-
वतान्मा व्यथितमित्युत्तरतः प्राचीमभ्यन्तरं परिलिखति ।

शम्यां स्फ्येन लेखां लिखतीति पदचतुष्टयमावर्तते । यल्लिखति तदभ्यन्तरमिति तु पूर्वेण सह चतुर्भिः संबध्यते । उत्तरतो गमनमप्रदक्षिणं गतार्थमन्यत् ।

उत्तरेणोत्तरं वेद्यंसं प्रक्रमे चात्वालस्तं
परिलिखत्यनेनैव कल्पेन यदन्यन्मन्त्रेभ्यः ।

यं परिलिखति स चात्वाल इति भाविनी संस्कारनिमित्ता संज्ञा । तस्य स्थानमुत्त-

१ घ. ङ. ञ. झ. त्र. ठ. ण. °खस्यैतेन' ।

रेणोत्तरभागे वेदेर्महावेदेरंस ईशान्यकोणस्तस्योत्तरतः प्रक्रमो व्याख्यातस्तस्मिन्नतीते चात्वालस्य दक्षिणरेखामध्यो यथा परितो लिखति प्रागारभ्य प्रदक्षिणशम्यानिधान-रूपरेखाकरणादिना कल्पेन विधिना मन्त्रविधिं विनाऽन्येन ।

देवस्य त्वेत्यभ्रिमादाय विदेरग्निर्नभो नामेति खनति ।

आदद इत्यन्तः । प्रकृतं चात्वालमेव सकृन्मन्त्रेण ।

जानुदघ्नं त्रिवितस्तं वा खात्वा ।

शम्यामानेन विस्तृतमधस्ताज्जानुदघ्नं जानुपरिमाणं वितस्तित्रयपरिमाणं वा खात्वेति क्त्वाप्रत्ययेन तावत्परिमाणमादौ खात्वा पश्चादुक्त कार्यमाह ।

अग्ने अङ्गिर इत्यभ्रिं प्रहरति ।

खातायां मृदि प्रवेशयति ।

योऽस्यां पृथिव्यामिति पांसूनपादत्ते ।

असीत्यन्तः । पांसून्खातमृदं वा कात्यायनीये हस्तेन चेत्युक्तं सामर्थ्यात्सव्येन हस्तेन वाऽङ्गी करोति ।

आयुषा नाम्नेहीति हरति ।

पांसूनुत्तरवेदिप्रदेशं प्रति नयति । मन्त्रस्तावानेव ।

यत्तेऽनाधृष्टमित्युत्तरवेद्यां निवपति ।

त्वाऽऽदध इत्यन्तः । विमिते देश उत्तरवेद्याश्चिकीर्षिताया निदधाति पांसून् ।

*एवं द्वितीयं हरत्येवं तृतीयम् ॥ ३ ॥

एवं द्वितीयं तृतीयं च हरतीति लघुवाच्ये द्वितीये मन्त्रे यो द्वितीयस्यां पृथिव्या-मित्याद्यनुषङ्गो यथा स्यात्तृतीये तु सानुषङ्गः पाठस्तत्र विधिमात्रमतिदिश्यत इति । अत्र हरतीत्येतावदतिदिष्टं तत्त्वग्ने अङ्गिर इति त्रिर्हरतीति श्रुतेः प्रहरणादि साङ्गं हरण निर्दिष्टमिति प्रहरणाद्यपि ज्ञेयम् ।

यो द्वितीयस्यामिति द्वितीयमपादत्ते यस्तृ-तीयस्यामिति तृतीयं तूष्णीं चतुर्थम् ।

अग्ने अङ्गिर इति प्रहृत्य यो द्वितीयस्यामित्यादि हरणान्तं निवपनार्थत्वादर्थसिद्धं, निवपनं समन्त्रमेव, तथा तृतीयं, चतुर्थं तु प्रहरणादि हरणान्तं तूष्णीं तूष्णी निवप-नम् । कुतः । श्रुतिर्हि त्रिर्हरतीत्येतावदेव विधत्ते । सूत्रे तु निवपतीत्यन्तं व्याख्यातं तत्र मन्त्रलिङ्गान्मध्ये मन्त्रं विच्छिद्यार्थप्राप्ते नाना क्रियासु विनियोगो व्याख्यातस्तत्र

* सूत्रपुस्तकेषु एतत्सूत्रस्थाने 'एव द्वितीयं तृतीयं च हरति' इति पाठो विद्यते ।

१ च. छ. °म्यामानेन ।

श्रुतौ हरति(तिः)प्रापणार्थत्वेन निवपतिशब्देन व्याख्यातः । प्रापणं तु मृशो वहनपूर्वकमिति स्वेन वहत्यर्थो हरतिर्मध्ये प्रयुक्त इति न विसंवादस्तथा चाऽग्ने अङ्गिर इत्यारभ्य निवपतीत्यन्तं हरत्यर्थ एवं त्रिर्मन्त्रेण तूष्णीं चतुर्थमिति सिद्धम् ।

सिꣳहीरसि महिषीरसीत्युत्तरवेदिं करोति ।

उत्तरवेदिं वेदिश्चतुरश्रा लोकप्रसिद्धा शम्यामानेनापि चतुरस्रता च यावत्खातचात्वालपांसुभिरुच्छ्रितां करोतीति यावत् । तदेव व्यूहनं कात्यायनेनोक्तम् ।

उरु प्रथस्वेति प्रथयति ।

प्रथितां यावत्कृतशम्याभ्यन्तररेखाव्यापिनीं करोति । भारद्वाजेनाप्युक्तं शम्यामात्रीं प्रथयतीति । यज्ञपतिः प्रथतामित्यन्तः ।

ध्रुवाऽसीति शम्यया सꣳहन्ति ।

संघट्टयति शम्यया ।

देवेभ्यः कल्पस्वेति कल्पयति ।

यथा विशीर्णा न स्यात्तथा समर्थयति प्रान्तलेपेन ।

देवेभ्यः शुन्धस्वेत्यद्भिः प्रोक्षति ।

अद्भिरित्युक्तं लौकिकीभिरेव ।

देवेभ्यः शुम्भस्वेति सिकताभिरनु प्रकिरति ।

वेदिं सिकता मृत्पांसवस्तैरनूपरिष्टात्कीर्णां युक्ता करोति ।

यत्ते क्रूरं यदास्थितमिति पुनरेवाद्भिरवोक्षति ।

शुन्धतामित्यन्तः प्रकरणान्तरान्तर्गतोऽप्यत्र शाखान्तरविहितः प्रतीकेनोपात्तः सामर्थ्याद्यावत्क्रियं गृह्यतेऽवोक्षणं तु न्युब्जेन करेण प्रोक्षणमुत्तानेन ।

उत्तरतो दक्षिणतो वा स्फ्येनैकस्फ्यां निःसार्यापो रिप्रं निर्वहतेत्यपाꣳ शेषं निनयति ।

उत्तरवेदेरित्यर्थादवगम्यते तस्या एव प्रकृतत्वाद्दक्षिणदेशे वोत्तरदेशे वा महावेद्यामेव । एका स्फ्येन कृता रेखैकस्फ्या तां निःसार्य निःसरणमुदकशेषस्य यथा स्यात्तथा कृत्वाऽवोक्षणशेषं निनयति । तस्यैव प्रकृतत्वात्प्रोक्षणस्य व्यवहितत्वात् । यद्युच्छिद्येत तर्हि निनयनमन्यथा नास्ति ।

विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम्[1] । वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विराजतीत्युत्तरवेद्या अन्तान्कल्पयति ।

मृज्जलैर्लेपनेन दृढां करोति ।

---

१ घ. ङ. ज. झ. ञ. ढ. °क्षतु त्म° ।

चतुः शिखण्डे युवती कनीने घृतप्रतीके भुवनस्य मध्ये । तयोर्देवा अधिसंवसन्त उत्तमे नाक इह मादयन्तामिति वेदिमुत्तरवेदिं च संमृशति ।

द्विवचनेनोभयोः सकृन्मन्त्रेण ।

उत्तरवेद्यां मध्ये गोष्पदमात्रीमश्वशफमात्रीं प्रादेशमात्रीं वोत्तरनाभिं करोति ।

चतुरश्रामिति भरद्वाजादयः । नाभिसंज्ञकमवयवं करोति । तस्योच्छ्रयस्तु नोक्तोऽतो यावताऽभिव्यक्तिस्तावत्येवोच्छ्रिता ।

इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्विति प्रदक्षिणमनुपरिक्रामन्प्रतिदिशमुत्तरवेदिं प्रोक्षति

सामन्तत्वख्यापनाय प्रदक्षिणमित्युक्तम् । प्रतिदिशमनुपरिक्रामन्नुत्तरवेदिं प्रोक्षति । दिग्भ्य एवैनां प्रोक्षतीति श्रुतेर्दिग्भ्यः सकाशादापः प्रोक्षणार्थाः प्रेरणीयास्ततस्तु पूर्वदिग्भागे स्थित्वा सर्वां वेदिं प्रोक्षति । दक्षिणे स्थित्वा तथैवैवं पश्चादुत्तरतश्च तल्लिङ्गैः सर्वामपि प्रोक्षति । पात्विति द्वितीयादिष्वप्यनुषङ्गो मन्त्रेषु प्रकृतनाभिव्युदासार्थं वेदिमित्युक्तम् ।

त्वष्टा त्वा रूपैरुपरिष्टात्पात्वित्युपरिष्टात्प्रोक्षति ।

शाखान्तरीयवाक्यशेषपाठेन पुनः प्रोक्षतीत्युक्तं वेदिमित्येव ।

शेषं निनयति यथा पुरस्तात् ।

प्रोक्षण्यपामेकस्फ्यायां निनयति पूर्ववत् ।

***औदुम्बरशाखाभिश्छन्नां परिवासयति[1] यदि श्वः कालः ॥ ४ ॥**

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्थप्रश्ने प्रथमः पटलः ॥ १ ॥

छन्नामाच्छादितां परिवसति सा तादृशीं करोति निर्व्यापारेण रात्रिं गमयतीति यावत् । सद्यस्काले पशौ छादनं निवर्तते वा साङ्गत्वात्तस्य । अनेन च पशुबन्धो द्व्यहसाध्योऽप्यस्तीत्युक्तम् । तेन यजनीये चेत्सद्य एवान्यथा त्वसंभवादौपवसथ्ये चेद्विकल्पः । चतुर्दश्यामुपक्रम्य पञ्चदश्यां यागः । अत एव तत्र तत्र वदति पूर्वस्य

---

* सूत्रपुस्तकेषु तु उदुम्बरेति पाठः ।

---

१ ग. ठ. परिवासयति ।

पर्वण औपवसथ्येऽहनीति । चतुर्दश्यामन्वाधाय सद्यो वा पञ्चदश्यां समानतन्त्रं दर्शेन पूर्णमासेन वेत्यपि पूर्वमुक्तम् । तत्रापि व्यहकालेनेति वक्तु यदि श्वः काल इत्युक्तम् । बौधायनोऽपीष्टिपशुबन्धाः सोपवसथाः सद्यो वेति ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां चतुर्थप्रश्ने प्रथमः पटलः ॥ १ ॥

अथ चतुर्थप्रश्ने द्वितीयः पटलः ।

आहवनीयेऽग्निप्रणयनान्यादीपयति ।

अग्निः प्रणीयते यैः काष्ठैस्तान्याहवनीये प्रज्वालयति । गार्हपत्यादेवार्थार्थाय प्राप्तमुद्धरणमपवदितुमाहवनीय इत्युक्तम् ।

सिकताश्चोपयमनीरुपकल्पयते ।

सिकता वालुका एवोपयमनीरुपयम्यते प्रदीप्तो याभिस्ता उपयमन्यस्ता यथोपयमनाय समर्थाः स्युस्तथा पात्रेण धृताः करोति । न च चकारादुपयमन्यो भिन्नाश्चेति वाच्यम् । उपयमनीरुपनिवपतीति सिकतानामेवोपवापयोग्यत्वाद्बहुत्वाच्च सिकता उपयमनीः कृत्वेति भरद्वाजः । सिकताभिरुपयम्येत्यापस्तम्बः ।

उद्यच्छतीध्ममुपयच्छत्युपयमनीरुपयते धार्यमाणे ।

यान्यपि प्रणयनान्यादीप्तानि तान्येव समुदायापन्नानीध्म इत्युच्यते । काष्ठान्येवेध्मो नतु संस्कारनिमित्त इति दर्शितम् । इध्ममग्निप्रणयनीयमित्येकत्वदर्शनेन नेध्मस्य संस्कारापेक्षा । इध्ममुपय(द्य)च्छति समूहीकृत्योर्ध्वमुत्क्षि(र्ध्वं क्षि)पति । उपयच्छति सिकताः शरावगृहीताः प्रदीप्तेध्मस्य संवरणार्थमुप समीपे यच्छत्यधस्ताद्धारयति यथोद्यम्यमानोऽग्निर्न विशीर्येताधस्ताच्च न पतेत्तेनोपयत उपयमनीभिर्यमिते धार्यमाण इध्म उपरीत्यर्थः ।

यत्ते पावक चकृमा कच्चिदागः पूर्वो यत्सन्न परो भवासि । घृतेन त्वं तनुवो वर्धयस्व मा मा हिंसीरधिगतं पुरस्तादिति शेषे जुहोति ।

शिष्ट आहवनीय एव नतूद्धृते मन्त्रलिङ्गादित्यर्थः । दर्विहोमत्वात्स्वाहान्तो मन्त्रः । अपादानाय पावकाग्नय इदम् ।

अग्नये प्रणीयमानायानुब्रूहीति संप्रेष्यति प्रणीयमानायानुब्रूहीति वा ।

होतारमित्यर्थात्तुल्यबलत्वाद्विकल्पः ।

त्रिरनूक्तायाꣳ हरत्युत्तरवेदिं प्राप्य जुह्वां पञ्चगृहीतं गृहीत्वा हिरण्यमन्तर्धायाक्ष्णयोत्तरवेदिं व्याघारयति ।

त्रिरनूक्ताया प्रथमायामिति ज्ञेयम् । ऊर्णाम्रदं प्रथस्व स्वाहेति परिधानीयायां प्रथमायामिति वक्ष्यमाणत्वान्न परिधानीयायां प्रथमायामित्येवाऽऽह भरद्वाजः । हरति तमग्निमुत्तरवेदिसमीपं प्राप्येति पाठप्राप्तस्य पुनर्वचनं कात्यायनादिभिर्यदुक्तं पञ्चगृहीतं गृहीत्वाऽग्निं प्रणयतीति तन्मा भूदित्येवमर्थम् । जुह्वामिति वचनं जुहोतिचोदनाभावे स्वाहान्तमन्त्रपाठेऽपि न दर्विहोम इति स्पष्टयितुं हिरण्यं सुवर्णमन्तर्धाय यत्र यत्र व्याघारयति तत्र तत्रेत्यर्थो न तु स्रुच्यवधानमन्तर्धानं हि स्थलाज्ययोर्मध्ये व्यवधानं कोणात्कोणपर्यन्तं तु प्राङ्न्यायादिना ।

सिꣳहीरसि सपत्नसाही स्वाहेति दक्षिणेऽꣳसे ।

नाभ्यतिरिक्तोंऽसस्तत्र नाभिलग्नकोणमारभ्याग्निकोणपर्यन्तमक्ष्णयेति वचनादन्यत्राप्येवम् ।

सिꣳहीरसि सुप्रजावनिः स्वाहेत्युत्तरस्याꣳ श्रोण्याम् ।

वायव्यकोणमारभ्य नाभिवायव्यकोणपर्यन्तम् ।

सिꣳहीरसि रायस्पोषवनिः स्वाहेति दक्षिणस्याꣳ श्रोण्याम् ।

नैर्ऋतकोणमारभ्य नाभिकोणपर्यन्तम् ।

सिꣳहीरस्यादित्यवनिः स्वाहेत्युत्तरेऽꣳसे ।

नाभिकोणमारभ्यैशानकोणपर्यन्तम् ।

सिꣳहीरस्यावह देवान्देवयते यजमानाय स्वाहेति मध्ये ।

नाभेर्नैर्ऋतकोणमारभ्यैशाननाभिकोणपर्यन्तं तत्र तत्र हिरण्यान्तर्धानपूर्वकं सर्वत्रोत्तरवेदिर्देवता तेभ्य उत्तरवेदिरित्युपक्रम्य तस्मादुत्तरवेदिं पूर्वामग्नेर्व्याघारयन्तीति श्रुतेः ।

भूतेभ्यस्त्वेति स्रुचꣳ हिरण्यं चोद्गृह्य ।

उपयुक्तप्रतिपत्तिरतो विशेषनिर्दिष्टयोर्मन्त्रावृत्त्यैवोद्गृह्योत्क्षिप्याप्राप्तत्वाद्विधिरनुमेयः । य एव देवा भूता इत्याद्यर्थवादेन च देवतात्वं स्वाहाकारेण दानाभावात् ।

पौतुद्रवैः परिधिभिः परिदधाति ।

पौतुद्रुर्देवदारुः । औदुम्बर इति केचित् । मानं वेदेर्यथा परिधीनां परस्परयोगो यथा स्यात्तावन्मात्रम् ।

विश्वायुरसीति मध्यमं ध्रुवक्षिदसीति दक्षिणार्ध्यमच्युतक्षिदसीत्युत्तरार्ध्यम् ।

परिदधातीत्यनुकृष्यते । दꣳहेति मन्त्रान्तः ।

उपक्लृप्ताः संभारा गुग्गुलुसुगन्धितेजनं
शुक्लोर्णास्तुका पैत्वस्यान्तराशृङ्गे[1] या ।

पूर्वमेव संपादिताः संभाराः संभ्रियतेऽग्निर्यैस्ते । गुग्गुलुधूपपाठः । गुग्गुल्विति भाषायाम् । सुगन्धितेजनमिति तृणविशेषो यस्तिक्तत्वान्न पशुभिर्भक्ष्यते । शुक्ला चासावूर्णा स्तुका चेति स्तुका छिन्नप्ररूढोर्णैव पैत्वस्य गतपुंस्कस्य मेषस्य शृङ्गयोर्मध्ये योत्पन्ना । पैत्वो वृष्णिरेवेति कात्यायनः । स्तुकामस्य च्छित्त्वा छिन्नस्तुकस्येत्येकेषामिति भरद्वाजः ।

तानग्नेर्भस्मासीति सकृदेवोत्तरनाभ्यां निवपति ।

तान्संभारान् । मन्त्रेऽग्नेर्भस्मास्यग्नेः पुरीषमसीत्येकवचनश्रुतेर्गुग्गुल्वादिशब्दैः प्रत्येकं भिन्नद्रव्यत्वात्प्रतिसंभारमाधाने मन्त्रदर्शनाच्च तथा प्राप्तमुक्त सकृदिति संभारशब्देनैव विधानादेकद्रव्यत्वादग्नेर्ह्येत्पुरीषं यत्संभारा इत्येकवचनेन बहूनां सामानाधिकरण्यान्नाभ्यास इत्यर्थः ।

ऊर्णावन्तं प्रथमः सीद योनिमित्युच्यमाने यज्ञ प्रतितिष्ठ सुमनौ सुशेवा आ त्वा वसूनि पुरुधा विशन्तु । दीर्घमायुर्यजमानाय कृण्वन्नथामृतेन जरितारमङ्धि यज्ञः प्रत्यष्ठादिति संभारेषु प्रतिष्ठापयति ।

उच्यमाने होत्रा तं दीप्तमिध्मं न्युप्तेषु संभारेषु प्रतिष्ठापयति मन्त्रेण ।

अग्नेः कुलायमसीति दक्षिणत उपयमनीरुपनिवपति ।

उपयमनीः सिकता अग्निसमीपे निवपति ।

मनुष्वत्त्वा निधीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान्देवायते यजेत्युपसमिन्धे ।

अग्निं काष्ठेन ।

अग्निर्यज्ञं नयतु प्रजानन्मैनं यज्ञहनोऽविदन् । देवेभ्यो यज्ञं प्रब्रूतात्प्रप यज्ञपतिं तिर स्वाहा वायुरादित्यो यज्ञो यज्ञं नयतु प्रजानन्मैनं यज्ञहनोऽविदन् । देवेभ्यो यज्ञं प्रब्रूतात्प्रप यज्ञपतिं तिर स्वाहेति चतस्रोऽतिमुक्तीर्हुत्वा ।

अतिमुक्तिसंज्ञिका आहुतीर्वायुर्यज्ञमित्यादि तथाऽऽदित्यो यज्ञमित्यादि मध्ययोरप्यनुषङ्गेण स्वाहान्ताभ्यां मन्त्राभ्या दर्विहोमधर्मेण जुहोति ।

---

१ ग. घ. ङ. ज. झ. ञ. ठ. ढ. ण. °शृङ्गीया ।

जुहू[१] स्रुवं च संमृज्य चतुर्गृहीतेनाष्टगृहीतेन द्वादशगृहीतेन वा स्रुचं पूरयित्वा सप्त त इति पूर्णाहुतिं जुहोति ॥ ५ ॥

अपूर्वत्वाद्धोमस्यापूर्वं संमार्गविधानं, पूरयित्वेति वचनाद्द्वादशगृहीतेनाष्टगृहीतेन चतुर्गृहीतेन वा यथा पूर्णा भवति तथा गृह्णातीत्युक्तम् । पूर्णया स्रुचाऽऽहुतिः पूर्णाहुतिरितिसंज्ञानिर्वचनात् ।

एषोऽत्राऽऽहवनीयो यतः प्रणीयते स गार्हपत्यः ।

यत उत्तरवेद्यां प्रणीय पूर्णाहुत्यन्तेन संस्कृतः सोऽत्र पशुबन्ध एव नाग्निहोत्रहोम आहवनीयकार्यकरो यतः प्रणीयते सोऽत्र गार्हपत्यो नाग्निहोत्रे । तथा च कालेऽग्निहोत्रं कर्तव्यं तन्त्रमध्येऽपि तच्च प्राकृतेष्वेव नतूत्तरवेदिस्थे भरद्वाजेनात्र विकल्प उक्तः संस्थिते पशुबन्धे काले वेति, तन्निराकृतम् ।

आहवनीयं गार्हपत्यं दक्षिणाग्निं चान्वाधायेध्माबर्हिराहरति ।

अतिदेशप्राप्तस्यानुवादोऽयं क्रमार्थं परमतव्युदासार्थं च । अन्वाधानं देवतापरिग्रहार्थमुक्तमिष्ट्या देवतापरिग्रहसिद्धौ न वचनमस्ति तस्मान्नान्वाधानसिद्धिः । तथा च भरद्वाजः—न पश्विष्ट्यामग्निं गृह्णीयादित्यपरमिति । दीक्षणीयायां हि वचनाद्देवतापरिग्रहार्थता । प्रत्येकग्रहणं तु प्राजिहितेऽन्वाधानाभावप्रदर्शनार्थम् । इष्ट्याऽऽन्वाधानसिद्धिः सांनाय्यविकारत्वाच्छाखाहरणं सूत्रान्तर उक्तं तन्मा भूदिति वक्तुमन्वाधायेध्माबर्हिरेवाऽऽनयति । द्रवद्रव्यं हि शाखया शोधनीयं न मांसं तथाऽस्मिन्नविद्यमाने सह धर्मद्रव्यं निवर्तत इत्युक्तत्वात् । व्रतग्रहणपूर्वकं वेदस्य पूर्वमेवं कृतत्वान्नाप्यत्र प्लक्षशाखाहरणं तस्य न प्रकृतशाखार्थेनार्थोऽपि तु विकृतावुपदेशेनास्मरणार्थं ततस्तु बर्हिराहरणानन्तरमेवाऽऽनयति नतु तस्या आनयनविधिरस्ति बर्हिरर्थे विधानानाभावात् । प्रायौगिकास्तूष्णीमानयन्ति आनयन एव वा प्राप्ते कुतस्तूष्णीमिति बर्हिः प्राकृतमेव नत्वग्नीषोमीयविकारत्वादिक्षुशलाके अपि ।

सप्तदश सामिधेन्यो न परिधीनिध्म उपसंनह्यति ।

वाचनिकं निरूढे सप्तदशत्वं विकृतौ तु विकल्प इत्येकः पक्ष उक्तोऽत्र तु नियतमेव समिधो वर्धन्त इत्युक्तं परिधिकार्यं पशौ ह्यग्निभ्रातृत्वसंस्तवाद्दृष्टार्थोऽयमुत्तरवेदिसंस्कारस्तथाऽपि प्रसङ्गेन रक्षसामपघातलक्षणोऽदृष्टसंस्कारोऽप्येभिः कर्तुं शक्यते परिधिशब्देन विधानाच्चातोऽन्ये प्राकृता निवर्तन्ते । ततस्त्वां विंशतिधेत्यूहः । त्रीन्परिधीनिति लुप्यते । यज्ञायुरनुसंचरानित्युपवेषधृष्टिशब्दविवक्षया पुंस्त्वं तद्दर्शि मेव पूर्वम् । •

---

१ च. °व प्रक्ष° ।

अग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीꣳ स्तीर्त्वा ।

चोदकप्राप्तानुवादः पदार्थक्रमार्थः । बर्हिराहरणानन्तरं वेदिकरणं तस्य जातत्वात् । यत्र परिस्तरणमुपवास इति क्रिया रात्रेः कालस्याभावेऽपि संस्कारलोपो नास्तीति-न्यायप्रदर्शनार्थं परिस्तरणानन्तरं पाणिप्रक्षालनमेव ।

यथार्थं पाशुकानि पात्राणि प्रयुनक्ति ।

अतिदेशप्राप्तौ चौषधपात्राणां प्रयोजनाभाव इति वक्तुं यथार्थमित्युक्तम् । यथार्थं प्रयुनक्ति पाशुकानि चेत्यर्थः ।

स्फ्यमग्निहोत्रहवणीꣳ स्रुवस्वधिती द्वे जुह्वसाहोपह-
वर्नीं द्वितीयां द्वे चोपभृतौ पृषदाज्यधानीं द्वितीयां
ध्रुवां द्वे आज्यस्थाल्यौ दधिधानीं द्वितीयां वेदं
समवत्तधानीं द्वे रशने द्विगुणां द्विव्यायामां त्रिगुणां
त्रिव्यायामां द्वे कार्ष्मर्यमय्यौ वपाश्रपण्यौ द्विशू-
लामेकशूलां च कुम्भीं हृदयशूलं प्लक्षशाखां स्वरुं
मैत्रावरुणदण्डं यूपं यूपशकलमरणी येन चार्थः ।

प्राकृतानि कपालशूर्पाजिनशम्याादिकं निवृत्तमौषधद्रव्याभावात् । स्वधितिः पशो-र्विशसनशस्त्रं, जुहू इति जुहूशब्दस्य न विसञ्ज्ञा तथाऽपि जुहू इति निर्देशश्छान्दसो भाषायां जुह्वाविति भवितव्यम् । दधिधानीं द्वितीयामिति च प्रथमतो दध्येव यस्यां निरुप्यते ता दधिधानीमित्यर्थः । पृषदाज्यं यस्यां क्रियते सा च पृषदाज्यस्थाल्येव । समवत्तधानीमितीडापात्रं पाशुकं, यूपशकलं तक्षणजातमञ्जनार्थम् । स्पष्टमन्यत् । येन चार्थः । येन सुवर्णशकलादिना । एवमन्यदपि ।

पवित्रे कृत्वा यजमानवाचं यच्छेति संप्रे-
ष्यति वाग्यतः पात्राणि संमृशति ।

पवित्रकरणानन्तरं ब्रह्मन्प्रणेष्यामीत्येतदस्त्येव । वाजसनेयकब्राह्मणेन प्रणीता-प्रतिप्रसवस्य दर्शपूर्णमासयोर्व्याख्यातमिति प्रणीताप्रणयनमामन्त्रणपूर्वकं कार्यमेव । व्याख्यातं दर्शपूर्णमासयोरेव । स्पष्टमन्यत् ।

प्रोक्षितेषु वाचं विसृजते ।

हविष्कृता वाचं विसृजत इति कालाभावात्प्रोक्षितेषु पात्रेषु । यज्ञमात्रेऽपि वाग्यतेन कर्तव्यपदार्थेषु प्राकृतेषु चोदकप्राप्तेषु मध्येऽन्ये न सन्तीति प्रोक्षितेष्वित्युक्तम् ।

उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यत आ-
ज्येन दध्ना चोदेहीति संप्रैषस्यान्तꣳ संनमति ।

स्फ्योद्सनानन्तरं प्रोक्षणीरासादयेत्यादि समानं, विशेष आज्येनेत्येतस्यानन्तरं

दध्ना चेति पदमूहनीयं, संनाम ऊहः। यथार्थमूह इत्युक्तमेव तथाऽपि मध्ये स्रुवं स्वधितिमिति मा भूदित्येवमर्थं प्रैषस्यान्तमित्युक्तम्। अयमभिप्रायः—यथा स्रुचः संमार्ष्टीत्यत्र स्रुवस्यापि ग्रहणमेवमत्र स्रुवग्रहणेन स्वधितिग्रहणं सिध्यति दध्नः प्रदेयत्वाभावादाज्येन न साम्यमतोऽन्यस्मिंश्च द्रव्ये तेनार्थेन संयुज्यमाने धर्मावेश इति न प्राप्नुयात्तदर्थमुक्तं संनमतीति दर्शितम्।

यत्प्रागाज्यनिर्वपणात्तत्कृत्वाऽऽज्यं निरूप्य दधि पृषदाज्यार्थं निर्वपति।

प्राकृतपदार्थानन्तरं वैकृतस्य विनिवेशार्थं क्रमदर्शनं प्रैषानुसारेणाऽऽज्यनिर्वपणा-द्यत्प्राक्तत्कृत्वेति तत्र स्रुववत्स्वधितिसंमार्गोऽवदानसाधनत्वादाज्यनिर्वपणमात्रे सत्ये-वादितिरस्येति दधिस्थालीमादाय महीनामिति दधि निर्वपति। तस्य प्रयोजनं पृषदाज्यार्थमिति पृषद्गुणकमाज्यं तस्य संस्कारार्थमित्यर्थः। तेन नेदं हविरपि तु हविःसंस्कारकं तेन न दधिधर्माः सायंदोहाद्याः। यत्र हविः प्रदीयेतेति वचनादत्र नाऽऽदिष्टसामान्यमामिक्षा तथाऽपि चोक्तार्थं आज्यधर्माः।

न तु(नु)तस्मिन्न संस्कारा नहि दर्शपूर्णमासार्थाज्यस्थाने विधीयते(न्ते) येनाऽऽज्य-धर्माः स्युरिति तत्राऽऽह।

तस्मिन्नाज्यधर्माः क्रियन्ते यदन्यदधिश्रयणात्।

वाजसनेयिब्राह्मणे हि भवति द्वयं वा इदं सर्पिः संसृष्टमाज्यं चेति धर्मप्राप्तिः स्वतन्त्रद्रव्यस्येवात उक्तं तस्मिन्नाज्यधर्माः क्रियन्त इति। तर्हि द्वयमप्यस्तु हविरिति न। पृषदाज्यमित्येकत्वं श्रुतेः। वदति च स्पष्टमेव कात्यायनः पशौ मन्त्रवर्णाच्छृते श्रेति पशौ स्वाहा देवाꣳ आज्यपान्स्वाहेति। तथा पृषदाज्यं गृह्णातीत्येकवचनश्रुतेश्च न द्रव्यद्वयं पृषदाज्यमित्याज्यशब्दादाज्यं संसृष्टं च दध्यपि तस्मादाज्यमेवैतत्। ननु द्वित्वश्रुतेरर्थवादत्वेन कुतः संस्कारप्राप्तिरिति चेन्न दध्यधिश्रयतीति वाजसनेयिनामन्या श्रुतिरधिश्रयणं निषेधति। न ह्यप्राप्तं निषिध्यतेऽतोऽवश्यं धर्मप्राप्तिरिति। किं च येन संसृष्टेन हविरुत्पद्यते तदपि हविर्धर्मैः संस्क्रियते यथा सायंदोहादि, संस्कृतेनैव दध्नाऽऽमिक्षोत्पत्तिरिति अन्नावधिश्रयणे द्रव्यनाशान्न। अत एव दध्ना चोदेहीति निगदान्तैः चोहः। न्यायमते तु न संस्कारः।

आज्यग्रहणकाले जुहूप्रभृतीश्चतुर्गृहीते गृहीत्वा तृतीयमाज्यस्य दधन्यानीय।

चतुर्गृहीतं प्रत्येकमाज्यस्य निरुतस्य तृतीयं भागनिर्देशात्संस्कार्यमाज्यं तृतीयमेव दधनीति गुणविभक्तेश्च।

---

१ क. न छं ट 'हीत्वा।

ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समिदिति पञ्चगृहीतं पृषदाज्यं गृह्णाति महीनां पयोऽसीति वा ।

मन्त्रद्वयविधिना वा कृतमन्त्र वा मन्त्रावृत्तिश्चान्यतरस्य ।

यथाप्रकृति ध्रुवायाम् ।

क्रमार्थमनुवादः ।

स्रक्षेष्वाज्येषु यूपसंमानेन प्रतिपद्यते ।

वेद्यास्तरणानन्तरं प्लक्षशाखास्तरणं दक्षिणश्रोण्याम् । तथोक्तं कात्यायनीये बर्हिषि प्लक्षशाखां स्तृणाति यूपसंमानेनोपलक्षितं कर्म पूर्वं च तत्करोतीत्यर्थः ।

तदाऽऽह—

देवस्यत्वेत्यभ्रिमादाय परिलिखितमिति त्रिःप्रद क्षिणं यूपावटं परिलिखत्यर्धमन्तर्वेद्यर्धं बहिर्वेदि ।

कृन्तामीत्यन्तः । अवट इ(मि)त्येकत्वात्सकृन्मन्त्रो द्विस्तूष्णीं, समन्तादिति वक्तुं प्रदक्षिणमिति । यूपावटो यूपार्थे गर्तस्तं मध्याद्यावान्खननायाऽऽसस्तावन्तं रेखयाऽङ्कितं करोति । महावेद्यां यथार्धं खातस्य वेद्या बहिश्चार्धं यथा तथा परिलिखति । अत्र वेदिर्नार्धस्याङ्गत्वेन विधीयतेऽपि तु वेदिदेशो लक्ष्यते । तथा च द्व्यात्मके देशे खात इत्येवान्यथा देशविधाने वेदेरङ्गत्वविधाने वाक्यभेदः स्यादतो देशलक्षणा । तेन प्राच्यां यूपैकादशिन्यां न वेद्यामर्धमिति फलम् ।

परिलिख्याग्नीध्रयूपावटं खनोपरसंमितं त्र्यङ्गुलेन द्व्यङ्गुलेन चतुरङ्गुलेन वोपरमति खनतादिति संप्रेष्यति ।

संमीयमानोऽवयव उपरशब्दवाच्योऽतस्तन्मानेऽवटे खाते ततोऽपि त्र्यङ्गुलाद्यन्यतमानेनाधिको निम्नः । अग्नीध्रयथाप्रैषं करोति ।

उपरमात्रं खात्वा ॥ ६ ॥

अग्नीध्रयथार्थं खात्वा ।

यत्ते शिल्पः परावधीत्तक्षा हस्तेन वाश्या । आपस्ते तद्भ्रियाः पुनन्तु शुचयः शुच इति यूपं प्रक्षालयति ।

स्पष्टम् ।

यवमतीः प्रोक्षणीः कृत्वा पृथिव्यै त्वेति मूलं प्रोक्षत्यन्तरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रꣳ शुन्धतां लोकः पितृषदन इति यूपावटेऽपोऽवनयति ।

---

१ क. °क्षितक° ।

यवयुक्ताः प्रोक्षणार्थमपः कृत्वा न संस्कारः। स्पष्टम्। 'शेषभूता अपोऽवटे' इत्येव भरद्वाजः।

यवोऽसीति यवं प्रास्यति पितॄणाꣳ सदन-
मसीति प्राचा बर्हिषाऽवस्तृणाति ।

यवप्रासनं बर्हिषाऽवस्तरणं च खात एव। उदगग्रत्वनिवृत्तये प्राचेति। यवोऽसी-त्यस्याराती रित्यन्तः।

स्वावेशोऽसीति प्रथमपरापातितꣳ शकलमधस्ता-
त्स्वरुमवटेऽवदधाति घृतेन द्यावापृथिवी आपृणे-
थाꣳ स्वाहेति हिरण्यमन्तर्धाय स्रुवेणाभिजुहोति।

स्वाहाकारान्तो मन्त्रोऽन्यशाखीयोऽस्मच्छाखायामिहाश्रवणात्। दर्विहोमत्वाज्जु-हूप्राप्तौ स्रुवेणेति वचनादितरधर्मनिवृत्तिः। हिरण्यं शकलेऽन्तर्धाय तत्राभिहोम आज्य-स्थाल्याज्येन द्यावापृथिव्यौ देवते। वित्तादिति स्वावेश इत्यस्यान्तः।

यूपायाज्यमानायानुब्रूहीति संप्रेष्यत्यज्यमानाया-
नुब्रूहीति वाऽग्रेणाऽऽहवनीयं लौकिकेनाऽऽज्येन
पुरस्तात्प्रत्यङ्तिष्ठन्यजमानो यूपशकलेनानक्ति।

आध्वर्यवे याजमानविधानं विकल्पार्थं तथैव कात्यायनभरद्वाजाभ्यामुक्तम्। अग्रे-णाऽऽहवनीयं विद्यमानं यूपं तस्य पुरस्ताद्भागे प्रत्यङ्मुखस्तिष्ठन्यजमानो यूपशकलेन साधनेन हस्तेन।

लौकिकेनेति।

जातिवाचिशब्देनोभयमागच्छति तत्राऽऽज्यं स्थालीगतं मा भूदिति लौकिकेनेत्यु-क्तम्। अञ्जनकर्मणः प्राकृत्वाभावादहोमत्वाच्च लौकिकेनेति गम्यते। होमस्तु यद्यप्य-यमप्राकृतस्तथाऽपि होमत्वेनाऽऽहवनीयाश्रयत्वेन च स्थाल्याज्येन। अञ्जनीयं कर्म न निर्दिष्टं तत्त्वग्रं चषालं चानक्ति चषालं प्रतिमुञ्चति स एवाधिकारात्।

देवस्त्वा सविता मध्वाऽनक्त्वित्यग्रमैन्द्रमसीति चषालम्।

अनक्तीत्यनुवर्ततेऽग्रं यूपस्य चषालं सर्वतः।

सुपिप्पलाभ्यस्त्वौषधीभ्य इति चषालं प्रतिमुञ्चति।

प्रतिमुञ्चत्यग्रे यूपस्यावदधाति। एतदन्तं याजमानमथवा प्रतिमोचनमध्वर्योर्यजमानोऽ-नक्तीत्येव विधानादित ऊर्ध्वं स्वञ्जनमध्यध्वर्योरेव। यजमानमेव तेजसाऽनक्तीति यज-मानातिरिक्तस्य वाक्यशेषे कर्तृत्वनिर्देशात्।

---

१ च. छ. ट. मत्यग्रं। २ ख. ग. छ. ठ. ण. 'चाचिका'।

देवस्त्वा सविता मध्वाऽनक्त्वित्यान्तमग्निष्ठामग्निमनक्ति ।

अन्तमाभिव्याप्याऽऽन्तमग्निष्ठामाहवनीयसंमुखामाग्निं यूपस्य तामनक्ति । अग्निमित्येव नोपरम् ।

रशनादेशे त्रिः प्रदक्षिणं परिमृशति मध्ये वा ।

यत्र रशनया परिव्यां तत्र यूपमध्ये वा ।

अनक्त्युपरम् ।

करोतीति शेषः । पुनर्वचनं कात्यायनेनोक्तं सोपरमग्निष्ठादेशमक्त्वेति तन्मा भूदिति ।

आञ्जनप्रभृति यजमानो यूपं नानु(नू)त्सृजत्यापरिव्ययणात् ।

स्पष्टम् ।

यूपायोच्छ्रीयमाणायानुब्रूहीति संप्रेष्यत्युच्छ्रीयमाणायानुब्रूहीति वा ।

स्पष्टम् ।

उद्दिव॰ स्तभानान्तरिक्षमित्युच्छ्रयति ।

अवटाद्बहिरेवोर्ध्वं करोति यूपमित्येव पृथिवीमुपरेण । दृ॰ंहेत्यन्तः ।

ते ते धामानीत्यवटेऽवदधाति ।

यूपमित्येव भूरिरित्यन्तः ।

विष्णोः कर्माणि पश्यतेति द्वाभ्यां कल्पयत्यग्निनाऽग्निष्ठां सदिशं मिनोति ॥ ७ ॥

ततामित्यन्ताभ्यां द्वाभ्यां मृश्य(भ्या)कल्पयति यथास्थानम् । अग्निनाऽऽहवनीयेनाग्निष्ठेति या पूर्वमुक्ताऽतस्तां समानदिशमाहवनीयाभिमुखां मिनोति रोपयति ।

यं कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्धयेयमित्यग्निष्ठां तस्याग्निमाहवनीयादित्थं वेत्थं वाऽतिनावयेत्तेजसैवैनं देवताभिरिन्द्रियेण व्यर्धयति यं कामयेत तेजसैनं देवताभिरिन्द्रियेण समर्धयेयमित्याग्निष्ठां तस्याग्निमाहवनीयेन संमिनुयात् ।

प्रथमोऽर्थवादो नित्यमग्निष्ठामग्निमाहवनीयाभिमुखां कुर्यादिति विधेस्तादृशस्य कामनायां संकल्पविधानार्थं द्वितीयं कामयेतेति प्रथम आहवनीयात्सकाशादित्थं वेत्थं वाऽन्यदिशं प्रति नावयेन्नुतं कुर्याद्दोषमुक्त्वा न तथा कुर्यादिति ।

---

१ क. ग. च छ. ट. ठ. 'व्याख्या त' । २ ख. क ज. झ. ञ. 'आनेत्यु' । ३ ख. ग. ङ. ७. ड. ठ. ण. द्वाभ्यां मृ' ।

अग्निं प्रत्युपनतं बर्हिष्ठे[1] निर्णुतमनाविरुपरं[2] संमिनोति ।

अग्निमाहवनीयं प्रत्युपनतं नम्रं बहिर्भागे निर्णुतमनुतमनम्रमनाविरप्रकट उपरो यस्येति तादृशं संमिनोति सम्यगवस्थापयति ।

ब्रह्मवनिं त्वेति प्रदक्षिणं पुरीषेण पर्यूहति ।

पुरीषेणावटखननमृदा परितः पूरयति । पर्यूहामीत्यन्तः ।

ब्रह्मदृꣳहेति मैत्रावरुणदण्डेन परिदृꣳहति ।

पुरीषं दण्डमूलेनाधस्ताद्गमयति द्रढयतीति यावत्पोषं दृꣳहेत्यन्तः ।

उत्तम्भय पृथिवीमिति प्रदक्षिणमपोऽनु परिषिञ्चति ।

दृतिमित्यन्तः । खातमनु यूपस्य परितः प्रदक्षिणं सिञ्चति ।

देवस्य त्वेति त्रिगुणां त्रिव्यायामां दार्भीꣳ रशनामादाय ।

आदद इत्यन्तः । त्रिभिर्गुणैर्निर्मितां दर्भमयीं प्रसारितयोर्बाह्वोर्मध्ये यावान्विस्तारस्तत्प्रमाणाम् ।

इदं विष्णुर्विचक्रम इति सव्यानेन पाणिना यूपं त्रिरुन्मार्ष्टि ।

गृहीतरशनायुक्तेन हस्तेनोर्ध्वं सकृन्मन्त्रेण द्विस्तूष्णीं मार्ष्टि । सुर इत्यन्तः ।

तद्विष्णोः परमं पदमिति यूपस्याग्रं प्रेक्षते ।

चषालादधिकमूर्ध्वस्थितम् ।

यूपाय परिवीयमाणायानुब्रूहीति संप्रेष्यति परिवीयमाणायानुब्रूहीति वा ।

स्पष्टम् ।

परिवीरसीति तया नाभिदेशे[3] त्रिः प्रदक्षिणं परिव्ययति मध्ये वा[4] ।

मनुष्या इत्यन्तः । वेष्टयति नाभिपरिमिते देशे यूपं मध्ये यूपस्य वा ।

उत्तरमुत्तरं गुणं करोति ।

वेष्टयन्प्रथमवेष्टनादुपरि द्वितीयं तदुपरि तृतीयं गुणं रशनावेष्टनस्य ।

यं कामयेतोर्जैनं व्यर्धयेयमित्यूर्ध्वां वा तस्यावाचीं वाऽवोहेत् ।

यजमानमूर्जा वियोगं नयेयमिति योऽध्वर्युः कामयेत तस्य यजमानस्य यूपरशनानाभिदेशे मध्ये वा परिवीतामूर्ध्वां सादयेदधस्ताद्वा प्रतिषेधार्थमेवाद(वोहन(?))मनेकार्थे[5]मित्यर्थः ।

---

१ क. ज. °हिष्ठां नि° । ख. °हिष्ठो नि° । ग. म. ठ. ण. 'हिष्ठो वि' । ङ. ट. 'हिष्ठाभि' । च. छ. ढ. 'हिष्ठनि' । झ. 'हिष्ठां नि° । २ घ. ङ. ज. झ. ञ. ठ. ढ. 'रं मि° । ३ घ. ङ. झ. ञ. ढ. नाभिदघ्ने । ४ म. ठ. ण. 'मर्थवा° । ५ ग. ठ. ण. °कार्थः ।

यदि कामयेत वर्षुकः पर्जन्यः स्यादित्यवाचीमवोहेत् ।

सत्यां कामनायामेव तथा संकल्प्याधस्तात्कुर्यान्नान्यथा । वर्षुको वृष्टिप्रदानशीलः ।

यदि कामयेतावर्षुकः स्यादित्यूर्ध्वामुदूहेत् ।

अवृष्टौ सत्यां पूर्ववदेव ।

यं कामयेत रुपस्य जायेतेत्युपान्ते तस्य व्यतिषज्य न प्रवेष्टयेद्यं कामयेत पुमानस्य जायेतेत्यान्तं तस्य प्रवेष्ट्य स्थविमदणीयसि प्रवयति ।

अस्य यजमानस्य रुपपत्यं भवत्विति यः कामयेतेति निन्दया न तथा कार्यमित्यर्थः । उपान्ते यूपे त्रिवेष्टितरशनायाः कृतग्रन्थेर्यौ मूलाग्रभागाववशिष्टौ तयोरुपान्ते द्वयोर्वेष्टनमकृत्वा परस्परं चामौ मेलयित्वोत्सर्गो व्यतिषङ्गः स न कर्तव्य इत्यर्थः । शाखान्तरप्रसस्य निन्दयोत्तरस्तुतिर्यं कामयेत पुमानस्येत्येतन्नित्यं काम्यं चैतत् । प्रवेष्टनमेकैकस्य प्रत्येकं ततोऽवशिष्टान्तौ स्थविमदणीयसि प्रवयति स्थविष्ठं स्थूलं भागं मूलभागमणीयसि सूक्ष्मे प्रवेशयति ।

दिवः सानुरसीति स्वरुमादत्ते दिवः सूनुरसीति वा[२] दिवः सानूपेषेति वाऽन्तरिक्षस्य त्वा सानाववगूहामीत्युत्तरेणाग्निष्ठां मध्यमे गुणे स्वरुमुपगूहत्युत्तमे[३] वा ॥ ८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्थप्रश्ने द्वितीयः पटलः ॥ २ ॥

अग्निष्ठाग्रेरुत्तरभागे गुणयूपयोर्मध्ये प्रवेशयति । स्पष्टमन्यत् ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां चतुर्थे पशुप्रश्ने द्वितीयः पटलः ॥

अथ चतुर्थप्रश्ने तृतीयः पटलः ।

उपक्लृप्तः पशुरकूटोऽकर्णोऽकाणोऽखञ्जोऽखण्डोऽषण्ढोऽघृष्टोऽश्लोणोऽसप्तशफः पन्नदञ्छागो यमान्यतरो यूथ्यो मातृमान्पितृमान्भ्रातृमान्सखिमांस्तं[४] स्नापयति[५] ।

पूर्वमेव तन्त्रारम्भादुपक्लृप्तः । पशुरिति सामान्यनिर्देशेऽपि च्छागस्य वपाया इत्यादि-

---

१ क. ख. ग. च. छ. ट. ठ. ण. °षजेयं । २ घ ङ. ज. झ. ञ. ढ. 'ति शकल्मा' । ३ घ. ङ. ज. झ. ञ. ट. °रुमवगू° । ४ क. °तरे वा । ५ घ ङ. ज. झ. ञ. ढ. स्नापयित्वा ।

लिङ्गाच्छाग इत्यग्रिमेण संबन्धः। कूटो भग्नशृङ्गः कुटिलशृङ्गोऽतोऽन्य एवमुत्तरत्रापि परिसंख्या ज्ञेया। कर्णेन विकर्णोऽ(लः)कर्ण इति रूढया स न। काणश्चैकचक्षुः स न। खञ्जो दुर्बलपादः स न। खण्डो दन्तैर्हीनः स न। षण्डः क्लीबः स न। घृष्टो गत्वरः स न। श्रोणो बधिरः स न। सप्तशफ एकस्मिन्पादे खुरद्वयहीनः स न। पतिता दन्ता यस्य स पन्नदन्तस्त ग्राह्यः। आदौ पतिताः पश्चादागता इत्यर्थः। तथा च बह्वृचब्राह्मणे—यदा वै पशोः पुनर्दन्ता जायन्तेऽथ स मेध्यो भवतीति। तथा चाखण्डः पन्नदन्नित्यनयोरविरोधो ज्ञेयः। छागोऽजः। यमयोरुत्पन्नयोर्मध्य एकः। प्रयूथ्यो यूथे समुदाये भवो नैकाकी। मातृमानित्यादिचतुष्टयं तत्कालविद्यमानं(न) मातृपितृभ्रातृसखितया ज्ञेयम्। तं स्नापयति प्रक्षालयति। अत्रानुग्रहमाह भरद्वाजः—यद्यङ्गहीनः स्याद्गूनो वा यथाऽर्थः संपद्येत वैष्णवीमाग्नावैष्णवीं सारस्वतीं बार्हस्पत्यां चेति हुत्वा सर्वप्रायश्चित्तानि जुहुयादिति। बाधूलस्त्वाग्नेयीमाग्नावैष्णवीं प्राजापत्यामैन्द्राबार्हस्पत्यामिति[2] च हुत्वोपाकुर्यादिति। यानि च सूत्रे विध्यपराधे चोक्तानि प्रायश्चित्तानि च बाधूलपक्षेऽप्यनाज्ञातादित्रयं सर्वप्रायश्चित्तं च समुच्चीयते। सर्वे होमा दर्विहोमधर्मेणाऽऽज्यस्थाल्याज्येनापूर्वा होमाः स्थाल्याज्येन होमव्यतिरिक्तमाज्यसाध्यं कर्म लौकिकाज्येनेति सर्वत्र ज्ञेयम्।

इषे त्वेति बर्हिषी आदत्ते।

दर्भौ द्वौ।

उपवीरसीति प्लक्षशाखाम्।

आदत्त इत्यनुकर्षः।

इन्द्राग्निभ्यां त्वा जुष्टमुपाकरोम्युपो देवान्दैवीर्विशः प्रजापतेर्जायमाना इमं पशुं पशुपते त इति बर्हिर्भ्यां प्लक्षशाखया च पशुमुपाकरोति।

दैवीर्विशः प्रागुरित्यादिरेवती रमध्वमित्यन्तः। प्रजापतेरिति च, इमं पशुमिति च मन्त्रैर्गृहीतबर्हिः प्लक्षशाखाभिः पशुं स्पृशन्देवतार्थत्वेन संकल्पयति।

प्रजानन्त इत्युपाकृत्य पञ्च जुहोति।

जुह्वा व्याप्तत्वादपूर्वत्वात्स्थाल्याज्यं वसाहोमहवन्यां पञ्च गृहीत्वा दर्विहोमधर्मेण प्रजानन्तः॰ येषामीशे॰ ये बध्यमान॰ य आरण्याः॰ प्रमुञ्चमाना[3] इति पञ्चभिर्मन्त्रैर्जुहोति। क्रमप्राप्त उपाकृत्येति वचनमुपाकरणाङ्गतां दर्शयितुं, तेनोपाकृतस्य पशोरूहः सिद्धः।

---

१ ख. ग. छ. ठ. ण. 'न्नतदन्त इ'। २ ग. ठ. ण. 'मैन्द्र वा'। ३ च. ङ. ज. झ. ञ. ढ. 'नन्तः प्रतिगृह्णन्ति पूर्व इ°।

पशुपतेः पशवो विरूपाः सदृशा उत । तेषां यं वव्रिरे देवा-
स्तं स्वराडनुमन्यतामिति वा मध्ये पश्चमीं जुहोति ।

प्रमुच्यमाना इत्येतस्य विकल्पार्थः ।

अग्नेर्जनित्रमसीत्यधिमन्थनशकलमादाया-
परेणाऽऽहवनीयं बर्हिषि निदधाति ।

अधिकृत्य मथ्यते येन शकलेन तत्तथा । बर्हिषि स्तीर्णे ।

वृषणौ स्थ इति प्राञ्चौ दर्भौ शकलेऽवदधाति ।

निहिते त्वधिमन्थनशकले कौचिद्दर्भौ स्थापयति । शकलसंस्कारोऽयमुपाकरण-बर्हिषोरन्यत्र विनियोक्ष्यमाणत्वात् ।

उर्वश्यसीत्यधरारणिमादत्ते पुरूरवा इत्युत्तरारणिम् ।

संस्कृते तयोरेव बुद्धिस्थत्वात् ।

घृतेनाक्ते इत्याज्यस्थाल्या बिलेऽनक्ति ।

अपूर्वाज्यनिवृत्तये चाऽऽज्यस्थाल्या इत्युक्तम् । स्रुवादीनां ग्रहणनिवृत्तये बिल इत्युक्तम् । अरणी सहैवाऽऽज्यस्थाल्या बिल एवानक्ति न धारयेति वक्तुं बिल इत्यधिकरणोपादानम् ।

आयुरसीति समवदधाति वृषणं दधाथामिति वा ।

अरणी एकत्र संनिधापयति । अरणी समवधायेति भरद्वाजः ।

अग्नये मथ्यमानायानुब्रूहीति संप्रे-
ष्यति मथ्यमानायानुब्रूहीति वा ।

गतम् ।

त्रिरनूक्तायां गायत्रं छन्दोऽनुप्रजायस्वेत्येतैस्त्रिः
प्रदक्षिणमारभ्य यथासुखमत ऊर्ध्वं मन्थति ।

एतैरिति मन्त्रत्रित्वे च क्रमेण प्रतिमन्त्रं प्रदक्षिणं प्रदक्षिणमारम्भं कृत्वा ततो यथासुखं प्रदक्षिणमप्रदक्षिणं च मन्थति । मन्त्रत्रित्वकरणानुषङ्गस्त्रैष्टुभं छन्दोऽनुप्रजायस्वेति प्रथमायां त्रिरनूक्तायाम् ।

जातायानुब्रूहीति ॥ ९ ॥ जाते संप्रे-
ष्यति प्रह्रियमाणायानुब्रूहीति प्रह्रियमाणे ।

गतम् ।

---

१ च ढ विश्वरू° । २ घ. ङ. ज झ ञ ड. °ले अन° ।

भवतं नः समनसावित्यग्रेगोत्त्रं परिधिसंधिं प्रहरति ।[1]

अथ न इत्यन्तः । मथितमग्निमुत्तरेणाग्निं प्राश्यति ।

अग्नावग्निरिति प्रहृत्य स्रुवेणाभिजुहोति ।

येजमित्यन्तः । दर्विहोमत्वेन जुहुयानौ तस्या अग्नावृतत्वेन वसाहोमहवनी समानार्था प्राप्ता । स्रुवेणेतीतरव्यवनिवृत्त्यर्थम् । आभिमन्थ्यमग्निं लक्षीकृत्य प्रविष्टोऽग्निर्देवता । अत्रानग्रहमाह भरद्वाजः—यदि मथ्यमानो न जायते तस्य स्थाने हिरण्यशकलं प्रहृत्याभिजुहोतीति ।

देवस्य त्वेति द्विगुणां द्विव्यायामां दार्भीं रशनामादाय तस्य रशनान्तेन दक्षिणं बाहुमुन्मार्ष्टि ।

दद इत्यन्तः । उन्मार्जनं तूष्णीम् । तस्य पशोर्दक्षिणं बाहुमित्यन्वयः ।

ऋतस्य त्वा देवहविः पाशेनाऽऽरभ इति दक्षिणे पूर्वपादेऽर्धशिरसि च प्रतिमुञ्चति ।

पाशेनेति मन्त्रलिङ्गाद्रशनया दक्षिणे बाहौ मध्ये कण्ठदक्षिणेऽर्धशिरसि शृङ्गयुक्तमेव पाशरशनैकदेशकृतं प्रतिमुञ्चति रशनापाशमासञ्जयति ।[2]

धर्षामानुषानिति पुरस्तात्प्रत्यञ्चमुदञ्चं वा यूपे नियुनक्ति ।

पशुं यूपस्य पुरस्तात्पूर्वभागे प्रत्यङ्मुखमुदङ्मुखं वा यूपे नियोजयति ।

अद्भ्यस्त्वौषधीभ्यः प्रोक्षामीति प्रोक्षति ।

पशुमिति शेषः ।

अपां पेरुरसीति पाययति ।

पशुमेवोदकं पाययति यदि पिबेत्तदा मन्त्रः ।

स्वात्तं चित्सदेवमित्यधस्तादुपोक्षति ।

स्वदितैनमित्यन्तः । पशोरधस्ताद्धस्तेनोर्ध्वमुदकं मुञ्चन्प्रोक्षति ।

सामिधेनीप्रभृतीनि कर्माणि प्रतिपद्यते ।

वेदं निधायेत्यादि प्राकृतपदार्थक्रमावसरार्थम् ।

आघारमाघार्य पशुं समनक्ति ।

द्वितीयाघारमाघार्यैव ध्रुवासमञ्जने प्राप्त आघारमाघार्य पशुमिति श्रुतेः पशुं समनक्ति ।

कथं तत्राऽऽह—

---

१ घ. ङ. ज. ञ. ढ. °रिधिं संधिना बाऽनुप्र । झ. °रिधिसंधिमनुप्र° । २ क. च. ट° °कण्ठे द° ।

सं ते प्राण इति दक्षिणेऽर्धशिरसि सं यजत्रैरङ्गा-
नीत्यंसमोच्चारे सं यज्ञपतिराशिषेति भसदि ।

समनक्ति जुह्वा शिरसोऽर्धमर्धशिरो दक्षिणं च तदर्धशिरश्चेति तत्र । गच्छतामित्यन्तः प्रथमस्यान्ययोस्तु गच्छतामिति बहुवचननिर्वाहणायेन मध्यमेऽन्त्ये तु गच्छतामित्यनुषङ्गो यज्ञपतिर्निर्वापस्याऽऽशिषं गमयत्विति वाक्यशेषात् । अंसोच्चारेंऽसयोः कोट्योस्तयोर्द्वित्वाद्द्विरिति मन्यन्ते । तत्रांसोच्चारशब्देन मन्त्रप्रदेशस्य ग्रहणादेकद्रव्यत्वम् । यत्रैकस्मिन्निति न्यायत्वा(यां)त्सकृदेव मन्त्रः । अंसोच्चार इत्येकवचनेन च तदेव ज्ञापितम् ।

ध्रुवासमञ्जनप्रभृतीनि कर्माणि प्रतिपद्यते ।

ध्रुवासमञ्जनादि प्राकृतं तद्वैकृतादनन्तरमिति क्रमः सर्वत्रैवेति ज्ञापितम् ।

प्रवरं प्रवृत्य ।

अत्र निरूढे प्राकृतमेव प्रवरप्रवरणं मैत्रावरुणस्यापि प्रवरं प्रवृ प्रेत्येवाविकृताभिधानात् ।

मैत्रावरुणाय दण्डं प्रयच्छति ।

अध्वर्युर्मैत्रावरुणाय दण्डं प्रयच्छति सोमे तु दण्डस्य यजमानः प्रदाता न निरूढे ।

अविक्षुरो विखुरो भूयासमिति प्रतिगृह्णाति ।

मैत्रावरुणः । याजुषे हौत्रे मन्त्रविधानं बाह्वृचे तदुक्तमेव मैत्रावरुणस्य होतृधर्मत्वात् ।

प्रयाजानूयाजेषु पशुपुरोडाशस्विष्टकृति वन-
स्पतौ पशुस्विष्टकृति च याज्यासंप्रैषस्य प्रैषाः ।

ये प्राप्ता इति शेषः । परिगणनया च प्रयाजादिपञ्चस्वेव ये प्राप्ता याज्यासंप्रैषस्य प्रैषाः ।

तत्राध्वर्युराश्राव्य प्रत्याश्राविते ऽमुष्मै प्रेष्येति
मैत्रावरुणं प्रेष्यति स होतारं चोदयति ।

परिगणनया पुरोडाशे वपायां पशौ चैतेषु प्रधानयागेषु प्राप्तोऽमुष्मै प्रेष्येति मैत्रावरुणं प्रति प्रैषः स परिसंख्यानात् एतेषु न कार्यः प्रयाजादिष्वेव पञ्चसु कार्य इत्यर्थः । अमुष्मा इत्येकवचनमविवक्षितं सामञ्जस्य इत्यादि यत्र यत्प्राप्तं द्विवचनं बहुवचनं वा तत्तत्र ज्ञेयम् ।

---

* एतद्व्याख्यानानुरोधेन सूत्रे दक्षिणार्धशिरसीति पाठो ज्ञेयः ।

---

१ क. ख. ग. ङ. ट. ठ. ण. °णं न मै । २ ङ. ञ. ठ. ण. °नाभावात् । ३ घ. ङ. ब. ढ. °डाशे स्वि° ।

समिद्ध्यः प्रेष्येति प्रथमं प्रयाजꣳ संप्रेष्यति प्रेष्य प्रेष्येत्युत्तरान् ।

प्रयाजानिति शेषः । मान्त्रवर्णिक्यो देवता वसन्तादिभिरविकृतैरनुमन्त्रणम् । ननु मन्त्रवर्णे समिधो देवता नावगम्यन्ते कथमत्र तन्निमित्तं समिद्ध्य इति । उच्यते— आप्रीसूक्तेषु क्वचित्समिद्धशब्दः क्वचित्समिच्छब्दोऽस्ति तावता नामधेयोपपत्तिः । अथवा समिधः प्रथमप्रयाजस्यायं विकार इति तथा नामधेयं बहुवचनान्तं देवतानिर्देशस्तु समित्समिदिति सूक्ते समिदित्येकवचनान्तेन प्रयोगेण, समिद्धो अद्येति सूक्ते समिद्धशब्देन पुंलिङ्गेन । एवमन्येषु सूक्तेषु ज्ञेयम् । समिद्ध्य इति बहुवचनं तु विरूपैरन्यैर्नामधेयैरेकशेषात् । प्रकृतौ समिधो यद्यपि बद्धास्तथाऽपि तत्र विरूपनामधेयैस्तनूनपादादिभिरेकशेषस्याभिमतत्वात् । यतः प्रथमेन स चातिदेशं मत्वा विना तनूनपादादिनाम्ना केवलं यजेति च प्रैषं विधत्ते देवान्यजेत्यनूयाजेषु देवशब्दे सरूप एक इति प्रकृतौ समिधो यजेति प्रथमे यज यजेतीतरेषु प्राप्तेषु प्रैषेषु तद्वदेते विहिताः समानकार्यकरत्वात्तद्बाध एतैः । अत एव कात्यायनः—प्रेष्येत्याह यजस्थान इति ।

चतुर्थे समानीयाष्टमे सर्वꣳ समानयते ।

यत्प्रकृतौ चतुर्थे समानयनमौपभृतस्योक्तं तदत्रार्धं चतुर्थेऽवशिष्टं सर्वमष्टम उत्पत्तावेव या संख्या श्रूयते पञ्च प्रयाजान्यजतीति न सङ्ख्यागुणयुक्तेषु प्राकृतेषु यत्रान्यसंख्याविधानं विकृतौ नव प्रयाजानेकादश प्रयाजानिति तत्र प्राकृतबाधेनापि तु प्राकृताभ्यासेनैवेति न्यायमतं दर्शयितुमुक्तमष्टमे सर्वमिति वैकृतस्याभ्यस्तस्याष्टमस्यापि चतुर्थत्वमिति भावः । सर्वमित्यनूयाजार्थमवशेषाभावात् । आचार्यस्तु चतुर्थस्योपान्त्यस्याभ्यासमष्टमपर्यन्तं मन्यतेऽन्त्यस्याभ्यासेन नवमदशमैकादशान् । तद्याजमाने स्पष्टं भविष्यति । तथा च यथाप्रकृति चतुर इष्ट्वोत्तरत एव चान्यानपि चतुरस्ततश्चोन्मध्ये यजति ।

दशमैकादशायाऽऽज्यमवशिष्य ।

स्पष्टम् ।

घृतेनाक्ताविति जुह्वा स्वरुस्वधिती अनक्ति ।

अत्र द्विवचनमुपरवबहुवचनवद्व्याख्येयमेकैकत्र तस्यानुपपत्तेर्नच द्वयोः सहैवाञ्जनं द्रव्यपृथक्त्वाद्द्विः सकृदिति धर्मविशेषेणाऽऽवृत्तिदर्शनाच्च ।

द्विः स्वरुं सकृत्स्वधितेरन्यतरां धाराम् ।

सकृन्मन्त्रस्तूष्णीं सकृत्स्वधितेरेकामेव धारामनक्तीत्यनुकृष्यते । तत्रापि मन्त्रः स्वरुस्वधिती अनक्तीति यदुक्तं तदेव प्रपञ्चितं न पृथगनेन विधानमेकवाक्यमेकक्रियात्वम् ।

घृतेनाक्तौ पशुं त्रायेथामिति ताभ्यां पशुꣳ समनक्ति ।

सर्वमन्त्रपाठः पूर्वस्य तावन्मात्रत्वख्यापनार्थोऽन्यथोभयत्रापि प्रतीकोपादानेन पूर्णो मन्त्रः स्यात्पूर्वस्तु शाखान्तरीयस्तावानेव ताभ्यां प्रकृतस्वरुस्वधितिभ्याम् ।

शमितरेषा तेऽग्निः प्रज्ञाताऽसदित्यक्तां धारामादिशञ्छमित्रे स्वधितिं प्रयच्छति ।

त्वया प्रज्ञाताऽक्ता धाराऽस्तु विशसनार्थमनयैव विशाधि नान्ययेत्यर्थः ।

यथास्थानꣳ स्वरुमवगुह्य[1] ॥ १० ॥

यस्मिन्गुणे पूर्वं स्थितस्तत्रैव नान्यत्र ।

पर्यग्नये क्रियमाणायानुब्रूहीति संप्रेष्यति पर्यग्नयेऽनुब्रूहीति वा ।

स्पष्टम् ।

आहवनीयादुल्मुकमादायाऽऽग्नीध्रः परिवाजपतिरिति पश्च पर्यग्नि करोति पशुꣳ शामित्रदेशं चात्वालं यूपमाहवनीयं च त्रिः परिद्रवति ।

पर्यग्निकरणं व्याख्यातमत्र विशेषः परिवाजपतिरिति मन्त्रः तस्य समन्ताद्द्रवन्नुल्मुकेन स प्रदक्षिणं परितो गच्छन्पश्च द्रव्याणि पश्वादीनि प्रत्येकं सकृन्मन्त्रेण द्विस्तूष्णीं पर्यग्नि करोति । द्रव्यप्राधान्यात्त्रिरिति प्रत्येकमभ्यासः । अत्रोल्मुकेन सह परितो द्रवणमेव पर्यग्निकरणम् । तेन द्रवणमपि त्रिस्त्रिरेकैकस्यैव । तथैवोक्तं कात्यायनेन—उल्मुकमादायाग्नीत्रिः समन्तं पर्येति । न च सर्वेषामेकवारं परिद्रवणमिति वाच्यं, द्रव्यपृथक्त्वादावृत्तिरेव पश्वादिक्रमानुपपत्तेश्च ।

आज्यानि चेत्येकेषाम् ।

षष्ठमाज्यान्यपि तथैव पर्यग्नि करोतीत्येकेषां शाखिनामस्माकं विकल्पः ।

ये बध्यमानमनुबध्यमाना इति पर्यग्नौ क्रियमाणे त्रीण्यपाव्यानि जुहोति ।

पर्यग्निलक्षणे कर्मणि क्रियमाण आग्नीध्रेणाध्वर्युरपाव्यनामकान्होमानपूर्वत्वादाज्यस्थाल्याज्येन त्रिर्गृहीतेनात्र न समिदाधानं सामिधेनीसमिद्भिः प्रसङ्गसिद्धेरन्यो दर्विहोमधर्मोऽस्त्येव ।

आहवनीय उल्मुकं निधाय त्रिः पुनः प्रतिपर्येति ।

उल्मुकेन विना प्रतीपमप्रदक्षिणं यथाक्रमं प्रत्येकं त्रिस्त्रिः पर्येति ।

---

१ क. ख. ग. घ. ङ. च. छ. ज. झ. ञ. ट. ठ. वगुह्य ।

प्रमुच्य पशुमाश्राव्य प्रत्याश्राविते उपप्रेष्य होतर्हव्या देवेभ्य इति संप्रेष्यति ।

होतारमिति शेषः । तस्यैव प्रेषितार्थकर्तृत्वार्थमिह ।

अध्रिगुꣳ होता प्रतिपद्यते ।

अध्रिगुसंज्ञकं निगदम् ।

रेवतीर्यज्ञपतिं प्रियधाऽऽविशतेति[1] बर्हिर्भ्यां वपाश्रपणीभ्यां प्लक्षशाखया च पशुमन्वारभेते यजमानोऽध्वर्युश्च ।

त्रितयेनोभाभ्यां गृहीतेनान्वारभेते स्पृशतः ।

नानाप्राण इत्यध्वर्युर्यजमानमभिमन्त्रयते ।

कामा इत्यन्तः । स्पष्टम् ।

प्रास्मा अग्निं भरतेत्युच्यमाने तदेवोल्मुकमादायाऽऽग्नीध्रः पूर्वः प्रतिपद्यते ।

पशोः पुरतो गच्छति यत्पूर्वं पर्यग्निकरणार्थं गृहीत्वा स्थापितं तदेवाऽऽदाय ।

उरो अन्तरिक्षेत्यन्तरेण चात्वालोत्करावुदञ्चो निष्क्रामन्ति ।

निष्क्रामन्तीति बहुवचनादाग्नीध्रोऽध्वर्युर्यजमानश्च । पशुना सहेत्यर्थः । शमितैनं कण्ठे बद्ध्वा नयतीति वाजसनेयिश्रुतेस्तथा कार्यं चात्वालोत्करयोर्मध्येन निर्गच्छन्ति ।

उत्तरेण चात्वालꣳ शामित्रदेशस्तस्मिन्नुल्मुकं निधायोत्तरेण शामित्रमतिक्रामति ।

आग्नीध्र एव ।

उदीचीनाꣳ अस्य पदो निधत्तादित्युच्यमाने समस्य तनुवा भवेत्युपाकरणयोर्बर्हिषोरन्यतरत्प्रागग्रमुदगग्रं वा न्यस्यति तस्मिन्नेनं प्रत्यक्शिरसमुदीचीनपादं निघ्नन्त्यमायुं कृण्वन्तं संज्ञपयतोच्छङ्क्यं प्रब्रूतादित्युक्त्वा ।

पाहीत्यन्तः । बर्हिर्न्यसनं शामित्रस्य पश्चादिति कात्यायनः । तस्मिन्बर्हिषि निपात्य घ्नन्ति शमितारः । संगृह्य मुखं नमयन्त्यवाश्यमानमिति कात्यायनः । नमयन्ति श्वासवि(नि)रोधेन । अध्वर्युरमायुमशब्दं कुर्वन्तं शब्दमकुर्वन्तं तदेवावाश्यमानमरोरूयमाणमिति संज्ञपयतात्प्राणैर्वियोजय शङ्क्यं प्रब्रूहीत्युक्त्वा ।

पराङावर्तते यजमानोऽध्वर्युश्च नानाप्राण इत्यध्वर्युर्यजमानमभिमन्त्रयते ।

पराङ्पशुपृष्ठतः परावृत्तौ येन निर्गतौ तेन विहारमागच्छतः । गतार्थमन्यत् ।

---

१ घ. ङ. ज. झ. ञ. ढ. °ति वपाश्रपणीभ्यां बर्हिर्भ्यां प्ल°। २ क. ख. ड. च. छ. ट °ताशक्यं प्र° । झ. ड. °ताशक्यं प्र । ३ क ख च. छ. ट. ण शक्यं । ४ ज ख. च. छ. .. पशुपृ° ।

इह पशवो विश्वरूपा रमन्तामग्ने कुलायममि संवसानाः। अस्मान्प्रवन्तु पयसा घृतेन। यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च। ता नः पयस्वतीः सन्त्वस्मिन्गोष्ठ ऋतावृध इति पृषदाज्यमवेक्षमाणौ वाग्यतावासाते यजमानोऽध्वर्युश्च।

पृषदाज्यं स्थालीगतम्। अत्र याजमानं स्वर्विदसि स्वर्विदस्येत्यादि। स्पष्टमन्यत्।

इन्द्रस्य भागः सुविते दधातनेमं यज्ञं यजमानं च सूरौ। यो नो द्वेष्ट्यनु तꣳ रभस्वानागसो यजमानस्य वीरा इत्यध्वर्युः पशुमभिमन्त्रयते यदि रौति॥ ११॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्थप्रश्ने तृतीयः पटलः॥ ३॥

रौति संज्ञप्यमानः शब्दं करोति। नैमित्तिको मन्त्रः।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां चतुर्थप्रश्ने तृतीयः पटलः॥ ३॥

अथ चतुर्थप्रश्ने चतुर्थः पटलः।

यत्पशुर्मायुमकृतेति संज्ञप्ते जुहोति।

पशौ संज्ञप्ते गतासौ सति। स्वाहेत्यन्तः।

शमितार उपेतनेति संज्ञप्तमुपायन्ति।

बहुवचनात्सर्वेऽप्यृत्विजो यजमानश्चोप पशुसंज्ञ[१]नमागच्छन्ति। परीत्यन्तः।

अदितिः पाशं प्रमुमोक्त्वेतमिति पशोः पाशं प्रमुच्यैकशूलयोपसज्य चात्वालेऽवदधाति।

करोमीत्यन्तः। कण्ठे यया पशुर्बद्धः पाशेन तं पाशं निःसार्य तां रशनामेकशूलया वपाश्रपण्योपसृज्य गृहीत्वा चात्वालेऽवदधाति तूष्णीं निदधाति विमोचने मन्त्रो लिङ्गात्।

अभिचरतोऽरातीयन्तमधरं कृणोमीति शुष्के स्थाणौ दर्भस्तम्बे वाऽभिनिदधाति।

पाशमित्यन्तः। मन्त्रेण निदधाति। दर्भस्तम्बेऽपि शुष्क एव। वैरिणो मरणं कामयमानस्य यजमानस्य।

---

१ क. ख. ग. च. छ. ज. झ. ञ. ट. ड. ण. °वेक्ष्यन्तौ°। २ ख. ग. छ. ण. °ज्ञमना°।

नमस्त आतानेति पत्न्यादित्यमुपतिष्ठते ।

पश्चाल्लोका वा एषा प्राच्युदानीयत इत्युक्तं प्रागानयनमित्युक्तं यस्याः पश्चादेव स्थानं सा प्राची प्राङ्मुख्यादित्याभिमुखी कथमुदानीयतेऽतोऽघनयोपद्यतस्तमना(?)-याऽऽदित्यरश्मीन्नमस्कुर्यादितिवाक्योर्थावगतेरर्थवादेनोदानयनाङ्गता प्रतीयत उपस्थानस्येति प्रतिपत्तिन संस्काराङ्गत्वादावर्तते ।

अनर्वा मेहीति प्रतिप्रस्थाता पूर्णपात्रं धारयमाणां पत्नीमुदानयति ।

उदकपूर्णपात्रं गृहीत्वाऽऽसीना पत्नीमुत्थाप्याऽऽनयति चात्वालं प्रति मन्त्रेण । पोषेणेत्यन्तः । द्वितीयादिनिर्दिष्टपत्नीसंस्कारोऽयं प्रतिपत्त्यावर्तते । पूर्णपात्रधारणमेकस्या एवाऽऽप्यायनार्थत्वात् ।

आपो देवीरिति चात्वालेऽपोऽवनयति ।

पूर्णपात्रगता अपो मन्त्रेण किंचिन्निक्षिपति । द्वितीयानिर्दिष्टा आपः संस्कार्या एव । भूयास्मेत्यन्तः । शुद्धा वयमिति संस्कारत्वावगतिमन्त्रलिङ्गादतः प्रतिपत्तिन ।

प्रतिषिद्धमेकेषाम् ।

अपामवनयनं विहितप्रतिषिद्धत्वाद्विकल्पते ।

एतेनैव सर्वे समुत्क्रम्य चात्वाले मार्जयन्ते ।

एतेन मन्त्रेण चात्वालप्रदेशे स्थित्वा मार्जयन्ते । एवकारेण सर्वो मन्त्रो मार्जन आप्यायनसमुत्क्रमणे च विनियुक्तः । भरद्वाजेनोद्द्वमित्यन्तः समुत्क्रमणे शुद्धा वयमित्यादिर्मार्जन उक्तस्तन्मा भूदिति तथोक्तं नो चेदानर्थक्यमेवकारस्य । एतेनैव सर्वेण सह समुत्क्रम्यैतेनैव मार्जयन्त इत्यन्वये सत्येवैवकारः सार्थकः । संभूय संज्ञप्तपशोः सकाशादुत्क्रम्य निर्गत्य चात्वालमागत्य मार्जयन्ते सपत्नीका इति भरद्वाजः ।

अध्वर्युराभिषिञ्चति पत्न्याप्याययति पत्न्यभिषिञ्चत्यध्वर्युराप्याययतीत्येकेषाम् ।

तत्तत्स्थानमभिलक्षयित्वाऽ(क्ष्या)पः प्रक्षिपति । प्रक्षिप्तोदकस्यानाभिमर्शनमाप्यायनम् । *तं परार्थान्येकेन क्रियेरन्निति मुख्यैवाभिषेचनमाप्यायनं करोति ।

वाक्त आप्यायतामित्येतैर्यथारूपम् ।

अभिषेचनं तूष्णीमाप्यायनं मन्त्रेण । यथा यस्य मन्त्रस्य रूपमर्थात्स मन्त्रस्तस्यार्थस्याऽऽप्यायने विनियोक्तव्यः । तत्र चत्वारि स्पष्टानि । या त इति हृदयदेशमित्याप-स्तम्बो ग्रीवामिति भरद्वाजः । यत्ते क्रूरमिति भिन्नमन्त्रेणाङ्गानीति भरद्वाजकात्यायनौ ।

* तमिति सर्वपुस्तकेषु विद्यते परं तु असंबद्धत्वात्प्रामादिकमिति ज्ञेयम् ।

१ ठ. ण. °स्तन्मना° । २ क न. ट. °क्यार्थ° । ३ घ. ङ. ज. ञ. म. ढ. °माणामु° ।

या श्रोत्रमित्यस्य पृथङ्मन्त्रत्वपक्षे तु तत्त आप्यायतामित्यादिकोऽनुषङ्ग उत्तरस्मादप्यनुषङ्गो न्यायविद्भिरुक्तः ।

नाभिस्त आप्यायतामिति नाभिं मेढ्रं त आप्यायतामिति मेढ्रं पायुस्त आप्यायतामिति पायुꣳ शुद्धाश्चरित्रा इति संनिधाय पादान्छमद्योभ्यामित्यनुपृष्ठꣳ शेषं निनयति ।

आप्यायतामित्यनुषङ्गः । शाखान्तरीयमन्त्रस्य मेढ्रमित्यस्य मध्ये संनिवेशार्थं नाभिः पायुरिति पूर्वोत्तरयोः प्रदर्शनम् । मेढ्रं मेहनं प्रजननं शिश्नमिति यावत् । पायुर्गुदः(दम्) । शुद्धाश्चरित्रा इति शं पृथिव्या इत्यन्तेन संनिधाय पादान्सकृदेवाऽऽप्याययति । अनुपृष्ठ पृष्ठदैर्घ्येणाभिषेचनीयानामपां शेषं प्राक्संस्थमेव निनयति सति शेषेऽन्यथा लोपः । निनयत्यध्वर्युरभिषेक्त्री पत्नी वा । शेषनिनयनं पृथिव्यामेव पृथिव्यै शुचꣳ शमयतीति वाक्यशेषात् ।

उत्तानं पशुमावृत्यौषधे त्रायस्वैनमित्युपाकरणयोर्बर्हिषोरवशिष्टं दक्षिणेन नाभिं द्व्यङ्गुले त्र्यङ्गुले चतुरङ्गुले वा वपादेशे निदधाति ।

स्पष्टम् । उपाकरणार्थं ये गृहीते बर्हिषी तयोरेकं पशूपाकरणदेशे न्यस्तमवशिष्टमत्र स्पष्टमन्यत् ।

स्वधिते मैनꣳ हिꣳसीरिति स्वधितिना तिर्यगाच्छिनत्ति ।

प्रागग्रमेव बर्हिर्निहितं तदुपरि स्वधितेर्धारयाऽक्तया तिर्यग्दक्षिणोत्तरमाकर्षन्ननुप्रहरन्प्रहारेण वपादेशे छिनत्ति दीर्घच्छेदं करोति यथा वपादेशे वपा लभ्यते तावदाच्छिनत्ति ।

छिन्नस्य तृणस्याग्रं पाणौ कृत्वा स्थविमल्लोहितेऽङ्क्त्वा[1] रक्षसां भागोऽसीत्युत्तरापरमवान्तरदेशं निरस्याप उपस्पृश्य ।

छिन्नस्य बर्हिषोऽग्रभागं वामे पाणाविति कात्यायनादयः । कृत्वा स्थापयित्वा स्थूलं मूलभागमाच्छेदनप्रदेशे लोहितेऽङ्क्त्वा । उभयतोऽङ्क्त्वेति कात्यायनः । मेनमधमं तमो नयामीत्यन्तेन मन्त्रेण निरस्यत्युत्तरापरं वायव्यकोणं दिङ्मात्रस्याधिकरणता मा भूदपि तु स्थलस्येति वक्तुमवान्तरदेशमित्युक्तं स्थल एव नान्तरिक्षे निरस्यतीत्यर्थः । राक्षसत्वादुदकोपस्पर्शनम् ।

---

१ घ. ङ ज. झ. ञ. ठः ढ 'तेनाङ्क्त्वा ।

इषे त्वेति वपामुत्खिदत्यूर्जे त्वेति तस्मिंश्चैकशूलयोपतृणत्ति ।

उत्खिदति लग्नां पृथक्करोति न तु सर्वां बहिः करोति । तत्रैकशूलया वपाश्रपण्यो-पतृणत्ति संश्लेषयति वपैकदेशमेव ।

देवेभ्यः शुन्धस्वेत्यद्भिः प्रोक्षति देवेभ्यः शुम्भस्वेति स्वधितिना वपां निमार्ष्टि ।

नीचैर्मार्ष्टि । स्पष्टम् ।

घृतेन द्यावापृथिवी प्रोर्णुवाथामिति द्विशूलामेकशूलां च प्रच्छादयति ।

वपाश्रपण्यौ द्वे अप्याच्छादयति ।

इन्द्राग्निभ्यां त्वा जुष्टामुत्कृन्तामीत्युत्कृन्त-स्याच्छिन्नो रायः सुवीर इति वा ।

पशोः सकाशात्पृथक्करोति ।

मुष्टिना शमिता वपोद्धरणमभिगृह्याऽऽस्त आवपाहोमात् ।

वपोद्ग्रहणं यस्माद्देशाद्वपोद्गृहीता निर्गमिता तद्विदारितं स्थानमस्युपरि मुष्टि-नाऽऽच्छाद्याऽऽस्ते यावद्वपाहोमः स्यात् ।

प्रत्युष्टमिति शामित्रे वपां प्रतितपति ।

शामित्राग्नौ । अरातय इत्यन्तः ।

नमः सूर्यस्य संदृशे गुणोथा इत्यादित्यमुपतिष्ठते ।

गतम् ।

श्रपणार्थमग्निमवशिष्य तदेवोल्मुक-मादायाऽऽग्नीध्रः पूर्वः प्रतिपद्यते ।

शामित्रदेशेऽग्निशेषमुल्मुकात्पाकार्थं स्थापयित्वा यदेवोल्मुकं पूर्वमानीतमेव गृही-त्वाऽऽग्नीध्र आहवनीयं प्रत्यागच्छत्यध्वर्योः पूर्वः पुरतो गच्छति ।

उर्वन्तरिक्षमिति गच्छति ।

अध्वर्युः । अन्विहीति मन्त्रान्तः । आहवनीयं प्रति ।

वपाश्रपणी पुनरन्वारभेते यजमानोऽध्वर्युश्च ॥ १२ ॥

यजमानग्रहणं प्रकृताग्नीध्रनिवृत्त्यर्थम् । ननु(नु) पुनःशब्दादालम्भकर्त्रोरेव प्रवृत्तिः स्यात्ततो द्वयोरपि ग्रहणं न कर्तव्यम् । सत्यम् । भरद्वाजेनोक्तं यजमानोऽन्वारभत

---

१ क. ख. च. छ. ट. वपया श्र° । २ घ. ङ. ज. झ. ञ. ठ. ड. °पोद्धरण° । ३ ग. ठ. ण. °पोद्धरणं । ४ घ. ङ. ज. झ. ञ. ठ. ड. ° न्त इ° ।

इति तस्मा भूदिति द्वयोर्ग्रहणम् । अध्वर्युर्वपां गृहीत्वा गच्छन्वपाश्रपण्योरन्वारम्भं करोत्येवेति यजमानश्चेत्येतावदेव वक्तव्यम् । न । अध्वर्योर्वपालम्भमात्रं मा भूदपि तु वपाश्रपण्योरेवोभयोरारम्भ इति ।

उरु त्वाऽग्ने दिवे दिव इति तिसृभिराहवनीयमुपायन्ति ।

राजन्यमध्वराणां स नः पितेवेति द्वे अन्ये ऋचौ । तिसृभिरेताभिराहवनीयसमीपमागच्छन्ति । प्रकृता यजमानाध्वर्य्वाग्नीध्राः ।

उपसृष्ट उल्मुके प्रत्युष्टमित्याहवनीयस्यान्तिमेऽङ्गारे वपां निगृह्णाति ।

आग्नीध्रेणाऽऽहवनीय उपसृष्टे मलिते तस्मिन्नुल्मुके सत्यध्वर्युः प्रत्युष्टमिति समग्रेण मन्त्रेणान्तिमे यतोऽन्योऽङ्गारो बहिर्नास्ति तस्मिन्नङ्गारे निगूढे वपां निगृह्णाति नियच्छत्युत्तरत एव ।

वायो वीहि स्तोकानामिति बर्हिषोऽग्रं
प्रास्यत्यधस्ताद्वपाया उपास्यतीत्येकेषाम् ।

छिन्नस्य बर्हिषो वामपाणौ स्थितं यदग्रं तदाहवनीय एव न चेदानीमेवं वपाया अधस्तादाहवनीयेऽस्ति निग्रहणे कृते न पुनरुपर्येव वपास्त(?)माहवनीये । ए[के]षामस्माकमेव शाखिनामस्ति हि वायो वीहि स्तोकानामित्याह तस्माद्विभक्ताः स्तोका अवपद्यन्तेऽग्रं वा एतत्पशूनां यद्वपाग्रमोषधीनां बर्हिरग्रेणैवाग्रꣳ समर्धयत्यथो ओषधीष्वेव पशून्प्रतिष्ठापयतीति ब्राह्मणमतो वपायाः श्रप्यमाणाया अनुद्रुतस्तोकाया एवाधस्तादिति युक्तमुत्पश्यामः । स्पष्टमिदमेवोक्तं भरद्वाजेन—प्रतिप्रस्थाता श्रपयत्याहवनीये वपामधस्ताद्वपाया बर्हिषोऽग्रं प्रास्यतीति ।

अन्तरा यूपमाहवनीयं च प्रतिप्रस्थात्रे वपां प्रयच्छति ।

यूपाहवनीययोर्मध्यतः कृत्वा दक्षिणतः स्थिताय प्रतिप्रस्थात्रे ददाति ।

दक्षिणत उदङ्ङासीनः प्रतिप्रस्थाता वपाꣳ श्रपयति ।

उदङ्मुख उत्तरवेद्या दक्षिणत आसीनो वपां शृतां करोति । अत्र बर्हिरग्रस्य वपाया अधस्तान्निरसनम् ।

त्वामु ते दधिरे हव्यवाहमिति वपामभिजुहोति ।

जुह्वा व्यापृतत्वात्स्रुवेण, अभि वपायामेव जुहोत्याज्यस्थाल्याज्येनाध्वर्युरेव । सुपक्वेत्यन्तः ।

---

१ ख. क. अ. ञ. म. ड अपिदृष्ट । २ ग ठ. °नुद्भुत° । ३ ग. ठ. ण. °ति प्रस्थात्रे वपां प्रदद्या° ।

प्रादुर्भूतेषु स्तोकेषु स्तोकेभ्योऽनुब्रूहीति संप्रेष्यति ।

स्तोका वपायां श्रप्यमाणायां मध्ये मध्ये बुद्बुदा इवोन्नता येऽवयवास्ते तेषु प्रकटेषु सत्स्वेव प्रेष्यति मैत्रावरुणम् ।

श्येनीꣳ सुशृतां कृत्वा सुपिप्पला ओषधीः कृधीति दक्षिणस्यां वेदिश्रोण्यां प्लक्षशाखायां निदधाति ।

अत्र सुशृतां कृत्वा निदधातीति समानकर्तृ[क]त्वावगतेः पाके च प्रतिप्रस्थातुः कर्तृत्वान्निधानमपि तेनैवेति भाति, तथाऽप्यग्निहोमप्रभृतिसमाख्ययाऽध्वर्योरेव कर्तृत्वादत्र क्त्वाप्रत्ययेन पूर्वकालत्वमात्रमुक्तमिति गम्यतेऽथवा श्येनीं सुशृतामध्वर्युरेव कृत्वेति ज्ञेयम् । श्येनी श्वेता श्वेता पूर्वमेवास्ति तस्य वर्णस्यानपगमे सत्येव सुशृतां कृत्वा । अत्र सांनाय्यवदभिघार्योत्तरत उद्वास्य यूपाहवनीयान्तरा नीत्वा सुपिप्पला इति बर्हिष्येव प्लक्षशाखायां महावेदिदक्षिणश्रोण्यामास्तीर्णायां निदधाति । तदुक्तं भरद्वाजेन—सानाय्यवदभिघार्य तथोद्वास्य बर्हिषि प्लक्षशाखायां प्रतिष्ठापयतीति । सांनाय्यस्य कुम्भ्या सहोद्वासनमत्र वपाश्रपणीभ्यां सहैवोद्वास्य सहैव निदधाति ।

प्रयुता द्वेषाꣳसीति वपाश्रपणीं प्रवृहति ।

निधानानन्तरं वपाश्रपणी वपयाऽऽच्छादिते प्रवृहति वपातो निर्गमयति । यस्त आत्मा, इयमिन्द्रियम्, अनयेन्द्राय तया देवा वपामयीत्यूह इति केचिदन्ये तन्नेच्छन्ति । हविष्ट्वेन मनस्त्वेन वा नपुंसकत्वैकवचनत्वोपपत्तेरविकृतो मन्त्रो वपा मयि श्रयतामित्येव विकृतमिति । याजमानमयं यज्ञः पञ्चहोता ।

स्रुचौ होताऽऽदापयति घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युच्यमाने जुहूपभृतावादायात्याक्रम्याऽऽश्राव्य प्रत्याश्राविते स्वाहाकृतीभ्यः प्रेष्येति संप्रेष्यति वषट्कृते हुत्वा प्रत्याक्रम्य प्रयाजशेषेण पृषदाज्यमभिघार्य वपामभिघारयति [द्विर्वपाꣳ सकृत्पृषदाज्यम्] ।

चोदकप्राप्तपदार्थाः प्रयाजेभ्यः पूर्वं कर्तव्यास्तेषामुत्कृष्टानामत्र कर्तव्यत्वेनानुस्मरणं स्वाहाकृतीभ्यः प्रेष्येत्येतस्मात्पूर्वविधानार्थं प्रकृता(त)प्रयाजशेषेण पृषदाज्यमभिघार्य वपामभिघारयतीत्यस्य विधानार्थं पृषदाज्यं स्थालीगतं वनस्पतियागोपयोक्ष्यमाणं न स्रुग्गतं नोपभृतमन्तत इति भरद्वाजः । तेन परिसंख्येयं वपामेवेति पृषदाज्यमभिघार्य वपामभिघारयतीति श्रुतेः पौर्वापर्यं प्रतूपयोगक्रमेण ।

---

१ ठ. इदमि ।

ध्रुवां वा प्रथमं यद्याज्यभागौ यक्ष्य-
न्भवति कृताकृतावाज्यभागौ ।

कृताकृतौ विकल्पितौ । यदि तौ यक्ष्यन्स्यात्तदैव प्रथमं ध्रुवामपि नान्यदा । अत्रैव तयोर्योगः ।

व्याख्याते पञ्चहोतारि—

जुह्वामुपस्तीर्य हिरण्यशकलमवधाय कृत्स्नां वपामव-
द्यत्युपरिष्टाद्धिरण्यशकलमवधायाभिधार्येन्द्राग्निभ्यां[1]
छागस्य वपाया मेदसोऽनुब्रूहीति संप्रेष्यति ।

मध्ये शकलविधानाद्यर्थमातिदेशिकपदार्थानुवादः । द्विस्त्रिरवदानबाधाय कृत्स्ना-मित्युक्तं, मा भेरित्युक्त्वा सकृत्सर्वामवदाय । स्पष्टमन्यत् । उत्तरत एव स्थित एत-त्सर्वं कुर्यात् । वपावदानार्थं वेदिं प्रविश्य वपाया उत्तरतः स्थित्वाऽवद्येन्नत्वग्रेणाऽऽ-हवनीयं गत्वा दक्षिणतः स्थितः । एवं हविषामवदानेष्वपि द्रष्टव्यम् ।

अत्याक्रम्य—

आश्राव्य न प्रेष्यति मैत्रावरुणो होतारं चोदयति ।

पूर्वोक्तपरिसंख्यातमेव स्मारयति । न प्रेष्यतीति मैत्रावरुणमिति शेषः । प्रेष्येति न प्रैषोऽत्रेत्यर्थः । अप्रेषित एव मैत्रावरुणो होतारं निगदेन चोदयति प्रेरयति ।

पुरस्ताद्वपाया होमात्स्वाहा देवे-
भ्य इति पूर्वं परिवप्यं जुहोति ।

क्रमप्राप्ते पुरस्ताद्वपाया होमादिति वचनमव्यवधानख्यापनार्थं, वपायागार्थमाश्रा-वणादि कृत्वा पूर्वं वप्यसंज्ञकहोमं स्थाल्याज्येन हवन्या न स्रुवेण जुहोति । आप-स्तम्बमते तु वपावदानात्पूर्वमेव पूर्वपरिवप्यहोमो जुहैव तन्मा भूदित्येतदर्थं पुरस्तादि-त्यादिवचनं, स्रुचावन्यस्य हस्ते दत्त्वाऽग्रेणाऽऽहवनीयं गत्वा वसाहोमहवन्यामाज्य-मादाय यथेतं प्रत्येत्य दर्विहोमधर्मेण हुत्वा स्रुचावादाय पुरस्तात्स्वाहाकारा वा अन्ये देवा इति श्रुतेर्न पुनरन्ते स्वाहाकारः स्वाहादेवतापदाव्यवधान[2] एव हौत्रेऽपि दर्शनात्स्वाहा वाचे स्वाहा वाचस्पतय इत्यादौ पदान्तरव्यवधाने तु स्यादन्तेऽपि स्वाहा[3] स्वाहा त्वा सुभवः सूर्यायेत्यादौ । तत्रापि लिङ्गं स्वाहाऽऽधिमाधीतायस्वाहा[4]दि । अमुमर्थं सूत्रकार एव वसाहोमे स्पष्टयिष्यति ।

जातवेदो वपया गच्छ देवानिति वषट्कृते वपां देवेभ्यः स्वाहेत्युत्तरम् ।

जुहोतीत्यनुवर्तते । देवा इति मन्त्रान्तेन वषट्कारे कृते सति वपां प्रक्षिपति । न

१ क. ख. ग. च. छ. ट. ठ. ण. °धायेन्द्रा° । २ ग. ठ. ण. °पदव्य° । ३ ग. ठ. ण. न । ४ क. च. ट. °हा स्वा ।

चात्र स्वाहाकारो दानार्थस्तस्येन्द्राग्निभ्यामेव वषट्कारेण दत्तत्वादन्यदेवताभ्यो न स्वाहाकारेण पुनर्दानम् । अतोऽयं न दर्विहोमो जुहोतिचोदितोऽपि यद्येकया जुहुयादिति याज्यापुरोनुवाक्याभ्यां कृते तु न दर्विहोमत्वम् । तथा यत्प्रयाजानूयाजान्कुर्यादिष्टिकस्तिः सा यज्ञस्य, दर्विहोमं करोतीत्यत्रापि प्रयाजादिरहिते होमे दर्विहोमत्वमुक्तं तत्तु न सप्रयाजादिके प्राप्नोतीति न स्वाहाकारप्राप्तिः । अत्र वषट्कृत जुहोतीत्यतिदेशप्राप्तानुवादस्तेन वषट्कारे प्रक्षेपस्तु नियतस्त ॥ मन्त्रान्तरसंनिपातश्च तच्चोभयं सह प्रायिकं न नियमेन भवति । तत्र वषट्कारे प्रक्षेपाकरणे प्रायश्चित्तविधानादवश्यं प्रक्षेपः । मन्त्रस्य तु पूर्वमेव समाप्तौ पुनरारम्भणीयः कृतेऽपि प्रक्षेपे समापनीयः । तथापि(हि)—यद्यपि मन्त्रान्तेन संनिपातो न स्यात्तथाऽपि मन्त्रसंनिपातमात्रं तु सर्वथा साधनीयमेव न ह्यशक्य विधिना विधीयतेऽतोऽत्र मन्त्रसंनिपातमात्रमप्युत्पन्नैरुक्तमनुज्ञातमिति गम्यते । तदुक्तं कात्यायनेनानियमं वात्र । इति । सर्वप्रायश्चित्तं च कार्यम् । मन्त्रासंनिपाते तु न प्रायश्चित्तम् । उत्तरं परिवर्त्य जुहोतीत्यनुकृष्यते । जुह्वा स्थाल्या-ज्येन पूर्ववप्यवत् ।

प्रत्याक्रम्य स्वाहोर्ध्वनभसं मारुतं गच्छतमिति विषूची वपाश्रपणी प्रहरति प्राचीं द्विशूलां प्रतीचीमेकशूलाम् ।

विषूच्यौ चानुलोमप्रतिलोमाग्रे तत्र नियमार्थं प्रागग्रा द्विशूलामिति ।

सꣳस्रावेणाभिहुत्य ।

वपाश्रपण्यावाहवनीयप्रहृते अभिसंस्रावेण जुहोति ।

चात्वाले मार्जयन्ते ॥ ११ ॥

सपत्नीकाः सर्वेऽपीत्यर्थः ।

मार्जने मन्त्रानाह—

आपो हि ष्ठा मयोभुव इति तिसृभिरिदमापः प्रवहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम्[1] । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः । निर्मा मुञ्चामि शपथान्निर्मा वरुणादुत । निर्मा यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषादतो मनुष्यकिल्बिषादिति मार्जयित्वा ।

सर्वमन्त्रान्तेन मार्जनम् ।

पशुपुरोडाशस्य पात्रसꣳसादनप्रभृतीनि कर्माणि प्रतिपद्यते[2] यथार्थमौषधपात्राणि प्रयुनक्त्येकादश

१ ख. ग. घ. ङ. च. ज. झ. ञ. ठ ढ ण. 'म् । आपो मा त' । २ च. ङ. ज. झ. ञ. ठ. ड. 'थमोषधिपा॰' ।

द्वादश वा कपालानि तैः सह शूर्पं कृष्णाजिनꣳ
शम्यामुलूखलं मुसलं दृषदमुपलां कुटरुं पात्रीं मेक्षणं
वेदं प्राशित्रहरणं प्रणीताप्रणयनमिडापात्रं च ।

पशोरङ्गभूतः पुरोडाशः पशुयागस्याङ्गभूतपुरोडाशयागस्य पात्रसंसादन-प्रमुखाण्येव नत्वन्वाधानादिकमप्यस्ति तस्य पश्वर्थे कृतस्य प्रसङ्गेनात्राप्युपकारकत्वात् । प्रतिपद्यते करोति । पशुपात्राणां प्रयुक्तत्वात्साधारणाना स्फ्याग्निहोत्रहवण्यादीनामपि प्रयुक्तत्वादसाधारणान्यौषधपात्राण्येव प्रयुज्यन्त इत्यर्थप्राप्ते यथार्थमितिवचनाद्ध्रुवेषमदन्तीवेदपरिवासनानामपि ग्रहणम् । पशावासादितस्य वेदस्याप्यासादनविधानात्स्फ्याग्निहोत्रहवण्योरासादितयोः पुनरासादनस्याविधानादेवं गम्यते यानि प्रसङ्गेनोपकुर्वन्ति तेषा यद्यपि न पुनरासादनं तथाऽपि येषां प्रातिस्विकतया यज्ञसंबन्धविवादो विहितस्तेषां पुरोडाशोपक्षीणानां पशौ पुनरुपयोक्ष्यमाणत्वाभावादन्येषामेव प्रयोगो युक्तः । प्रणीताविमोकोपवेषोद्सनयोर्विधास्यमानत्वाद्वेदस्यापि होत्रा त्यागस्य दर्शनात्मंत्राभावेऽपि तूष्णीकं विमुच्य विसर्जनमप्यनुज्ञायते । पुनर्वेदासादनविधानादैन्द्राग्ने पुरोडाशे सत्यप्येकादशानां द्वादशानां च विकल्पे चोदकप्राप्ते सौर्ये प्राजापत्येऽपि पशौ नाष्टाकपालतेति वक्तुं नियमः । अन्येष्वपि पशुषु नियमो ज्ञेयः । स्फ्याग्निहोत्रहवण्याद्यामाद्य पश्चात्पश्वर्थे सत्यपि प्रणीताप्रणयने तस्यादृष्टार्थस्यैव तदुद्देशमात्रेण कृतस्य नान्यत्र दृष्टविनियोगः । कृतविनियोगस्य च विमोकविधानादासंस्थं चालनानुपपत्तेश्च पुनः पृथक्कपालैः सह शूर्पमित्युक्तं द्वयम् । इडायाः पश्वर्थप्रयुक्ताया अद्याप्यकृतोपकाराया अन्यत्र विनियोक्तमशक्यत्वात्प्राकृताया अत्र ग्रहणम् । पश्वर्थमपूर्वाया एवोपादानम् । समवत्तधानीशब्देन तस्या निर्देशात् । इडापात्रमुक्तमेकमव । नान्वाहार्यो दक्षिणा प्रधानदक्षिणयैवर्त्विजा परिक्रीतत्वात् । औषधपात्राणीति प्रकृतौ पुरोडाशार्थतया गृहीतानीत्येव त्वौषधे पात्रस्य दृषदुलूखलयोश्चरत्वभावात् । ब्रह्मन्नपः प्रणेष्यामि यजमान वाच यच्छेति संप्रेष्यति । वाग्यतः पात्राणि संमृशति ।

निर्वपणकाले व्रीहिमयं पशुपुरोडाशं
निर्वपति समानदेवतं पशुना ।

पुरोडाशस्येत्येतावति वक्तव्ये पशुग्रहणं यद्देवत्यः पशुस्तद्देवत्यः पुरोडाश इति प्रदर्शनार्थम् । तेन पञ्चमप्रयाजवत्प्रधानदेवतासंस्कारकर्मता दानांशे चाऽऽरादुपकार-

---

१ ग. ठ. सौर्येप्रा॰ । २ ग. ठ. 'श्वर्ये स॰ । ३ क. 'त्युक्तम् । ४ ख. ग. ठ. ण. 'धमात्र' । ५ क. 'शना प्र॰ ।

कता च। प्रकृतौ व्रीहियवयोर्विकल्पे सति नियमार्थमेतद्व्रीहिमयमिति। तथा च विकृतौ सर्वत्र व्रीहय एव नियता इत्याहुस्तन्नेष्टमाचार्यस्यात्र नियमकरणात्। पशुयागेन समानदेवतमिति सौर्ये सौर्यं प्राजापत्ये प्राजापत्यमन्यत्रापि तथैवेति दर्शितम्। सर्वत्र पशुपुरोडाशे व्रीहिमयत्वं च नियतम्। अयं च प्रधानदेवतासंस्कार इति वक्तुं तथोक्तं यद्देवत्यः पशुस्तद्देवत्यः पुरोडाश इति श्रुतेः।

तस्य हविष्कृता वाचं विसृज्य पशुं विशास्ति।

तस्य पुरोडाशस्य त्रिष्फलीकरणसंप्रैषेण वाचं विसृज्येत्यनुवाद उत्तरविधित्सया। संज्ञप्तं पशुं विशास्ति। वाचं विसृज्य विशास्तीत्यनेन विकर्तनेऽध्वर्युरेव कर्तेत्युक्तं न शमितेति। तत्राध्वर्योर्गुदं मा निर्ह्लेषीरित्यादिप्रैषकर्तृत्वदर्शनात्प्रेष्योऽन्य एव स च नर्त्विक्। शमितरेषा तेऽश्रिः प्रज्ञाताऽसदिति विशसने शमिता विकृष्यते। अध्वर्योः प्रयोजकत्वाद्विशसनकर्तृत्वं न विरुध्यते। अध्वर्योरन्य ऋत्विगेवेति कात्यायनः। तत्र पशोर्विशसनं भागकरणं तत्कथमित्याकाङ्क्षिते हृदयमित्यादिक उपयोगपूर्वको निर्देशः।

हृदयम्।

पद्मकोशसदृशम्।

जिह्वा।

प्रसिद्धा।

वक्षः।

क्रोडश्येनाकृति समांसमस्थिकङ्कवदधस्ताद्धृदयस्योपरि।

स्तनिम।

यकृत्कालजमिति पर्यायः। तत्तु हृदयस्य दक्षिणभागे किंचिच्छ्वेतमिव।

मतस्ने।

वृक्यौ पार्श्वस्थौ पिण्डावाम्रफलाकृती।

पार्श्वे।

वङ्क्रिसंहती दक्षिणोत्तरे। अस्थीनि त्रयोदश त्रयोदशैकैकत्र संहतानि ते पार्श्वे।

सव्यं दोः।

षकारान्तो नपुंसकलिङ्गो बाहुवचनः। वामबाहुसक्थीति यावत्।

दक्षिणा च श्रोणिः।

दक्षिणं सक्थि पश्चिमपादस्य दक्षिणभागस्थस्य फलकमिति यावत्।

---

१ ख. ग. छ. ट. ण. °ति न व°। २ क. ख. ग. च. छ. ट. ठ. ण. °णा श्रो°।

दैवतानि ।

अवदानानि प्रधानदेवतार्थानि कालेऽवदानार्हाणि मांसानि ।

दक्षिणं दोः सव्या च श्रोणिः सौविष्टकृते ।

स्विष्टकृते देवताया महद्द्(?) अवदाने ।

गुदः साधारणः ।

दैवतमौविष्टकृतेडावदानार्थं उपयड्ढोमार्थश्च । गुदशब्देन पक्वं पुरीषं यस्मिन्स गुदं प्रत्याकृष्यते तद्गुदं गुदकाण्डमित्युच्यते ।

गुदं मा निर्लेषीः क्लोमानं प्लीहानं पुरीततं
मेदः समवधातवा इति संप्रेष्यति ।

क्लोमा नाम गलनाडिकाः(का) प्लीहा यकृत्सदृशो वामभागपार्श्वस्थः । एतन्मांसं कस्याऽपि नाड्या न परिगृहीतमसंलग्नमेव तिष्ठति । पुरीततं पुरी हृदय तयेनाऽऽच्छादितं तत्पुरीततम् । पुरी हृदयं तत्पुरीतता प्रच्छादयतीति श्रुतत्वात् । मेदो नाम बद्धं वृक्कयोर्हृदयस्य च वेष्टनकोशः । एतानि गुदं मा निर्लेषीरिति गुदस्याऽऽन्तरप्रदेशं बहिर्मा कार्षीरित्यर्थः ।

शमिता तु—

न गुदं निर्लिषति न वनिष्ठुं निर्भुजति ।

स्थूलशकृदाधार आन्त्रं स्थूलं वनिष्ठुः । तद्विपरीतं बहिर्भागमान्तरं न कुर्यात् । गतम् ।

अध्युद्धिं जाघनीं वनिष्ठुं चान्ववदधाति ।

अध्युद्धिरूधस उपरितनं मांसम् । जाघनी जघनप्रदेशे भवा जाघनी पुच्छं च वनिष्ठुं तान्प्रत्येकं लक्षयित्वाऽवधानेन स्थापयति ।

यदन्यच्च मेध्यं मन्यते ।

मांसजातमिति शेषस्तदप्यन्ववदधातीत्यनुकृष्यते ।

कुम्भ्यां पशुं समवधाय श्रपयति ।

पशुमांसान्युद्धृतानि तानि सानाय्यकुम्भीधर्मेण शामित्रेऽग्नौ स्थापितायां पशुकुम्भ्यामध्वर्युरवधाय सांनाय्यमन्त्रेण शमित्रा कृत्वा श्रपयति । पाकार्थमग्निमवशिष्येत्युक्तत्वाच्छामित्रेऽग्नावेव पाकः । शृतꣳ हवी३ः शमितरिति प्रश्नलिङ्गाच्छमिता पचति । तं प्रेष्यतीत्येतावता श्रपयतीत्युपपद्यते ।

शूलेन पार्श्वतो हृदयम् ।

श्रपयतीत्यनुकृष्यते । पूर्ववदेव यथासंभवं कुम्भीधर्मेण शूलेन प्रवृद्धं हृदयं शामित्राग्निसमीपे श्रपयति ।

ऊवध्यगोहं पार्थिवं खात्वा तत्र शकृत्संप्रविध्यति ।

अध्वर्युरेवोवध्यं शकृत्तदूह्यते येनावटेन स गर्त ऊवध्यगोहस्तं पृथिव्यां खात्वा तत्र सर्वं पुरीषं प्रक्षिपति ।

शृते पशौ पशुपुरोडाशेन प्रचरति ।

शाखान्तरीयोऽयं विधिर्दर्शितः । वपायागानन्तरं मार्जयित्वा पशुपुरोडाशस्य पात्रसंसादनप्रभृतीनि कर्माणि प्रतिपद्यत इत्युक्तस्ततस्तु हविष्कृता वाचं विसृज्येति शृते पशौ पशुपुरोडाशेन प्रचरतीत्यन्तः । अस्मच्छाखीयस्तु पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमालभते वपया प्रचर्य पुरोडाशेन प्रचरतीति श्रूयते तेन विकल्पः । तत्रायं क्रमः—संज्ञप्ते पशौ वाचं विसृज्य पशुपुरोडाशस्य पात्रसंस्मादनप्रभृतीनि कर्माणि प्रतिपद्य तण्डुलप्रक्षालनान्ते कृते पशुमुपायन्तीत्यादिवपाप्रचारे मार्जनान्ते पशुपुरोडाशस्य कृष्णाजिनादानादिना पशुपुरोडाशप्रचारेण कपालविमोचनान्ते कृते पशु विशास्तीत्यादिना शृते पशौ जुह्वां पञ्चगृहीतमित्यादि वक्ष्यमाणं पशुतन्त्रमव्यवधानेन करोतीत्यस्मच्छाखाक्रमः ।

प्रकृतमनुसरामि शृते पशौ पशुपुरोडाशेन प्रचरतीत्युक्तं कृष्णाजिनादानादिना हविरासादनान्ते कृते पश्वङ्गैरेव प्रसङ्गात्पशुपुरोडाशोपकारे सति वैशेषिकमेव तन्त्रं दर्शयति—

जुहूपभृतोरुपस्तीर्यावदायाभिघार्य ।

जुह्वां हविरवदानेन दैव उपभृति स्विष्टकृदवदानं तत उभयत्र यथाविध्यभिघार्य ।

इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीति संप्रेष्यति ।

गतम् ।

अत्याक्रम्य—

आश्राव्य न प्रेष्यति मैत्रावरुणो होतारं चोदयति ।

कृतव्याख्यानम् ।

वषट्कृते जुहोतीत्यन्ते कृते—

औपभृतं जुह्वां पर्यस्याग्नयेऽनुब्रूह्यग्नये प्रेष्येति[1] संप्रेष्यति ।

दक्षिणे स्थित एवौपभृतमवदानं जुह्वां प्रक्षिपत्यग्नय इत्यादि आश्राव्याग्नये प्रेष्येति संप्रेष्यति । वषट्कृते स्विष्टकृद्धर्मेण जुहोति ।

प्रत्याक्रम्येत्येतदन्ते कृते—

---

१ ड. च. ढ. °ति स्विष्टकृति सं° ।

प्राशित्रमिडा च क्रियेते[1] प्राशितायां मार्जनं पिष्टलेपफलीकरणहोमौ प्रणीतासु मार्जनमुपवेषोदसनं कपालविमोचनं च क्रियन्ते[2] ।

प्राशितायामित्यादिकानि क्रियन्त इति बहुवचनेन संबध्यन्ते । वैशेषिकाङ्गप्रदर्शनं प्रकृतिसिद्धाङ्गपरिसंख्यार्थं प्रसङ्गेनोपकरिष्यमाणाङ्गपरिसंख्यार्थं च । वैशेषिकस्यापि यजमानभागस्य परिसंख्या ।

तस्मिन्कृते जुह्वां पञ्चगृहीतं गृहीत्वा ।

विमोचनान्ते कृते सानाय्यवदभिघारणं स्थाल्याज्येनेति पञ्चगृहीतं स्थाल्याज्येन, स्रुवेणाभिघारणनिवृत्तये जुह्वामित्युक्तम् ।

पृषदाज्यस्रुवमादाय[4] ।

पृषदाज्यपूर्णस्रुवस्तथा स्थालीपृषदाज्यं स्रुवेण गृहीत्वा ।

शृत३ं हवी३ः शमितरित्यभिक्रम्याभिक्रम्य त्रिः पृच्छति शृतमिति शमिता त्रिः प्रत्याह ।

पञ्चगृहीतं स्रुवं[5] च गृहीत्वा किंचिदभिमुखं गत्वा शृत३ं हवी३ः शमितरिति श्रावयन्पृच्छति पुनरभिक्रम्य तथैव पृच्छति तृतीयमप्यभिक्रम्य तथैव प्रतिप्रश्नं च शृतमिति प्रत्याहैवं त्रिः प्रश्नस्त्रिरुत्तरम् ।

उत्तरतः परिक्रम्य शूलाद्धृदयं प्रवृह्य कुम्भ्यामवदधाति ।

परिक्रम्य कुम्भ्या उत्तरतः प्रदक्षिणं गत्वा शूले प्रोतं हृदयं निर्गमय्य हृदयं प्रज्ञातं कुम्भ्यामवधाय ।

सं ते मनसा मन इति पृषदाज्येन हृदयमभिघारयति ।

स्रुवेण गृहीतेन पृषदाज्येन कुम्भ्यामवहितं हृदयं तेनाभिघारयति । स्वाहान्तो मन्त्रः ।

स्वाहोष्मणोऽव्यथिष्या इत्यूष्माणमुद्यन्तमनुमन्त्रयते ।

कुम्भीत उद्यतः । स्पष्टमन्यत् ।

यस्त आत्मा पशुषु प्रविष्ट इत्याज्येन पशुमभिघार्य ।

जुह्वाज्येन पञ्चगृहीतेन पशुं कुम्भीगतम् । मन्त्रमित्यन्तः । पञ्चगृहीतेनाभिघारणं पशुं चोदकप्राप्तस्यानुवादः । मन्त्रप्रदर्शनं सं ते मनसेतिमन्त्रानुवृत्तिनिरासार्थम् ।

येन वपां तेन हृत्वा यत्र वपा तत्र पञ्चहोत्राऽऽसादयति ।

येनाऽऽहवनीयस्य यूपस्य च मध्येन वपा हृता तेनैव हृत्वा बर्हिषि प्लक्षशाखायां

---

१ घ. ज. झ. ञ. ढ. स्विष्टकृत्प्राशि० । २ घ. ञ. झ. ञ. ढ. क्रियन्ते । ३ घ. ङ. ज. झ. ग. ड. क्रियते । ४ घ. ङ. ज. झ. ञ. ढ. स्रुवं चाऽऽदा० । ५ ग. ड. ण. स्रुचं ।

तस्यामेवाग्निर्होतेत्यामादयति । प्राकृतमन्त्रनिवृत्तिः । यस्त आत्मेति याजमानम् । इदमिन्द्रियमित्यविकृतं हविषोऽत्राऽऽम्नादितत्वात् । हविषोऽवदीयमानस्यानुब्रूहीति च्छागस्य हविष इत्यादि शृतꣳ हवीरित्यत्रापि हविष एवावदीयमानत्वं नत्वङ्गाना-मिति न्यायेन साधितं न्यायविद्भिस्त एव द्रष्टव्याः ।

हृदयशूलं प्रज्ञातं निदधाति ॥ १४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्थप्रश्ने चतुर्थः पटलः ॥ ४ ॥

अग्रे प्रतिपत्तिविधानार्थमित्यर्थः ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोग-वैजयन्त्यां चतुर्थे पशुप्रश्ने चतुर्थः पटलः ॥ ४ ॥

अथ चतुर्थप्रश्ने पञ्चमः पटलः ।

यजमानेन व्याख्याते पञ्चहोतरि—

जुहूपभृतोर्वसाहोमहवन्याꣳ समवत्तधान्या चोपस्तृणीते ।

जुहूपभृतोर्ध्रुवाज्यमन्ययोः स्थाल्याज्य समवत्तमिडार्थं तस्य धान्याम् ।

जुहूपभृतोर्हिरण्यशकलाववधाय मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति संप्रेष्यति ।

जुहूपभृतोर्हिरण्यशकलाववधाय ततः संप्रेष्यति ।

प्लक्षशाखायामक्तया धारया दैवतानां द्विर्द्विरवद्यति ।

यत्प्लक्षशाखोत्तरबर्हिर्भवति मनेधस्यैव पशोरवद्यतीतिश्रुतेर्बर्हिष्येव स्तीर्णे स्तीर्णायां प्लक्षशाखायामित्यर्थः । सानाय्यवदङ्गुष्ठपर्वमात्राण्येव ततः स्थूलानि सौविष्टकृतानि ततोऽपि स्थूलान्यैडानीति स्रुवेणावदाने चोदकप्राप्ते धारयेत्यर्थे सामर्थ्यादित्युक्तं पूर्वमेव प्रज्ञातयाऽक्तया स्वधितेर्धारया दैवतान्यवदानानि पूर्वमेवोक्तानि तेषां द्विर्द्विरेकैकम् । अत्र चोदकप्राप्ते द्विरवदाने सति पुनर्द्विर्द्विरिति विधानं प्रत्येकमङ्गेषु यथा स्यादिति नो चेत्सर्वस्यैव सकृद्विरवदानमिति चोदकेन प्राप्नुयादेकादशावदानान्यवद्यतीति श्रुतेरपूर्वोऽवदानविधिरित्युक्तम् ।

हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्येतेषामनुपूर्वमवदाय ।

श्रुतिपाठेन दर्शितः ।

यथाकाममुत्तरेषामवद्यति ।

श्रुतिरेव । स्पष्टार्थम् ।

पुरस्ताच्छ्रोणेर्गुदस्यावद्यत्युपरिष्टाद्वा ।

श्रोण्यवदानाभ्यां पूर्वं पश्चाद्वेति विकल्पेन त(य)थाकाममित्यत्र नियमः । अत्र यद्यपि हविष एकत्वान्मा भेरिति सकृत्प्राप्तं तथाऽप्यवान्तरप्रदेशभेदान्नामभेदाच्च प्रत्येकं मन्त्रो यद्वदानानीत्ययमपि हृदयादीनि श्रोण्यन्तान्येकश उक्तानि तेषामविशेषेण द्विर्द्विरवदानम् ।

गुदः साधारण इत्युक्तम् । तत्र विभागप्रकारमाह—

गुदं द्वेधं करोति स्थवीय उपयड्भ्यो निदधाति ।

द्वेधाकृतस्य गुदस्य स्थूलं काण्डमुपयड्ढोमार्थे निदधाति ।

अणीयस्त्रेधं कृत्वा तस्य मध्यमं गुद-
काण्डं द्वेधं विभज्य दैवतेष्ववद्यति ।

द्वेधाकृतस्य गुदकाण्डस्य यदणीयो भागस्तं त्रेधा कृत्वा तस्य मध्यमभागो द्वेधाकृतो द्विरवदान दैवतेष्ववद्यति स्थापयति । अत्रैवावदानाना मन्त्रप्रत्यभिघारणे, अवद्यतीत्यत्रैव श्रवणाद्गुदं द्वेधं करोतीत्यादिना विभागमात्रमवदेयवद्द्रव्याणां कृतमिति नावदानत्वम् । एवं चैकादशावदानानि द्विरवत्तानि भवन्ति ।

उपभृति महत्त्र्यङ्गयोरवद्यत्यवशिष्टयोश्च गुदकाण्डयोरन्यतरत् ।

महद्गुदकाण्डं त्रेधाविभक्तस्य यौ भागाववशिष्टौ तयोर्मध्ये यन्महत्स्थूलं तत्तथा त्र्यङ्गयोर्दक्षिणबाहुसव्यश्रोण्योस्तयोरेव रूढ्या त्र्यङ्गसंज्ञा गुदस्य च दोष्पूर्वार्धस्य गुदं मध्यतः श्रोणिं जघनार्धस्य ततो देवा अभवन्पराऽसुरा यत्त्र्यङ्गाणा[४] समवद्यतीति श्रुतेस्त्रीण्येवावदानान्युपभृति ।

त्रेधा मेदः कृत्वा यूषेऽवधाय तृतीयेन
जुहूं प्रच्छादयति तृतीयेनोपभृतम् ।

प्रच्छादयतीत्युभयत्र त्रेधाकृतस्य मेदसस्तृतीयेन तृतीयेन यूषे पशुरसे रसो वा एष शूना यद्यूरिति श्रुतेः । मेदो व्याख्यातम् । अत्र हि पशुना यजेतैन्द्राग्नः पशुरित्यादिना पशोरेव देवतायै दीयमानत्वेन हविष्ट्वं न प्रत्येकमेकादशावदानानाम् । तेन यथा मध्यात्पूर्वार्धाच्च पुरोडाशावदानमुत्तरार्धात्स्विष्टकृत इति नियमः (?) । पुरोडाशे देवतासंबन्धेन यागद्रव्य एव पृथक्स्थानतया विभाग एव पशावपि स्थानभेदेन दैवतसौविष्टकृतेडावदानाना करणेऽपि सौविष्टकृतादीनां हविःशेषप्रतिपत्तिरूपतांनामुपैतीति ज्ञेयम् ।

समवत्तधान्यां[४] हृदयं जिह्वां वक्षः स्तनिमपतस्ने

---

१ क. च. ट. °विष्टत्वेन । २ च. °तामु° । ३ क. ग. च. छ. ट ठ. ण. °म् । अवत्तत्वान्न । स° । ४ क. ख. ग घ. ङ न. छ. ज. झ. ञ. ट. ठ. ण. जिह्वा ।

अवशिष्टं च गुदकाण्डं तृतीयं च मेदसो वनिष्ठु१ सप्तमं यदि शृतो भवत्यनस्थिभिरिडां वर्धयति ।

यदि वनिष्ठुः शृतो भवति तस्य बहुपाकमहत्त्वाद्यदि पशुना सह न पक्तुं शक्यतां नाव द्यति पक्वश्चेदवद्यति । मतभ्रान्तानि षडवदानानि । शृतश्चेद्वनिष्ठुः सप्तमं भवति । ततो गुदकाण्ड ततो मेद इति क्रमप्रदर्शनार्थं वनिष्ठुं सप्तममित्युक्तम् । अनस्थिभिर्मांसैः क्लोमादिभिरिडां वर्धयति पुष्टां करोति नैतान्यवद्यति । वाजपेयेऽनवदानीयानि बाज-सृद्भ्यः प्रयच्छतीत्यादि तत्र तत्रानवदानीयत्वं वक्ष्यति तच्चोपपन्नं भवति । अन्यानि यानि मेध्यानि मांसानि तेषामप्यत्रैव विनियोगोऽन्यथा तेषामुद्धरणमनर्थकं स्यात् । अत्र यजमानभागावदानं दैवतेभ्यो दशभ्य एव गुदस्य विभज्य विनियोगात् । औप-भृतेडानां च पृथक्तया विभागकरणेन प्रतिपादनान्न शेषार्थेभ्यः शेषकार्यं यजमानभाग-लक्षणं तस्मात्प्रधानावदानेभ्य एव । तथाचायं क्रमः—इडायां हृदयादीनां गुदान्तानां-मष्टानामेकैकं समवदायेडायामवधाय ततो हृदयादिभ्यो दशभ्यो यजमानभागस्ततः पुनरैडावदानमष्टभ्यस्ततोऽनस्थिभिरिडां वर्धयतीति ।

शृतमशृतं च पशु१ संनिधायैन्द्रः प्राण इति संमृशति ।

शृतमशृतं मन्त्रेण संमृशति । माता पितरो मदन्त्वित्यन्तः ।

वसाहोमहवन्यां वसाहोमं गृह्णाति ।

वसा रसः । वसा चासौ होमश्चेति हूयतेऽसौ होमो ग्रहणम् । वसां गृह्णातीति वक्तव्ये श्रुतिप्रसिद्ध्योक्तं पार्श्वेन वसाहोमं प्रयौतीति श्रवणात् ।

श्रीरसीति स्रवन्तीं धारा२ स्वधितिना तिर्यगाच्छिनत्ति ।

वसाहोमग्रहणप्रकार एवोच्यते । श्रीणात्वित्यन्तेन मन्त्रेण स्वधितिना धारां दक्षिणहस्तेन कृतां वामेन विच्छिनत्ति । स्रवन्तीं संतताम् ।

सकृच्चतुरवदानस्य द्विः पञ्चावत्तिनः ।

सकृच्छेदेन द्विरवदानं भवति चतुरवदानवतः । उपस्तरणाभिघारणाभ्यां चतुरवत्तं स्यात्पञ्चावत्तिनस्तु द्विच्छेदेन त्रीण्यवदानानि भवन्तीत्यर्थः ।

आपः समरिणन्निति पार्श्वेन वसाहोमं प्रयौति स्वधि-तिना प्रयौतीत्येकेषां पार्श्वेनापिदधतीत्येकेषाम् ।

प्रयौत्यालोडयति वसाहोमहवनीगतां वसाम् । पार्श्वस्य स्वधितेश्च प्रयवणे विकल्पः । प्रयवणस्यापिधानस्य च विकल्पः । रोहिष्या इत्यन्तो मन्त्रस्त्रिष्वपि ।

अत्रैक ऊष्मणोऽनुमन्त्रण१ समामनन्ति ।

कुम्भ्यां यदुक्तं स्वाहोष्मणोऽव्यथिष्या इत्यनुमन्त्रणं तदत्रैकेषां शाखिनाम् ।

---

१ ढ. °निष्ठु स° । २ घ. ङ. ज. झ. ञ. ढ. °गाच्छयति ।

यूषेणोपसिच्योपरिष्टाद्धिरण्यशकलाववधायाभिघार्य ।

जुह्वाद्यवत्तानि यूषेणोपसिच्य यथेतमुत्तरत आनीय जुहूपभृतोर्हिरण्यशकलाववधाय यथाविधि सर्वाण्यभिघार्य ।

इन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीति संप्रेष्यति ।

सौर्यप्राजापत्ययोरपि प्रदर्शनार्थं, स्पष्टमन्यत् ।

अत्याक्रम्य—

आश्राव्य न प्रेष्यति मैत्रावरुणो होतारं चोदयति ।

कृतव्याख्यानम् ।

घृतं घृतपावान इत्यर्धर्चे ॥ १५ ॥

याज्यायाः प्रतिप्रस्थाता वसाहोमं जुहोति ।

प्रतिप्रस्थाताऽग्रेणाऽऽहवनीयं गत्वा घृतमिति मन्त्र याज्यया सहाऽऽरभ्य तस्या अर्धर्चे समाप्तेऽन्तरिक्षाय स्वाहेत्यन्तेन जुहोति । वषट्कृतेऽध्वर्युर्हविर्जुहोति । इन्द्रियावी भूयासमिति जेमानमिति वा सर्वपशुवपानुमन्त्रणम् ।

वसाहोमोद्रेकेण दिशः प्रति यजति ।

यजति जुहोति । उद्रेकेण शेषेण होमे कृतधाराया अविच्छेदेन जुहोति अग्निमानपि होमान्न मध्ये विच्छेदं कुर्वन् ।

दिश इति पुरस्तात्प्रदिश इति दक्षिणत
आदिश इति पश्चाद्विदिश इत्युत्तरत उद्दिश
इति मध्ये स्वाहेति सर्वत्रानुषजति ।

सर्वत्रेति स्वाहाऽन्तरिक्षायेत्यत्राप्यन्तेऽनुषङ्गः । दर्विहोमत्वादन्ते प्राप्तेऽपि यन्मध्यमस्वाहाकारस्वीकारो भरद्वाजादीनामन्ते च कर्तव्यः प्रक्षेपान्तव्यावृत्त्यर्थे । दिश इत्यादावपि प्रतियजतिचोदितत्वेन न दर्विहोमतेत्याशङ्क्य यजतेर्दानमात्रार्थस्यात्राप्रयोगाद्याज्याया अभावान्न वषट्कार इति स्वाहानुषङ्गेणैव प्रदानमत्रापि प्रतियजतिना लक्ष्यते तादृशमेव दिशो जुहोतीति श्रुतेर्दर्विहोमताविधानार्थं च ननु(तु) पुरस्तात्स्वाहाकारो घृतमित्ययं मन्त्रो नापि देवतापदात्पूर्वं स्वाहाकारेण पुरस्तात्स्वाहाकारो भवति स्वेतिपदेन व्यवधानादन्तरिक्षायेति देवतापदान्ये(दस्ये)त्यनेन ज्ञापितमेव विकृतं वप्यहोमे । अनुषङ्गोऽत्र स्वाहाऽन्तरिक्षायेत्यत्रत्यस्य स्वाहाकारस्याथवा स्वाहा दिग्भ्य इत्यस्य पूर्वमप्यनुषङ्गः ।

स्वाहा दिग्भ्य इत्ययं न दर्विहोम इत्याह—

स्वाहा दिग्भ्य इति प्रदक्षिणमनुपरिषिञ्चति ।

अनुपरिषिञ्चतीति प्रयोगान्न दर्विहोमता नापि यत्र च स्वाहाकार इत्यनेन मतान्तरविवक्षितत्वात् । कुतः । यद्यवदानस्य तत्रापि दर्विहोमत्वे सति स्वाहा दिग्भ्य

इति प्रदक्षिणमित्येव ब्रूयात्। प्रतियजतीतिदानार्थस्य धातोरप्रयोगान्न स्वाहाकारापेक्षा। यतस्त्वियं शेषप्रतिपत्तिरिति प्रदक्षिणमनुपरिषिञ्चतीति प्रयोगेण दर्शितम्। तस्मान्न पुरस्तात्स्वाहाकारेण दर्विहोमता तेन स्वाहोर्ध्वनभसं मारुतमंत्र न दर्विहोमतेत्यलमति-प्रसङ्गेन।

नमो दिग्भ्य इति हुत्वोपतिष्ठते।

हुत्वेति वचनं प्रतिप्रस्थातुरेवोपस्थानार्थम्।

अत्रैव तिष्ठन्पृषदाज्यस्रुवं जुह्वामानीय वन-स्पतयेऽनुब्रूहि वनस्पतये प्रेष्येति संप्रेष्यति।

अत्रैव दक्षिणत एवकारो भरद्वाजोक्त उत्तरतोवस्थाननिवृत्त्यर्थः। पृषदाज्येन पूर्णं स्रुवं स्थालीगतेनौपभृतस्यानूयाजार्थत्वात्। वषट्कृते जुहोतीति शेषः। अत्र हविःसामान्येनोपांशुयागधर्मसकृदवदानस्विष्टकृद्देवतासंस्काराभ्या स्विष्टकृद्धर्मेण बाध्यते(?)। कुतः। हविःसामान्यं प्रधानयागे बलवन्न स्विष्टकृत्त्वप्रधाने।

औपभृतं जुह्वां पर्यस्याग्नये स्विष्टकृतेऽनुब्रूह्यग्नये स्विष्टकृते प्रेष्येति पशुस्विष्टकृति संप्रेष्यति।

पर्यस्य रेचयित्वा। स्पष्टमन्यत्। वषट्कृते जुहोतीति शेषः। अत्रैव तिष्ठन्नित्य-प्यनुवर्तते।

अत्रैवैके पशुसंमर्शनं दिशां प्रतीज्यामिति समामनन्ति।

शृताशृतपशोः। गतार्थम्। यथाप्रकृति याजमानम्।

मेदोमिश्रमवान्तरेडामवद्यति।

विशेषाभिधानं मेदोमिश्रमवान्तरेडामिति।

यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा आदध्याद्यं कामयेत पशुमान्त्स्यादिति मेदस्वत्तस्मा आदध्यात्।

अमेदस्कावान्तरेडावदाननिन्दया प्रथमोऽर्थवादो द्वितीयो विधिः सत्यां कामनाया-मसत्यामपि मेदोयुक्तैवावान्तरेडेत्यर्थः।

उपहूतां मैत्रावरुणपष्ठाः प्राश्नन्ति।

पूर्वपशुपुरोडाशेडां मैत्रावरुणपञ्चमा एव प्राशितवन्तोऽत्र न तथा प्रतिप्रस्थातुर्वपा-श्रपण उपयोगात्पश्विडा तस्यापीति वक्तुमुक्तं मैत्रावरुणषष्ठा इति न यजमानपर्युदा-सार्थमिति।

---

१ क. ख. च. ठ. °त्र द°। २ ग. ठ. ण. °कृत्प्रधा°।

किमविशेषेण नेत्याह—

अध्युद्धिꣳ होत्रे हरति वनिष्ठुमग्नीधे षडवत्तꣳ संपादयति ।

हरन्ती(ती)त्युभयत्र ताभ्यां दत्त्वाऽवशिष्टां प्राश्नन्ति । होता स्वेडाभागेन सह प्राश्नाति वनिष्ठुमध्वर्युः षडवत्तं चतुर्धाकरणवत्संपाद्य प्रयच्छति ।

यथाविधि सर्वैः प्राशितायामिडायां मार्जयन्त इत्याह—

प्राशितायां मार्जयित्वा ।

यजमानस्यापि यथाप्रकृति प्राशनं मार्जनं च ।

अग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्म-
न्प्रस्थास्यामः समिधमाधायाग्नीत्परिधीꣳ-
श्चाग्निं च सकृत्सकृत्संमृड्ढीति संप्रेष्यति ।

उपयाजार्थमङ्गारा औपयजा उपयजतीत्युपयष्टा प्रतिप्रस्थाता । अङ्गाराणां समीपे तिष्ठ । स्पष्टमन्यत् ।

शामित्रियादाग्नीध्रोऽङ्गारानाहृत्योत्तरस्यां वेदि-
श्रोण्यां बर्हिर्व्यू(र्व्यु)ह्य न्युप्योपसमादधाति ।

शामित्रियादग्नेर्बर्हिर्व्यू(र्व्यु)ह्य तृणादि तत्र न्युप्योपसमादधाति काष्ठैः प्रज्वाल्य परिस्तृणाति ।

प्रतिप्रस्थातरेतद्गुदकाण्डं तिर्यगसंभिन्दन्नेकादशधा सं-
छिद्य वसाहोमहवन्या हस्तेन वोपयजेति संप्रेष्यति ।

तिर्यगेकादशधा संछिद्यासंभिन्दन्नविदारयन्नपर्यावर्तयंश्च । छेदनं तिर्यगेव नानूची-नम् । एकादशधा छित्त्वा पश्चाद्धोमो न तु प्रत्याहुति च्छेदः ।

पृषदाज्यं जुह्वामानीय पृषदाज्यधानीमुपभृतं
कृत्वा पृषदाज्येनैकादशानूयाजान्यजति ।

पृषदाज्यधानीगतं पृषदाज्यम् । स्पष्टमन्यत् ।

देवेभ्यः प्रेष्येति प्रथममनूयाजꣳ
संप्रेष्यति प्रेष्य प्रेष्येत्युत्तरान् ।

सर्वानपि दक्षिणतो गत्वा । स्पष्टम् । अत्र देवेभ्य इति विरूपाणां सरूपाणां चैक-शेषेण बहुवचनं सर्वानूयाजार्थम् ।

एवं च प्रेष्येत्यनेन यजेत्यस्याविशेषेण प्रयाजेष्विवानूयाजेष्वपि बाधे प्राप्ते वचनेन द्वितीयतृतीयानूयाजविकारेषु प्रतिप्रसवमाह—

चतुर्थप्रभृतिषु यजेति मैत्रावरुणेनोच्यमाने यज यजेत्यध्वर्युराहान्यत्र दशमात् ।

मैत्रावरुणेन होतर्यजेत्युच्यमाने तत्र यजेत्यनेन सहैवाध्वर्युर्यज यजेत्याह दशमं विना चतुर्थप्रभृतिषु सप्तस्वपि दशमस्य प्रथमविकारत्वात्त्रयः प्रथमविकाराः क्रमेण ततो मध्यमस्य ततो द्वावुत्तमस्याष्टमो मध्यमस्य नवम उत्तमस्य दशमः प्रथमस्योत्तम उत्तमस्येति तथेज्याऽपि ज्ञेया ।

समुद्रं गच्छ स्वाहेति ॥ १६ ॥ एतैः प्रति-प्रस्थाताऽनूयाजानां हुतं हुतमुपयजति ।

यत्र च स्वाहाकार इति वचनाद्दर्विहोमेऽपीतरधर्मनिवृत्तिः स्वतन्त्रधर्मविधानात् । हुतं हुतमनूयाजानां प्रक्षेपमनु समीपे यजति जुहोतीत्यर्थः । समुद्रं गच्छेत्येतैरेकादश-भिर्मन्त्रैरेकादशोपयजो जुहोति ।

उपयज उपेज्याप्यस्त्वौषधीभ्य इत्युत्तरतो बर्हिषि लेपं निमार्ष्टि ।

क्रमप्राप्तस्योपयज उपेज्येति वचनं प्रतिप्रस्थातुरेवोपयजावदानलेपप्रतिपत्तिविधा-नार्थं वेद्यां स्तीर्णे बर्हिषीत्युक्तम् ।

मनो मे हार्दि यच्छेति हृदयदेशमभिमृशति ।

स एव । अन्तीयेत्यन्तः ।

जुहा त्रिः स्वरुमङ्क्त्वा द्यां ते धूमो गच्छ-त्वन्तरिक्षमर्चिः पृथिवीं भस्मना पृणस्व स्वाहेति जुहाऽऽहवनीयेऽध्वर्युः स्वरुं जुहोति ।

जुहोतिचोदितदर्विहोमधर्मनिवृत्त्यर्थहवनीयजुहूपात्रग्रहणं, प्रतिप्रस्थातुराधिकारनि-वृत्त्यर्थमध्वर्युग्रहणम् । स्पष्टम् ।

वाजवतीप्रभृतीनि कर्माणि प्रतिपद्यते ।

प्राकृतपदार्थावसरार्थमिदं, वाजवत्या क्रियमाणं वाजवतीत्येव कर्म तत्प्रभृति । द्वयो-र्जुहूसंज्ञत्वाद्द्वयोश्चोपभृत्संज्ञत्वात्सर्वा व्यूहति । सर्वासु प्रस्तरमनक्ति । तथा चाऽऽह भरद्वाजः—सर्वा जुहूपभृतो व्यूहति सर्वासु प्रस्तरमनक्तीति सर्वाः कस्तम्भ्यां सादयतीति ।

सूक्ता प्रेष्येति सूक्तवाके संप्रेष्यति ।

विकृत्यर्थमिदं सूक्ता ब्रूहीत्यस्य स्थाने प्रकृतिवदन्यच्छंयुवाकान्तम् ।

प्रतिपरेत्य पत्नीः[3] संयाजयति ।

विशेषं वक्तुमनुवादस्तदेवाऽऽह—

---

१ ट. 'ध्यमौ द्वौ मध्यम' । २ ग. ठ. ण. °नीये जु° । ३ ख. ग. घ. ङ छ. ज. झ. ञ. ठ. ड. ण. संयाजयन्ति ।

जाघन्या देवानां पत्नीरग्निं गृहपतिं च यजत्याज्येनेतरौ ।

इतरौ सोमत्वष्टारौ ।

उत्तानायै जाघन्यै देवानां पत्नीभ्योऽ-
वद्यति नीच्यौ अग्नये गृहपतये ।[1]

अवद्यतीत्युभयत्र गुदेन छन्नो भाग उपरि क्रियते तदोत्तानं पञ्चम्यर्थे चतुर्थी ।
स्पष्टम् ।

उत्तानायै जाघन्यै होत्र इडामादधाति
नीच्यौ अग्नीधे षडवत्तꣳ संपादयति ।[2]

आज्येडास्थाने षडवत्तं संपादयति । चतुरवदानमुपस्तरणाभिघारणाभ्यां षडवत्त-मग्नीधे तथैव चतुरवत्तं होत्र इत्यर्थः ।

प्राशितायां जाघनीशेषं पत्न्यध्वर्यवे ददाति बाहुꣳ शमित्रे ॥

एकमेव । स्पष्टम् ।

तꣳ स ब्राह्मणाय ददाति यद्यब्राह्मणो भवति ।

तं बाहुं यदि शमिता ब्राह्मणो न भवति तदा ब्राह्मणाय दद्यादन्यदा स्वयमेवो-पयुनक्ति । एतेन शमिता ब्राह्मणोऽन्यो वेति दर्शितं कर्त्रौ ब्राह्मणस्य शामित्रप्रति-षेधात् । अन्यस्यैव द्विजस्य तस्मात आर्याधिष्ठितस्य वा तस्यापि पाकसंस्कर्तृत्वं धर्मेषु स्वयमेव वक्ष्यति ।

यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छेति जुहाऽऽहवनी-
येऽध्वर्युस्त्रीणि समिष्टयजूꣳषि जुहोति ।

स्वाहान्तास्त्रयोऽपि मन्त्रा एषां तृतीये द्विमन्त्रमस्वाहाकारेऽपि पाः स्वाहेति दर्विहोमत्वं ज्ञेयम् । ध्रुवानिवृत्त्यर्थं जुहूग्रहणम् । इतरधर्मनिवृत्त्यर्थमितरयोः प्रकृतौ विकल्पनिवृत्त्यर्थं त्रीणीति ।

हृदयशूलेन प्रचरन्ति ।

बहुवचनात्सपत्नीकाः सर्वेऽपि प्रचारार्थं गच्छन्ति ।

तदाह—

असꣳस्पृशन्हृत्वा शुगसि तमभिशोचेति
शुष्कस्य चाऽऽर्द्रस्य च संधावुद्वासयति ।

द्विष्म इत्यन्तः । शुष्कार्द्रादिव्यवस्थितायाः संधौ प्रक्षिपति हृदयशूलम् ।

---

१ ग. घ. ङ. ज. झ. म. ठ. ढ. ण. °च्याम° । २ ग. घ. ङ. ज. झ. म. ठ. ढ. ण. °च्यामी° । ३ क. ख. ग. च. ट. ठ. ण. स्वाहेति । ४ घ. ङ. ज. झ. म. ढ. °न च° । ५ क. च. ठ. °र्द्राद्व्यवस्थाता° । ख. °र्द्राद्व्यता° । ग. छ. ठ. ण. °र्द्राद्व्यवस्थता° ।

यत्र चाऽऽर्द्रमनुगतं तदुपोप्तम् ।

यत्राऽऽर्द्रमनुगतं प्राप्तं तदुपोप्तमाच्छादितमुद्वासनयोग्यमित्यर्थः ।

धाम्नो धाम्न इत्युपतिष्ठन्ते ।

नो मुञ्चेत्यन्तः । सर्वेऽप्युपतिष्ठन्ते ।

सुमित्रा न इति मार्जयन्ते ।

द्विष्म इत्यन्तः । तस्मिश्चात्वाले वेत्यापस्तम्बः ।

एधोऽस्येधिषीमहीत्याहवनीये समिधोऽभ्यादधाति ।

अत्र मन्त्रस्यैकत्वादेकामेव समिधमभ्यादधति प्रत्येकं बहुत्वात्सूत्रे बहुवचनं समिधाऽग्निं नमस्यन्त उपायन्तीति श्रुतेरेकैकामेव गृहीत्वाऽऽगत्यैकैकामेवाभ्यादधते ।

अपो अन्वचारिषमित्याहवनीयमुपतिष्ठन्त एवं पत्नी गार्हपत्येऽभ्याधायोपतिष्ठते ।

अत्र पयस्वाँ अग्न आगममिति पुंलिङ्गेन नोहः सौमिकावभृथे हि मन्त्रः पठ्यते विनियुज्यते च साऽवभृथप्रकृतिस्तत्रोहप्रतिषेधाद्विकृतावपि नोह इत्युक्तमेव । स्पष्टम् ।

सर्वपशूनामेष कल्पः ।

सर्वेषां पशुबन्धानां साङ्गो विधिरेष एव नायमतिदेशोऽपि तु सोमाङ्गैः संकीर्णोऽग्नीषोमीयसवनीयानां विधिरिति ततो निष्कृष्टो निरूढेऽतिदेशप्राप्तो निरूढ एव व्याख्यातः । स सर्वेषां समान औपदेशिकाग्नीषोमीयादीनामितरेषामातिदेशिकः । एवं च निरूढौ सौर्यप्राजापत्यावपि ये वैशेषिका मन्त्राः शाखान्तरीया इन्द्राग्निभ्यां त्वा जुष्टमुपाकरोमीत्यादयो निरूढे श्रूयमाणास्तेऽग्नीषोमीयादौ सौर्यप्राजापत्ययोरपि चातिदेशादूह्याः । तत्राग्नीषोमीयादयोऽपि निरूढस्यांशे विकृतयः । अन्याश्चर्यैवं चैते प्रकृतयो निरूढो विकृतिः । उक्तमेतद्दर्शपूर्णमासप्रकृतय इष्टिपशुबन्धास्ते स्वधर्माणः सामान्याद्विकार इति येषां प्रत्यक्षाण्यङ्गानि तेषामन्ये विकारा ये त्वप्रत्यक्षाङ्गा इति ।

पशुः प्रातर्दोहविकारः कालसामान्यात् ।

यद्यपि माधुर्येण साम्यमस्ति तदेव निर्णायकं न्यायमते तथाऽप्यद्रवणसाम्येन सायंदोहविकारत्वमाशङ्क्यमानमधिकेन कालसामान्येन बाध्यते । प्रातःकाले हि प्रातर्दोहस्य पशोश्चोत्पत्ती समाने इति तद्विकारत्वेन दर्शविकृतित्वम् ।

---

१ घ. ङ. ज. झ. ञ. ढ. 'मित्युप' । २ ख. 'प्राप्ते नि' ।

प्रसङ्गेनान्यत्रापि न्यायमतिदिशति—

तथाऽऽमिक्षा ।

तस्यामुभयदोहसंसर्गेऽपि तस्या एकवचनान्नोभयोर्हविष्ट्वं नापि संसृष्टमेकं पयोविकारमात्रदर्शनान्मन्त्रवर्णे च जुषन्तां युज्यं पय इति पयःशब्देनैकत्वेनैव ग्रहणादामिक्षा पयोविकारः । आमिक्षा च प्रातरेव क्रियत इति तस्यामपि कालसाम्यमुक्तम् ।

आग्नेयैन्द्राग्नयोस्तद्विकारेषु चैतदविकृतम् ।

अग्निष्टोमोक्थ्यसंस्थयोरेतौ सवनीयौ पशू तयोरविकृतमन्यूनानतिरिक्तमेतत्तन्त्रं यन्निरूढ उक्तम् । तयोर्या विकृतयस्तेष्व(स्तास्व)पि तथा तयोः प्रत्यक्षधर्मत्वादन्येषां तत्समानां विकारत्वं प्रत्यक्षमनुपदिष्टं पशुधर्माणां धर्माकारिणामङ्गपशुत्वसामान्येन नैतयोर्विकारत्वम् ।

अग्नीषोमीये तद्विकारेषु चाऽऽश्ववालः प्रस्तर ऐक्षवी तिरश्ची कार्ष्मर्यमयाः परिधयोऽधिकाः पौतुदारवेभ्योऽमुष्मा अमुष्य वपाया मेदसः प्रेष्यामुष्मै पुरोडाशस्य प्रेष्यामुष्मा अमुष्य हविषः प्रेष्येति पशोर्दैवते संप्रेष्यति ।

अग्नीषोमीय उपवसथीयः पशुस्तद्विकारेष्वौपवसथ्येषु निरूढादधिकमाश्ववालादिकं तत्तु पूर्वमातिथ्यायामिष्टौ कृतं यदेवाऽऽतिथ्याबर्हिस्तदग्नीषोमीयस्येत्यादिनाऽग्नीषोमीयार्थमेवोक्तमिति तद्विकारेष्वपि तथैव न निरूढे सवनीये तद्विकारेषु च प्रणयने पौतुद्रवाः परिधयो न कार्ष्मर्यमयाणामेवाग्नीषोमीये वचनेन प्राप्तत्वात् । प्रैषविशेषास्तु शाखान्तरेण व्यवस्थापितास्ते निरूढे न सन्तीत्युक्तमत्रैव ते तथैव शाखान्तरात्सवनीयेष्वपि न सन्तीत्येतदविकृतमित्यनेनोक्तम् ।

ऐन्द्रे सारस्वत्यां तद्विकारेषु च दार्शपूर्णमासिकः प्रचरणकल्पः प्रचरणकल्पः ॥ १७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्थप्रश्ने पञ्चमः पटलः ॥ ५ ॥

इति हिरण्यकेशिसूत्रे चतुर्थः प्रश्नः ॥ ४ ॥

अनयोर्न मैत्रावरुणव्यापार इत्यर्थः । एवं चाग्नीषोमीयस्य चतुर्णां सवनीयानां निरूढस्य च षष्ठस्य सर्वपशुप्रकृतित्वमुक्तं भवति । ननु(नु) मीमांसकैरग्नीषोमीयस्यैव सर्वपशुप्रकृतित्वमुक्तं तत्रैव पशुधर्माणां प्रत्यक्षाम्नानादिति । अस्मच्छाखायां हौत्रं

---

१ अ. क्ष. ब. ठ. 'र्शपौर्णे' ।

पशोस्तु निरूढं प्रकृत्यैवोक्तमग्नन्ति स्येति प्रश्नेन तदूहेनान्यपशुषु चोदकेनैव प्राप्नोति । न च तेषु प्रत्यक्षं विधानमस्ति । तस्मात्प्रत्यक्षाङ्गत्वादन्येषु नैमित्तिकका-म्येषु स्वतन्त्रपशुषु निरूढो हौत्रं प्रयच्छत्ते(च्छंस्ते)षां प्रकृतिर्भवत्येव । तथा चाऽऽध्व-र्यवं वैशेषिकं वेदिमानादिकं चौपदेशिकमेव प्राप्यान्येषु प्रयच्छत्तथाऽग्नीषोमीयादि य(?)आध्वर्यवमतिदिष्टं प्राप्य तद्विकृतेऽपि भवति नहि भिक्षुको भिक्षुकाद्याचत इति न्यायात् । एवं च तन्त्रान्तर्गतेषु पशुषु सादृश्यादग्नीषोमीयादय एव प्रकृतिस्तत्रापि व्यवस्थौपवसथ्ये क्रियमाणानामग्नीषोमीय एव सवनेषु क्रियमाणानामाग्नेयादयस्तत्रापि व्यवस्थाऽऽग्नेयैन्द्राग्नयोस्तयोस्तुल्यत्वेऽपि पशुपुरोडाशधर्मभेदाद्व्यवस्था येषां ह्याग्नेय-पुरोडाशविकाराः पशुपुरोडाशास्तेषामाग्नेयः सवनीयः प्रकृतिर्येषां तु द्विदेवत्यानां बहु-देवत्यानां वा पशुपुरोडाशा ऐन्द्राग्नपुरोडाशविकारास्तेषामैन्द्राग्न एव प्रकृतिः । येषा-मनेकदेवतानामग्नीषोमीय एव पुरोडाशः पशुपुरोडाशप्रकृतिस्तेऽप्याग्नेयस्यैव सवनी-यस्य विकारा आग्नेयवत्तेषां कपालधर्मसादृश्यात् । येषामेकदेवतानामैन्द्राग्नपुरोडाश-धर्मकाः पशुपुरोडाशास्तेषामैन्द्राग्नः सवनीयः प्रकृतिर्नाऽऽग्नेयो हविःसामान्यं बलीय इत्युक्तमेव । ये त्वन्ये सरस्वतीदेवताकाः सरस्वद्देवताकास्ते प्रातिपदिकसाम्येन ये च स्त्रीदेवताकास्ते स्त्रीदेवतासाम्येन सरस्वत्या मेष्याः सवनीयाया एव विकारा इति व्यवस्था । सवनीयानां चतुर्णामग्नीषोमीयपशुवद्देवोपदिष्टधर्मत्वेन नाग्नीषोमीयवि-कृतित्वं मीमांसकाभिमतम् । कुतः । यतस्तेषां ज्योतिष्टोमसंस्थान्तर्गतानां ज्योतिष्टो-मप्रकरणगतयस्त्वङ्गोपदेशैस्याविशिष्टत्वात् । नहि तत्राग्नीषोमीयादीनां देवताविशेषा विहिताः सन्ति नावान्तरप्रकरणेन नियमो भवेत् । किं तु यदग्नीषोमीयं पशुमालभत इत्यर्थवादादाश्मनं दीक्षितस्येति विधेर्हेतुसमर्पणे प्रस्तावकाद्विधिरनुमीयते नतु तद्वि-धिरस्मच्छाखायां साक्षादस्ति । तथाऽऽग्नेयादीनामप्यनुवादादेव विधय उन्नीयन्ते । वाजपेये हि श्रूयते—"आग्नेयं पशुमालभते । अग्निष्टोममेव तेनावरुन्धे । ऐन्द्राग्ने-नोक्थ्यम् । ऐन्द्रेण षोडशिनः स्तोत्रम् । सारस्वत्याऽतिरात्रम् । मारुत्या बृहतः स्तोत्रम्" इत्यर्थवादेन वाजपेयपशुदेवताविधिः परेणाग्निष्टोमादिसंस्थास्वाग्नेयादि-पशुविधयोऽनुमीयन्तेऽतस्तु ते सर्वेऽपि पशवो ह्यविशेषेण ज्योतिष्टोमं प्राप्ता अतस्तेषां सर्वेषामप्यवान्तरप्रकरणं समानमेव । तथा चात्यन्यानगामित्यादिधाम्नो धाम्नो राजन्नित्यन्ता मन्त्राः प्रकरणे पठ्यमाना न कामपि पशुदेवतां विशेषे-णाभिदधते । तथा तद्ब्राह्मणमपि वैष्णव्यर्चा हुत्वा यूपमित्यादि यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयतीत्यन्तं यूपादिविधानहृदयशूलोद्वासनान्तं समानमेव न कामपि देवतां विशेषेणोपादत्तेऽतो यावन्तो ज्योतिष्टोमपशवस्तावन्तः सर्वेऽप्यविशेषादवान्तर-

---

१ क. च. छ. ट. °यादिः य । २ ख. ग. छ. ठ. ण. °योस्तु° । ३ क. च. ट. °शस्य वि° ।

प्रकरणिन एवेति सर्वेषामौपदेशिकमेवाऽऽध्वर्यवम्। उपाकरणमन्त्रादयस्तु निरूढाद्तिदिष्टास्तथा प्रैषविशेषा अपि ऐन्द्रे सारस्वत्यां मैत्रावरुणप्रैषाभावश्च शाखान्तरादेव। तथा शाखान्तरवशात्प्रैषविशेषनियमो बर्हिर्विधृतिप्रस्तरकार्ष्मर्यमयपरिधिनियमोऽपि वचनादेवेत्युक्तम्। तस्मादग्नीषोमीयादयः पञ्चापि सोमे तन्त्रान्तर्गताना व्यवस्थिताः प्रकृतयः। सोमे तन्त्रबहिर्भूयानां तु निरूढ ऐन्द्राग्न एवेति। पञ्चापि पशवः प्रत्यक्षधर्माणो हौत्रेण निरूढस्य विकृतय इतर आध्वर्यवेण वैशेषिकेण च हौत्रमतिदेशात्समानमेव प्राप्तमपि शाखान्तरादैन्द्रे सारस्वत्यां च मैत्रावरुणव्यापारप्रतिबन्धेनैव व्यवस्थापितमित्यलमतिप्रसङ्गेन। जैमिनीयैस्तु पञ्चपशुप्रकृतित्वमाशङ्क्य दूषितं न्यायेन तत्त्वस्मच्छाखोपदेशसूचितन्यायव्याख्याने सूत्रतात्पर्यं दर्शितमतोऽस्मत्सूत्रेऽयमेव प्रकारो ज्ञेयः।

न्यायोपदेशयोः केचिद्विकल्पं ब्रुवते न तत्।
युक्तं न्यायोऽनुमानं तु श्रुतितुल्यं कथं भवेत्॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां
चतुर्थे पशुप्रश्ने पञ्चमः पटलः॥ ५॥

इति हिरण्यकेशिसूत्रव्याख्यायां चतुर्थः प्रश्नः॥ ४॥

अथ पञ्चमप्रश्ने प्रथमः पटलः।

यद्यपि राजसूये हि चातुर्मास्यानि पठ्यन्ते तेषां हि दर्शपूर्णमासौ चातुर्मास्यानीति नित्येष्वपि पाठ उपलभ्यते स्मृतावपि चातुर्मास्यानि चैव हीत्यादौ तत्र तेषां राजसूये पठितानामत्र नित्यफलवत्त्वान्नित्यान्यपीत्यर्थः।

अक्षय्य१ ह वै सुकृतं चातुर्मास्ययाजिनः।

चातुर्मास्यैर्यजते स तथा तस्य सुकृतमक्षय्यफलत्वादक्षय्यं ह वै शब्दौ श्रुतिगतावेव पठितौ। हशब्दः प्रसिद्धमित्यर्थे। वैशब्दो ह्यर्थः। तस्माच्चातुर्मास्यैरवश्यं यष्टव्यमित्यर्थः। न चार्थवादात्फलकल्पनेति वाच्यम्। पक्ष एतेषामभ्यासस्य विधास्यमानत्वात्। न च काम्येष्वभ्यासोऽस्ति। अयं प्रयोगो नित्यानामेव काम्यप्रयोगस्याग्रे स्वयमेव वक्ष्यमाणत्वात्। चतुर्षु चतुर्षु मास्यानीति यागानां गृहमेधीयत्रैयम्बकपरिचर्याभ्यां दर्विहोमाभ्यां सहितानां नामधेयं यजतिचोदितत्वेन यागानां समुदायस्य। तथा चातुर्मास्यैर्यक्ष्ये तैर्यज्ञनारायणं प्रीणयानीति संकल्पः। अन्वारम्भणीयार्थमृत्विग्वरणम्।

तान्यालभमानः फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा पूर्वस्य पर्वण औपवसथ्येऽहनि पञ्चहोतारं मनसाऽनुद्रुत्य सग्रहꣳ हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपति वैश्वानरं द्वादशकपालं पार्जन्यं चरुम् ।

तानीति बहुवचनं नानापर्वसु क्रियमाणत्वेन फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा पौर्णमास्यामालभमानः । पूर्वस्य पर्वण इत्यन्वयः । पौर्णमासीग्रहणं प्रतिपन्निवृत्त्यर्थं हुत्वा निर्वपतीति समानर्त्विक्त्वख्यापनार्थम् । अग्निगुणको वैश्वानरो द्रष्टव्यः । याज्यापुरोनुवाक्ययोर्विशिष्टाभिधानात् । तस्मादग्नये वैश्वानराय जुष्टमित्यादि पर्जन्यदेवताकं चरुम् । पौर्णमासं तन्त्रं पौर्णमासीसमीपे क्रियमाणत्वात्तद्यस्कालत्वाच्च प्रत्येकमग्निप्रणयनम् । स्पष्टमन्यत् । हिरण्यं वैश्वानरे धेनुं पार्जन्ये । दक्षिणा अङ्गेष्वामपि वचनात् ।

वैश्वदेवेन यक्ष्य इति संकल्प्य—

प्राचीनप्रवणे वैश्वदेवेन यजते ।

प्राचीनप्रवणता नियम्यत उदीचीनप्रवणताप्रागुदक्प्रवणतासमतास्वपि प्राप्तासु । तादृशे देशे । विश्वे देवा देवता यस्याः सा वैश्वदेव्यामिक्षा तस्याः शाखाहरणेन मुखतः प्रवृत्तत्वान्मुख्यत्वं बलीय इति सर्वस्य कर्मसमुदायस्यैतयोपलक्षितस्य नामधेयं वैश्वदेवमिति । सौम्यद्यावापृथिव्ययोर्मारुतामिक्षाभ्यां समत्वादभेदकत्वान्न तन्त्रप्रयोजकत्वमिति मुख्यत्वमेव बलीयः । ब्राह्मणे तु यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमिति वा निर्वचनम् । समुदायनामधेयस्य मुख्यत्वात्तन्त्रं त्वामावास्यमेव । आमिक्षायाः पयोविकारत्वादित्युक्तमेव ।

उद्वसायानुद्वसाय वा ।

गृहेभ्योऽन्यत्र गत्वा तेष्वेव वा प्राचीनप्रवणतां संपाद्य यजेत । अन्वारम्भणीया तु प्राकृत एव विहारे । वैश्वदेवार्थमेव प्राचीनप्रवणता तथैव विधानात् ।

अग्नेराहृताऽग्निं प्रणीय ।

नित्यधार्यान्यस्य प्रणयने प्राप्ते तत्र धर्मवत्ता विधीयते । अग्नेरग्निप्रणयनस्याऽऽवृताऽग्निं प्रणीय तत्र पशावुक्तेऽग्निप्रणयने प्रणयनस्य धर्मास्तद्वता विधिनेत्यर्थः । गार्हपत्यादग्निप्रणयनं पशुबन्धवदिति वैखानसापस्तम्बोक्तेः । नोद्यतहोम इति च । अत्रैतावान्विशेषः—गार्हपत्येऽग्निप्रणयनानीत्यादि । यत्ते पावकेति च न होमः । पूर्वो यत्सन्न परो भवासीतिलिङ्गविरोधात् ।

---

१ घ. ज. झ. ञ. यजेत ।

अग्न्यायतन ऊर्णास्तुकां निधायाग्निं प्रतिष्ठाप्य ।

अग्नेरावृता प्रतिष्ठाप्येत्यनुवज्यते । उक्तं वैखानसेन—तद्वदायतने प्रतिष्ठाप्येति । नोत्तरवेदिमुपवपतीति प्रतिषेधाद्यज्ञोत्पत्तौ प्रतिषिद्धं सर्वं प्रतिषिध्येतेत्युक्तत्वात् । उत्तरवेदिप्रतिषेधात्तत्संस्कारार्था व्याघारणादयो गुग्गुलुसुगन्धितेजनपीतुदारुपरिधयो निवर्तन्ते । वचनादूर्णास्तुका विधीयते । नात्र समारोपः प्रधानवत् । स्थानान्तरे गृहेऽपि गन्तुं समारोपः स्यात्कात्यायनोक्तेः । तं मथित्वा तेन परिसंख्यानात् । इद-मेवं वक्तुमग्न्यायतन इत्याद्युक्तम् । प्राकृत एवाऽऽयतने मन्त्रेण प्रतिष्ठापनं प्रणीताग्नि-संस्कारकत्वादन्यत्सर्वमितः परं समन्त्रमग्निसंस्कारभूतं कर्तव्यम् । तदुक्तं भारद्वाजेन—यदन्यदुत्तरवेद्या उपवपनात्सर्वं क्रियत इति । अत एव पशुबन्धवदिति नोक्तमुत्तरवेदेर-भावात् । प्रणयनं प्रतिष्ठापनादि समन्त्रं वक्तुमग्नेरावृतेति वचनम् । अजस्रेऽपि प्राचीन-प्रवणता यागाङ्गत्वात्कर्तव्या । नित्यधार्येऽपि प्राचीनप्रवणतां संपाद्याऽऽयतने केवलं तूष्णीं निधाने नान्यत्तदग्निमपि ।

अग्नीनन्वाधायाऽऽमिक्षायै वैश्वदेव्यै
सायंदोहाय वत्सानपाकरोति ।

अग्न्याधानस्याख्यापनार्थं प्राप्तानुवादः । आमिक्षायै प्रयोजनमिति सायंदोहो यद्यपि न प्रधानभूतं हविरपि तु तत्संस्कारार्थस्तथाऽपि तत्र दोहधर्माः सन्त्येवेत्युक्तम् । लौकिकेन दध्नाऽऽमिक्षापक्षव्यावृत्त्यर्थं बौधायनोक्ततूष्णींसायंदोहपक्षस्य च । विश्वे च ते देवाश्च विश्वे(श्व)देवास्ते देवता यस्या इति तद्धितोत्पत्तिः सा तथा सति कर्मधारये प्रत्ययो न तु पदद्वयादिति वैयाकरणं निर्णयता(?) विश्वेभ्यो देवेभ्यो वत्सानपाकरोतीति युक्तं चैतत् । यदुक्तं वत्सानपाकरोति शाखाहरणादिविधिनेत्यर्थः ।

सप्तदश सामिधेन्यः ।

इध्मे काष्ठविवृद्ध्यर्थमत्र वचनम् ।

प्रसूनं बर्हिस्त्रीन्कलापान्संनह्यैकध्यं पुनः संनह्यति ।

प्रसूनं प्रसवयुक्तं पुष्पितमिति यावत् । लूनप्ररूढमिति केचित् । त्रीन्कलापानभि-धानान्यपि त्रीण्येव कर्तव्यानि । एकैकस्य वा निधनस्य शुल्बे संनह्यैकधा संनह्यति ।

एवमिध्मम् ।

प्रसूनमित्यप्यतिदिशन्ति केचित् । प्रसूनवृक्षस्यैकस्येध्ममाहरति । त्रयोविंशति-धेत्यूहः ।

पूर्वोक्तं स्पष्टयति—

---

१ भ. ट. द. °न्कपालान्सं° । २ ठ. °न्कपालानभि° ।

पुनःसंनहने धर्मः ।

मन्त्राद्या धर्मा अङ्गानि पुनःसंनहन एवेत्यर्थः ।

पात्रसꣳसादनकाले यथार्थं पात्राणि प्रयुनक्ति जुहूं द्वे चोपभृतौ पृषदाज्यधानीं द्वितीयां ध्रुवां द्वे आज्यस्थाल्यौ दधिधानीं द्वितीयां पात्रीꣳ वाजिनपात्रꣳ स्रुचं चमसं वा ।

सायंदोहस्याऽऽवृता सायंदोहस्तदन्तानि कर्माणि कृत्वा श्वोभूते कर्मणे चामि-क्षायै । ततः पात्रसंसादनकालस्तस्मिन्नागत इत्यर्थः । चमसस्रुचोस्तूष्णीमेव संमार्गः । जुहूशब्दप्रयोगाद्वैश्वदेवस्य पौर्णमास्यामेव विधानात् । पूर्वेद्युरन्वाधानादिकमुक्तं भवति । तस्पष्टमेवोक्तमापस्तम्बवैखानसाभ्यां सायंदोहं दोहयति सांनाय्यवदिति च श्वोभूत इत्यादि च । स्पष्टमन्यत् । सायमग्निहोत्रं यवाग्वा कुर्वन्ति तदुच्छेषणमातञ्चनार्थमित्या-दिकं सांनाय्यवदेतद्यजमाने वक्ष्यते ।

निर्वपणकाल आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुमेतानि पञ्च संचराणि ।

एतानि हवीꣳषि वरुणप्रघाससाकमेधशुनासीरीयपर्वसु संचरन्तीति वाक्याति-देशेन विहितान्येव गच्छन्तितथैतदितिकर्तव्यताकानि । एतद्ब्राह्मणान्येव पञ्च हवीꣳषीति श्रुतेः ।

मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमुत्तरेषु पर्वसु सावित्रमष्टाकपालमेके समामनन्ति ।

आमिक्षां निर्वपेदित्यपि संबध्यते । पयस्यां निर्वपेदिति वचनात् । ननु निर्वापो नास्तीति चेत्सत्यं, यथाऽन्यत्र निर्वपतिना यागोऽवसीयते तथाऽऽमिक्षायागं करोती-त्यर्थः । एवमाग्नेययागमित्याद्यपि ज्ञेयम् । सावित्रं वरुणप्रघासादिषु सर्वेषां हविषामन्ते ।

त्रिष्फलीकृतेषु विभागमन्त्रेण पौष्ण-मपाच्छिद्य सह पुरोडाशैः पिनष्टि ।

पौष्णस्येतिकर्तव्यता शाखान्तरेऽत्र दर्शिता सा चरुत्वख्यापनार्थं पूर्वमुक्ताऽत्र श्रुतिस्था प्रख्यायत इति न पुनरुक्तम् ।

प्रातर्दोहस्याऽऽवृता प्रातर्दोहं दोहयति तप्ते प्रातर्दोहे सायंदोहमानयत्यामिक्षां करोति

---

१ ड 'कृत्याख्याना' । २ च. ट. 'तिप्रासा व्याख्या' ।

संहृतामन्यस्मिन्पात्र उद्धृत्य वाजिनेनोपसिच्य प्रज्ञातां निधायोत्करे वाजिनशेषं निदधाति ॥ १ ॥

मारुतान्तानि कपालान्युपधाय प्रातर्दोहस्याऽऽवृता वत्सापाकरणादिविधिना प्रातर्दोहं दोहयति तस्मिंस्तप्ते प्रातर्दोहे दुग्धे सायंदोहं दधिकुम्भमानयति । तेन कर्मणाऽऽमिक्षां करोति । संहृतां घनीभूतामन्यस्मिन्पात्र उद्धृत्य या संहृता साऽऽमिक्षा यद्वर्वं तद्वाजिनमित्युक्तं भवति । तथैवाऽऽपस्तम्बवैखानसभारद्वाजादिभिरुक्तम् । अन्यस्मिन्पात्रे तां कुम्भीत उद्धृत्यान्यस्मिन्वाजिनमित्यर्थादन्यस्मिन्पात्रे वाजिनमिति वैखानसः । द्रुघोरिति भारद्वाजापस्तम्बौ । वाजिनैकदेशेनाऽऽमिक्षामुपसिच्य प्रज्ञातां निधाय वाजिनैकदेशमप्युत्करे निदधाति । अत्रैवोद्धरणनिषेचनं भारद्वाजेनोक्तम् । तथा कृत्वैककपालमुपदधाति । अथवोत्करे वाजिनशेषं निदधातीति वचनात् । उद्वासनकाल एवेदमामिक्षां कृत्वैककपालमुपधाय तत उद्वासनकालेऽन्यस्मिन्पात्र इत्यादि । तथैवाऽऽपस्तम्बवैखानसाभ्यामभिधानात् । श्रुतिपाठमनुसृत्योक्तमङ्गजातं क्रमस्तु सामर्थ्येन ज्ञेय इति न दोषः । दृश्यते चान्यत्रापि चषालस्य करणकाल एव यूपाग्रे प्रतिमोचनमप्युक्तम् ।

संयुतानां पिष्टानां विभागमन्त्रेण पौष्णमपाच्छिद्य चरुकल्पेन श्रपयति ।

कृतव्याख्यानम् । मदन्तीनां कृतकार्यत्वात्पाकार्थमन्यदेवोदकं ग्राह्यम् ।

उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यत आज्येन दध्ना चोदेहीति संप्रैषस्यान्तः संनयति ।

पशौ कृतव्याख्यानम् । अत्रोत्करे वेदिधर्मा इत्युक्तम् ।

फाल्गुन्यां यथा पशावेवं पृषदाज्यं गृह्णाति ।

पशुवदिति वक्तव्ये गुरुनिर्देशेनोक्तं यथा पशौ श्रुत्या विहितमेवमेव फाल्गुन्यां विहितं नत्वतिदेश इति ।

चैत्र्यां तु द्विराज्यस्योपस्तीर्य द्विर्दधि गृहीत्वा सकृदाज्येनाभिघारयति ।

तत्र संसृष्टं पञ्चगृहीतमुक्तमत्र पुनर्द्विराज्येनोपस्तीर्येत्यादिना दध्न एव हविष्ट्वमाज्यस्योपस्तरणाभिघारणार्थत्वमिति तत्तु पूर्वोक्तेन विरुध्यते पृषदाज्येनानूयाजान्यजतीति श्रुतेरविशिष्टत्वाद्दध्नाऽनूयाजा इत्यनभिधानाच्च । तस्मादुपस्तरणाभिघारणशब्दौ व्याख्येयौ । आज्यस्येति कर्मषष्ठी । तेनाऽऽज्यमुपस्तीर्येत्ययमर्थो भवति पृषदाज्यवदन्याज्यमुपस्तरणं न संस्कारकं संस्कार्यत्वात्तत्रेत्यर्थाद्द्विर्दधि गृह्णाति तते प्रातर्दोह इतिवदधिकरणस्यापि संस्कारो भवत्याज्यस्य । तथाचोपस्तीर्णमाज्यं द्विर्दधिग्रहणेन

संस्कृत्य तृतीयानिर्दिष्टेनाऽऽज्येनाभिघारणेन संस्कृतस्याऽऽज्यस्यैव संस्कारः। एवं मनसि निधाय श्रुतिरेव पठिताऽऽज्यस्योपस्तीर्येति तथाऽऽज्येनाभिघारयतीति च। ततस्तु पञ्चभिर्मन्त्रैर्गृह्णाति।

उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते।

मारुतमुद्वास्याऽऽमिक्षामुद्वासयति।

अन्यस्मिन्पात्र एककपालमुद्वास्य प्रभूतेन सर्पिषाऽऽप्यानीयाऽऽविष्पृष्ठं करोति।

अपूर्वत्वाल्लौकिकेनाभिपूर्य पात्रे यथा पुरोडाश आविर्भूतं प्रकटमग्रं पृष्ठं यस्येति तथा। अलंकरणकाल इत्यापस्तम्बः।

व्याहृतिभिर्हवींष्यासादयति तथा संवत्सरे।

हवींषीत्युक्तत्वाद्वाजिनं तूष्णीमेवोत्करे तथा संवत्सरेऽतीते व्याहृतिभिरेव हवींषि चातुर्मास्येष्वासादयेत्। एतदन्यस्तचातुर्मास्यविषयम्।

निर्मन्थ्यस्याऽऽवृता निर्मन्थ्येन प्रचरति।

गतार्थम्।

वेदं निधाय सामिधेनीभ्यः संप्रेष्यति।

क्रमानुवाद उत्तरविधित्सया।

नव प्रयाजान्यजति चतुर्थे समानीयाष्टमे सर्वं समानयते।

कृतव्याख्यानं पशौ नवमोऽन्त्यविकारः। समिधो यजेति प्रथमं यज यजेत्युत्तरान्।

सर्वत्रोपांशु सावित्रैककपालयोर्देवता यजति।

अत्रान्यत्र च यत्र यत्रैतौ। स्पष्टमन्यत्।

कृत्स्नमेककपालमवदायाऽऽश्रयमनुप-र्यस्यन्स्रुचि प्रतिष्ठितमपर्यावर्तयञ्जुहोति।

आशयेनैवोपस्तरणं सर्वमवदायोपरि पूरितमाज्यं सेचयित्वर्जुमुखं पूर्वदिशि प्रतिष्ठितं प्रक्षेपोत्तरकाले यथा हुत एव तिष्ठेत्तथाऽपर्यावर्तयन्नुत्तानमकुर्वञ्जुहोति। आशयमेव पुरस्तादुपरिष्टाच्च प्रक्षिपति।

यदि हुतः पर्यावर्तेत वरे दत्ते स्रुचोऽग्रेण कल्पये-त्प्रत्यादाय वा पुनर्जुहुयान्न पाणिनेत्येकेषाम्।

आध्वर्यवे वरे दत्ते स्रुचोऽग्रेण समं कुर्याद्धस्तेन वाऽवदाय पुनर्जुहुयात्स्रुचा वेत्ये-केषां पुनर्होम आश्रावणादिना।

---

१ ख. ग. घ. ङ. ज. झ. ञ. ठ. ड. ढ. ण. 'हवींषि'।

मधुश्च माधवश्चेति चतुर्भिर्मासनामभिरेककपाल-
मभिजुहोति मधवे स्वाहा माधवाय स्वाहेति वा ।

मन्त्रान्ते स्वाहाकारः । शाखान्तरीयाः स्वाहाकारान्ता एव पठिताः । मासनामभि-रित्यागामिभिस्तेन फल्गुनीपूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्येति चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्येत्युभयत्र संवत्सरप्रवृत्तिदर्शनान्मध्वादिसंज्ञाः फाल्गुनं चैत्रं वाऽऽरभ्य ज्ञेयाः ।

पृषदाज्येन नवानूयाजान्यजति ॥ २ ॥

पशौ कृतव्याख्यानम् । देवान्यजेति प्रथमम् । यज यजेत्युत्तरान् । त्रयस्त्रय एकै-कस्य विकारा इति याजमाने वक्ष्यति । प्रथमाष्टमनवमानां प्राकृतत्वाद्द्वितीयादयः क्रमेण त्रयाणां विकारा द्वौ द्वावेकैकस्य मान्त्रवर्णिक्यो देवताः । देवतापदानां षष्ठ्य-न्तानामन्तेऽहं देवयज्ययेत्यादि यथाप्रकृतिविकारं ज्ञेयम् ।

संवत्सरीणा स्वस्तिमाशास्ते दिव्यं धामाऽऽशास्त
इति सूक्तवाकस्याऽऽशीःषु होताऽनुवर्तयति ।

वैशेषिकमिदं दिव्यं धामाऽऽशास्त इत्येतस्मात्पूर्वं संवत्सरीणा स्वस्तिमाशास्त इति होताऽनुवर्तयति दिव्यमित्यनुवृत्तं करोति ।

प्रहृतेषु परिधिषु संस्रावेणाभिहुत्य वाजिनेन प्रचरति ।

यत्र परिधिप्रहरणं तत्र संस्रावेणाभिहोम इति वक्तुमुक्तं प्रहृतेष्वित्यादि । तेन प्रहृत्य परिधीञ्जुहोतीति वाजिनब्राह्मणेन न विरोधः । समिद्धोमस्य प्रहरणाङ्गत्वादि-त्यर्थः । वाजिनयागस्यात्र काल इत्यर्थः ।

वाजिनपात्र उपस्तीर्य बर्हिषि विषिञ्चन्वा-
जिनं गृह्णाति पूरयित्वा नाभिघारयति ।

उत्कर आसादितं तस्मात्पात्रात्स्रुचा गृह्णाति विषिञ्चन्स्कन्दयन्बर्हिषीति वैखा-नसः । अन्तर्वेदीत्यापस्तम्बः । तेन वाजिनपात्रेऽन्तर्वेदि स्थिते पूरयतीत्यनेनोक्तं नाव-द्यानधर्म इति पात्रपूरणं यावद्भवति तावद्गृह्णाति । अत्र याजमानं पञ्चहोता ।

वाजिभ्योऽनुब्रूहि वाजिनो यजेति संप्रेष्यति ।

यथाक्रमम् ।

ऊर्ध्वज्ञुरासीनो होताऽनवानं यजति ।

ऊर्ध्वजानुर्न पातितजानुः । तिष्ठतोर्ध्वज्ञुत्वं मा भूदित्यासीन इत्युक्तम् । सर्वत्र हौत्रकर्मख्यापनं याजुषहौत्राभिप्रायेणाऽऽध्वर्यवकाण्डपठितत्वादत्र व्याख्यानं श्रुतेः कृत-मित्युक्तं न विस्मरणीयम् । अनुच्छ्वसन्यजति याज्यापुरोनुवाक्ययोरर्धर्चे विराममकृत्वेत्यर्थः ।

वषट्कृते विषिच्यमानया जुहोति ।

विषिच्यमानया स्रुचोपलक्षणं चमसस्यापि । चमसेन स्रुचा वा स्रावयञ्जुहोतीति वैखानसः । वाजिभ्य इदम् । वाजिनामहं देवयज्ययेन्द्रियावी भूयासं जेमानमिति वा हविर्विकारत्वात् । अनुवषट्कृते तु स्विष्टकृद्याजमानं न भवत्विति त्रयाणां ह वै हविषां स्विष्टकृते न समवद्यन्ति सोमस्य घर्मस्य वाजिनस्येत्यापस्तम्बोक्तश्रुतेः ।

वाजिनस्याग्ने वीहीत्यनुयजति ।

पूर्ववदेव याजमानम् । अग्नय इदम् । वाजिनामहं देव० ।

वाजिनोद्रेकेण दिशः प्रतियजति यथा वसाहोमोद्रेकेण ।

नायमतिदेशः समानश्रुतित्वेन दर्शितमिति गुरुनिर्देशेनोक्तम् ।

समुपहूय सर्वे वाजिनं भक्षयन्त्यन्योन्यस्मिन्नुपहवमिच्छन्त उपहयस्वेत्यामन्त्रण उपहूत इति प्रतिवचनः ।

आमन्त्रणप्रतिवचनाभ्यामन्योन्यस्मिन्नुपहवमिच्छन्तः कुर्वन्तो वाजिनमुपहूयानुज्ञाप्य वाजिनं भक्षयन्तीत्यर्थः । शेषमिति भरद्वाजापस्तम्बौ । तन्नेष्टम् । वाजिनमिति निर्देशादुत्करस्थमेव । मन्त्र इति शेषः । कर्मनामधेयेनेत्यापस्तम्बः । तेन होतरुपह्वयस्वेत्येवमन्येषामामन्त्रणं ब्रह्मन्नध्वर्योऽग्नीद्यजमानेत्यादि स्वव्यतिरेकेण ज्ञेयम् । क्रमोऽप्ययमेव भारद्वाजेनोक्तः । प्रतिवचनमुपहूत इत्येतावदेव । उपहूतोऽनुज्ञात इत्यर्थः ।

वाजिनां भक्षो अवतु वाजो अस्मान्नेतः सिक्तममृतं बलाय । स न इन्द्र इन्द्रियं द्रविणं दधातु मा रिषाम वाजिनं भक्षयन्तस्तस्य ते वाजिन्वाजिभिर्भक्षं कृतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति भक्षयन्ति ।

प्रत्येकं मन्त्रः ।

यजमानः प्रथम उत्तमो वा ।

भक्षयतीति शेषः । प्रथम इत्यत्र तमारभ्योपहवोऽन्येषाम् ।

श्वोभूते पौर्णमासेनेष्ट्वोदवसायानुदवसाय वा ।

प्रतिपदि पौर्णमासेनेष्ट्वा ततो गृहेभ्योऽन्यत्र तेष्वेव वा वक्ष्यमाणं कर्तव्यम् ।

प्रसूता देवेन सवित्रा दैव्या आप उन्दन्तु दीर्घायुत्वाय वर्चस इति शिरोऽभ्युनत्ति ।

मन्त्रलिङ्गादद्भिरुन्दन्ति क्लेदयन्तीत्यर्थोऽवगम्यते । तत उदिधातोः अभ्विकरणस्यस्यैतद्रूपमभिपूर्वस्याभ्युनत्तीति ।

---

१ घ. ङ. ज. झ. ञ. ढ. °मास्येष्ट्वो° ।

ऋतमेव परमेष्ठ्यृतं नात्येति किंचनर्ते समुद्र आहित
ऋते भूमिरियꣳ श्रिताऽग्निस्तिग्मेन शोचिषा
तप आक्रान्तमुष्णिहा शिरस्तपस्याहितं वैश्वानरस्य
तेजसर्तेनास्य निवर्तये सत्येन परिवर्तये तपसाऽ-
स्यानुवर्तये शिवेनास्योपवर्तये शग्मेनास्याभिवर्तय
इति त्रेण्या शलल्येक्षुशलाकया वा केशान्विनायन् ।

त्रीणि श्वेतानि यस्यां सा तया शलली मृगविशेषो येन बाणैः स्वशरीराच्छूलाकारैः पिच्छैर्विमुक्तैः प्राणिनो विध्यन्ते तच्छूलाकारोऽवयवोऽपि शलली तादृश्येक्षुपत्रान्तः- शलाकया वा शिरोगतान्केशान्विनायन्विनीतानम्रान्कुर्वन् ।

लोहेन क्षुरेणौदुम्बरेण केशान्निवर्तयति ।

पूर्वोक्तमन्त्रेण निवर्तनलिङ्गेन निवर्तयति तूष्णीं विनायन्निवर्तनं छेदनं कतिपयाना- मेवाग्रे सर्वमिति विकल्पदर्शनात् । लोहं कालायसं तस्य विकारेण क्षुरेण ताम्रयुक्तेन लोहितायसेन निवर्तयत इति श्रुतेः । लोहितं ताम्रं तेन युक्तमायसमिति श्रुत्यर्थः । तद्व्रतमिति याजमानम् ।

वपति श्मश्रूणि सर्वं वा वापयते ॥ १ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे पञ्चमप्रश्ने प्रथमः पटलः ॥ १ ॥

वपति वापयतीतिश्रुतिद्वयगतोऽनूदितो न भिन्नार्थो नापि परस्मैपदात्मनेपदाणि- च्प्रयोगैरन्योऽर्थोऽभिधीयते । शक्तोऽध्वर्युरेवाशक्तो नापितो वपति ।

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां पञ्चमे चातुर्मास्यप्रश्ने प्रथमः पटलः ॥ १ ॥

इति वैश्वदेवपर्व ।

अथ पञ्चमप्रश्ने द्वितीयः पटलः ।

ततश्चतुर्षु मासेष्वाषाढ्यां श्रावण्यां वा वरुणप्रघासैर्यजते ।

आरम्भानुसारेण व्यवस्थया विकल्पः । चतुर्ष्वेव मासेषु व्यतीतेषु वरुण उत्तरे विहार आमिक्षाया देवता दक्षिणे मरुतस्त एव प्रकृष्टो घासो येषामिति करम्भभाक्त्वेन प्रघासशब्देनोक्ताः । प्रघास्यान्हवामह इति मन्त्रलिङ्गाच्च । ताभ्यां देवताभ्यामुभयवि- हारगतकर्मसमुदायो लक्षितस्तदेव नामधेयं ज्ञेयम् ।

तयो वैश्वदेवेन कल्पो व्याख्यातः ।

यथा वैश्वदेवे पूर्वेद्युरन्वाधानादिविधिरेवमत्रापि सायंदोहान्त एतद्ब्राह्मणान्येव पञ्च हविंष्षीति ब्राह्मणेनातिदिष्टो व्याख्यातो वैश्वदेवकर्मणो यः कल्पः स वैश्वदेव एतत्त-दतिदेशेनेत्यर्थः । तेषां वरुणप्रघासलक्षणानां कर्मणां पूर्वत्र समुदायमात्रं वाच्यमित्येक-वचनमत्रोद्भूतावयवाः समुदायिनः सप्त बहुवचनान्तदेवतापदलक्ष्या इति बहुवचनम् । उदवसायानुदवसायेति पूर्ववद्विकल्पेन ।

द्वावाहवनीयावुभयत्राऽऽवापः कृत्स्नमुत्तरे विहारे तन्त्रं क्रियते तथा दक्षिणे ।

आहवनीय एक एवाऽऽधानेन साधित इति तस्यैव द्विस्थानावस्थित्या द्वित्वमाह । तेनाजस्ते प्रणयनं विभज्य स्थापनम् । उत्तरवेदिस्तत्संस्काराश्च न स्युः । नत्वाऽऽहवनी-यवद्वितीय इति वाच्यम् । एकेनैव प्रातिपदिकेनोभयोर्मुख्यत्वावगतेः । प्रणयनकाले प्रणयेत इति शेषः । आहवनीयात्तु प्रणयनपक्षे द्वौ भाविसंज्ञयाऽऽहवनीयावमुख्यावेव । अत्र प्रदर्शनं विहारद्वयकरणहेतुत्वख्यापनार्थम् । उभयत्राऽऽवाप उभयोराहवनीययोरा-वापः प्रधानयागो यस्मिन्कर्मणि तत्तथा तादृशं कृत्स्नं साङ्गमुत्तरे विहारे तन्त्रं कर्म करोतीत्यर्थः । नह्यत्र विहारद्वयमस्ति । त्रेताग्न्यायतनानि शालाविहारः । नह्युभयमु-भयत्र साकल्येनास्ति । तस्मान्मुख्यं गार्हपत्यमवलम्ब्यैकविहार एवोत्तरदक्षिणाव-भागाभ्यां विहारद्वयं वाच्यम् । न च गार्हपत्यस्याग्रे कृत एक उत्तरो भवति । कस्मा-दुत्तर इति ज्ञातुमशक्यत्वाद्दक्षिणविहारस्याद्यापि स्थानानिर्देशात्परस्परापत्तेश्च । तस्माद्विहारभागौ विहारौ तादृशमेव दक्षिणे विहार इत्यत्रापि संबध्यते । यः प्रधान-स्यापि सोऽङ्गानां स देशः स कर्मेति द्वयोः प्रधानानां क्रियमाणत्वाद्देशकर्तृभेदा-दुभयत्राप्यङ्गानि कर्तव्यानीत्यर्थः । उभयत्र दक्षिण उत्तरे प्रक्रमयेते इति वक्तव्ये तथा दक्षिण इति निर्देशो येनाध्वर्युकर्तृकेनैव प्रैषादिना तन्त्रेण सिद्धिस्तत्रोभयत्र मा भूदिति वक्तुं सादृश्यमतिदिष्टम् ।

अध्वर्युर्गार्हपत्यसंयुक्तानि ।

कर्माणीति शेषः । उभयोरपि विहारयोर्गार्हपत्यस्यैकत्वात्कर्तृभेदेऽपि वचनात्प-त्नीसंयाजा अपीत्यर्थः । परार्थान्येकेनेति न्यायात्साधारणानीति वक्ष्यमाणत्वादन्वाधान-परिस्तरणे तु सकृदेव कर्तव्ये ते मुख्यत्वादध्वर्युणेति प्राप्ते सूत्रारम्भसामर्थ्यात्पत्नीसं-याजाः संपत्नीयहोमश्च । तर्ह्यध्वर्युर्गार्हपत्य इत्येवास्तु तन्त्रमित्यनुवर्तनीयमिति चेन्न । कपालोपधानादि सर्वं च प्राप्नुयात्तन्मा भूदिति । तर्हि पत्नीसंयाजसंपत्नीयमेवम(वा)स्तु केमर्थं ज्ञानगौरवमिति चेत्, उच्यते—संयुक्तवचनेन यानि संयुक्तानि तान्यपि जैमिनि-न्यायविरोधे सत्यपि वचनस्य बलीयस्त्वात्पत्नीसंयाजाख्यान्यप्यध्वर्युरेव कुर्यादि-

स्युक्तं वचनं वाजसनेयिनामध्वर्युरेव प्रतिपरेत्य पत्नीः संयाजयत्युन्नास्त एव प्रति-प्रस्थातेति । संपत्नीयमपि पत्नीसंयाजग्रहणेन गृह्यते । भरद्वाजोऽपि—अध्वर्युरेव पत्नीः संयाजयतीति । न्यायमत्राश्रयणेनाऽऽपस्तम्बेनोक्तमुभयोः पत्नीसंयाजा इति ।

यानि साधारणानि ।

साधारणान्येकरूपाणि साधारणपदार्थस्य संबन्धीनि तानि चाध्वर्युरेव । तानि च परिगणितानि कात्यायनेन—प्रणीतापत्नीसंनहनाग्निमन्थनाश्रुतप्रत्याश्रुतप्रैषयजमानवाचन-होतृषदनवरणप्राशित्राङ्गुलिपर्वाञ्जनावान्तरेडाभागापराग्न्यवभृथान्न प्रतिप्रस्थातेति । तत्र मन्थनाग्निपराग्निहोमावभृथास्तु वचनादन्ये विभवादिति व्याख्यानमभियुक्तैः ।

तन्त्रमङ्गानां हौत्रं तदध्वर्युः संप्रेष्यति ।

इष्टोऽधिकः पूर्वस्यापि ग्रहणार्थत्वेनार्थवान्यानि साधारणानि तत्र सकृत्कृतेनोभय-पदार्थोपकारस्तन्त्रम् । अङ्गानां होतुः कर्म तन्त्रं सकृदेव विभवात् । अङ्गेति प्रधान-हौत्रव्यावृत्त्यर्थं तत्र याज्याद्यन्यत्वादसंभवात्तन्त्रस्य । तदध्वर्युरेव संप्रेष्यति न प्रति-प्रस्थाता । प्रधानं प्रतिप्रस्थाताऽपि । यः प्रैषाहृतसंस्कारस्तस्यैकस्यैव तत्कार्यमप्येक-मेवातस्तस्य प्रैषस्य कृतत्वान्नान्येन कृतस्यापेक्षा । प्रधानाभिक्षाव्युत्पादनार्थं तन्त्रमङ्गा-नामित्युक्तं तत्र क्रमभावपृथग्देवताप्रकाशपुरोनुवाक्यायाज्ययोः प्रतिप्रस्थातैव ।

एकवदग्निसंयुक्तानि ।

अग्निराहवनीयः । तत्संयुक्तानि वाचकानि एकपदानि प्रयोक्तव्यानीति शेषः । एक एकोऽर्थः प्रतिपाद्यत्वेन विद्यते यस्मिन्कर्मणि तत्तथा, कृतविशेषणं नपुंसकलिङ्गं, हौत्रे तन्त्रेण प्रैषो यत्र प्राप्तस्तत्राग्नये प्रणीयमानायानुब्रूहीत्यत्राग्निद्वयविषयत्वादुभ-याभिधानायाग्निभ्यामिति प्राप्त उक्तमेकवदिति । एक एवाग्निरित्युक्तं तस्य च द्विस्थानावस्थितत्वेऽप्येकत्वमेवेत्यर्थः ।

पर्यायभूतान्यपि तद्वाचकानि सर्वत्रैकत्वयुक्तानि प्रैषाणाह—

सामिधेनीष्वग्निप्रणयनेऽग्निसंमार्जने च ।

प्रथम उदाहरणे प्रसङ्गाद्धौत्रतन्त्रे चाग्नीत्प्रैषमात्रे तृतीयम् । एकवदिति त्र्यसाधारणं प्रणयनोदाहरणस्य प्राथम्येऽपि भरद्वाजोदाहृतस्याग्निभ्यां समिध्यमानाभ्यामनुब्रूहीत्ये-वमग्निसंमार्जन इत्यस्याऽऽदौ बुद्धिस्थस्य निराकरणतया प्रथममुदाहृतम् । न्यायसूत्र-मिदम् । तेन सामिधेनीष्विति वचनात्सामिधेनीविषये सर्वत्र । तत्र नैवमूहेदिति प्रतिषेधोऽप्यनुगृहीतः । प्र वो वाजा इत्यादावग्निपदं नोह्यं द्विवचनान्तत्वेनेत्यपि । याजमाने च समिद्धो अग्निरित्यादौ चोदाहरणत्वम् । द्वितीयोदाहरणेऽग्नये प्रणीयमानाय

---

१ ख. ग ठ. ड ण. न चैवमू ।

प्र देवं देव्या इत्यादावित्यपि ज्ञेयम् । नचाग्ने वाजजिदित्यत्रापि प्राप्तिरिति उभयत्र सकृत्कर्तुमशक्यत्वात् । प्रदेशभेदान्मन्त्रावृत्तिश्च ।

उभौ ब्रह्माणमामन्त्रयेते द्विवद्ब्रह्माऽनुजानाति ।

उभावध्वर्युप्रतिप्रस्थातारौ ब्रह्मन्प्रोक्षिष्यामीत्येवंप्रकारेण । अत्रायमाशयः—यद्यपि ब्रह्माऽध्वर्युणाऽऽमन्त्रित उभावपि प्रसवेनानुजानाति तथाऽपि अध्वर्युः कथं भविष्यत्क्रियाकर्तारं प्रत्यक्षाश्रावणमेकमेव प्रेर्यत्वेनोपस्थापयेत पुरुषैकवचनेन । तत्र प्रोक्षेत्येव प्रसवः स्यादुभयोर्न स्यात् । अथ प्रोक्षिष्याव इत्येवमामन्त्रयेते तथा च स चाहं चेत्यावां प्रोक्षिष्याव इत्येव स्यात्तत्रास्मद्युपपदे समानाधिकरणे स्थानिन्यप्युत्तमपुरुषविधानम् । तत्र द्विवचनेन सर्वादीनां यत्परं तच्छिष्यत इति परांचप्र(रावप्र)त्यक्त्वेन द्वयोरभिधानेऽपि परस्मिन्प्रत्यक्त्वमारोप्योत्तमपुरुषद्विवचनप्रयोगं कुर्यात् । यद्वाऽऽहुरन्योऽपि प्रत्यक्त्वेन वक्तुं न शक्यते तस्मान्मुख्येनैव प्रत्यक्त्वेन स्वं स्वमात्मानमभिदधात्येकवचनेन । ततश्च नेहोऽपि । वैदिकेनैव परेणाऽऽमन्त्रणमपि सिद्ध्यतीति द्वावपि ब्रह्माणमामन्त्रयेते । द्विवद्ब्रह्माऽनुजानाति । प्रणयतं यज्ञं देवता वर्धयत॰ मेता॰धत्तमित्यादिसंनामेनैव युगपत्क्रियोरुभावप्यनुजानाति । समानन्यायानामुपलक्षणमेतत् । निर्वप्स्यामीति निर्वपतम् । अगतम् ।

यत्राग्नी प्रणेष्यन्तौ भवतस्तस्मिन्देशे समे प्राची
वेदी कुरुतो ष्यङ्गुलेन त्र्यङ्गुलेन चतुरङ्गुलेन
पृथमात्रेण वा श्रोण्यंसमेत्रसंभिन्ने भवतः ।

परिभाष्येदानीं वैश्वदेवाद्विशेषमाह गार्हपत्यात्पूर्वेवेद्याग्निप्रणयने प्राप्तेऽपवादः प्रणयनकाले यत्र देशेऽष्टादिप्रक्रमेषु मध्ये येन प्रमाणेनाग्नी प्रणेष्याव इत्येवंकृतसंकल्पौ स्यातां तेन मानेन तस्मिन्देशे तं देशमभिव्याप्य वेदीं कुरुत इति संबन्धः । नह्येकस्मिन्देशे वेदिद्वयं कर्तुं शक्यम् । तथा प्रणयनं प्राचीनमेवातिदेशेन प्राप्तं तत्र मुख्यं संभवति द्वयोराहवनीययोरेकत्र तस्मान्मुख्याद्गार्हपत्यात्प्राचीन एकस्मिन्नेव देशे विभागौ कृत्वा यथासंभवं वेदी कुरुतः । न चैक एव मुख्योऽन्यस्त्वमुख्य इति । मुख्यगौणप्रदेशयोरेकत्वेन ग्रहीतुमशक्यत्वात् । वैश्वदेवे हि प्रकृतावेदिरायतनं चात्रोत्तरविहार उत्तरवेदिर्दक्षिणे चाऽऽयतनं तदुभयं वेद्योर्मध्य एव प्राप्तमतस्तयोरकरणे तत्र संभवतीति वेदिकरणमादौ प्राप्तम् । तत्र प्रकृतिवदिति वक्तव्ये तस्मिन्निति तद्देशसमीपे कर्तव्ये तत्र दक्षिणोत्तरविहारद्वयव्यवहारसिद्ध्यर्थम् न आहवनीययोरायतनं तु प्रकृतौ यद्यपि पुरस्ताद्वेदेर्दृष्टं तथाऽप्यत्र पाशुकप्रणयनं प्रणीताग्निरुत्तरवेद्यामेव प्रतिष्ठापनं प्राप्तं तत्रोत्त॰

१ ख. घ. ट. ण. 'त्तरे वि॰ ।

रस्यां वेद्यामुत्तरवेदिमुपवपतीति श्रुतेर्दक्षिणस्यां परिसंख्यातोत्तरवेदिस्तदा यज्ञोत्पत्तौ प्रतिषिद्ध इत्युक्तन्यायेन नोत्तरवेदिधर्माणां चित्तादीनां निवृत्तिवद्द्वेद्याः करणमपि निवर्तते तदर्थमुक्तं समे प्राची, इति। दैर्घ्येण प्रग्भागसमास्या च समे तत्राऽऽयतनं यदि पुरस्तात्क्रियेत तदा गार्हपत्यस्य तावदन्तरालमुत्तराहवनीयस्य ततोऽधिकं दक्षिणाहवनीयस्य स्यादिति मुख्यो दक्षिणोत्तरभावोऽपि न स्याद्द्वयोराहवनीययोस्तस्माद्द्वेद्यामेवाऽऽयतनमुत्तरवेद्याः पश्चिमतिरश्चीनरेखासमपश्चिमतिरश्चीनरेखमायतनं कुर्यादत एव समान्तरालसिद्ध्यर्थं द्वयोर्वेद्योर्गार्हपत्यान्मुख्यप्रकत्वासंभवात्किंचिद्दक्षिणोत्तरदेशभागाश्रयणेन करणं युक्तमेवं च बाहुल्यस्ततोऽप्युपपन्नो भवति। तस्मादग्न्योः प्रणयनमप्यष्टादिप्रक्रमैः किंचिदुभयतस्तिर्यगेव। न च दक्षिणवेदिरायतनात्पश्चादपि कर्तुं शक्यते प्रक्रमदेशसिद्ध्यर्थमिति वाच्यम्। पृथमात्राद्वेदी असंभिन्ने भवतस्तस्मात्पृथमात्रं व्यवधत्ताविति ब्राह्मणमनुसृत्य श्रोण्योरंसयोश्च द्व्यङ्गुलेनेत्याद्यन्तरालमुक्तं तत्समा श्रोण्यंसेषु स्यान्नान्यथेति दर्शयितुं तस्मिन्देशे समे प्राची, इति चोक्तम्। द्व्यङ्गुलादिप्रमाणेन परस्परमसंभिन्ने असंश्लिष्टे कर्तव्ये। पृथक्तु व्याख्यातस्त्रयोदशाङ्गुलः। श्रोण्यंसाश्लेषेण द्वे पाशुके दक्षिणा दार्शिक्युत्तरा पाशुकीति बौधायनवैखानसाद्युक्तमनभिमतमिति दर्शितम्। पूर्वाहवनीयावित्युक्तं तत्र गार्हपत्यात्प्रणयने तत्र स्थित आहवनीयो द्वेधा कार्यः। आहवनीयात्प्रणयनेऽपि पशुबन्धवदेकस्याऽऽहवनीयकार्यकरस्य प्राप्तौ तस्यैव द्वेधा करणं विधीयते। अस्ति च वरुणप्रघासेषु प्रस्थद्वयं यद्गार्हपत्यादाहवनीयाच्च प्रणयनं सूत्रान्तरेषु तथा दर्शनात्। आचार्यस्य तद्द्वयमिष्टं, कृतमिति तु न भूतनिर्देशोऽपि तु वर्तमाननिर्देशः। तेन यत्राग्नी प्रणेष्यन्ताविति वचनात्प्रणयनान्याश्रयत्वेन वेदिकरणमुक्तम्। अजस्रे प्रणयनाभावाद्वेदी उत्तरवेदिश्च बाधिता एव। पशुबन्धवच्चापूर्वं प्रणयनं विधीयते तदभावे कर्मवैगुण्यं स्यात्। न च द्वाराभावाद्बाधेऽपि न दोष इति अपूर्वं प्रणयनं पशुबन्धवदाहवनीयात्प्राप्तं तत्र न द्वाराभावः। न्यायविशारदा भट्टाचार्या अप्याहुस्तथा वचनमुदाहरन्तः। यदपि गार्हपत्यात्प्रणयनं नाऽऽपस्तम्बेनोक्तं तदनुगृहीतं शबरस्वामिना तदपि शाखान्तरादेव। तस्मादुभयमप्यस्माकमिष्टम्।

यदध्वर्युः करोति तत्प्रतिप्रस्थाता करोति ।

अत्र कृतानुकरः प्रतिप्रस्थातेति कात्यायनबौधायनाभ्यामुक्तं तत्क्रमभावित्वे कर्मणामुभौ ब्राह्मणमामन्त्रयेते इत्याद्ययुक्तं स्यादतः कृतानुकरणं प्रतिप्रस्थातुः पूर्वकालकर्तृत्वपरिसंख्यानार्थमुक्तं यदेव कर्माध्वर्युः करोति तदेव प्रतिप्रस्थाताऽपि नतु स्वयं स्वेच्छया पूर्वं वा पश्चाद्वा कुर्यादित्यर्थः। एतस्य बाधो वचनादेव तत्र तत्र वक्ष्यते।

उत्तरे विहारेऽध्वर्युः कर्माणि करोति दक्षिणे प्रतिप्रस्थाता ।

नियमस्य पूर्वमनुक्तत्वादत्र नियम्यते । स्पष्टम् ।

दक्षिणस्या वेदेरुत्तरस्याः श्रोणेरुत्तरस्या वेदेर्दक्षिणमꣳसꣳ स्फ्येनैकस्फ्यामनुसंभिनत्ति ।

दक्षिणविहारवेदेरुत्तरश्रोणिमारभ्योत्तरवेदेर्दक्षिणांसपर्यन्तं स्फ्येन कृतामेकस्फ्यामेकरेखाम् । अनुस्तृतीयार्थे । रेखया वेदिद्वयविश्लेषमध्वर्युरेव करोति । अत्र वेदिकरणं तूष्णीं मानेन संनामान्तमेवोक्तम् । न संमार्जनाद्यपि, समान उत्कर इत्यनन्तरमेवाभिधास्यमानत्वात् । अतः संनामान्ते कृते स्फ्येनानुसंभिद्य पश्चाद्वेदौ कृत्वा वेदी कुरुत इत्यर्थः ।

तदेव दर्शयति—

समान उत्करो[१] ब्रह्मा होताऽऽग्नीध्रश्च ।

चातुर्मास्यानां यज्ञक्रतोः पञ्चर्त्विज इति वचनान्नोभयत्र ब्रह्मादयोऽन्येऽन्ये पञ्चमप्रतिप्रस्थातैव । उत्करस्यावकाशाभावादुत्तरत एवैकः । द्विपदे परिमिते चेति मानान्तरेणापि यानि साधारणानीत्युक्तमेवाध्वर्युकृत एवोभयोः ।

अग्रेणोत्तरं विहारं प्रतिप्रस्थातोत्कराय संचरति (* यत्प्रागुत्तरस्मात्परिग्राहात्तत्कृत्वा) ।

स्पष्टम् ।

उत्तरवेद्याः कल्पेनोत्तरस्यामुत्तरवेदिं करोति ।

उत्तरवेद्याः कल्पेन विधिना निरूढ उक्तेनोत्तरविहारवेद्यामेव न दक्षिणविहारवेद्यां करोतीत्यर्थः । तत्रायं प्रयोगः—यजमाने दक्षिणविहारं दक्षिणेन स्थिते सति उभौ स्वीयां स्वीयां वेदिं कुरुतः । वेदेन संमृज्यमानयोर्यजमानः सकृदेव वेदेन वेदिं बृहतीमित्यादि करोति संदृष्टद्रव्यस्यैकत्वान्नोहः । प्रदेशभेदे सत्यपि याजमाने वेदिमित्येतावतैव निर्देशात् । संसर्गिषु चार्थस्यास्थिरपरिमाणत्वादिति मीमांसकाः । तस्माज्जात्यभिप्रायेणैकत्वोपपत्तौ सत्यां नाऽऽगमप्रबाध ऊहेन कार्यः । प्रायोगिकाः कुर्वन्ति च । एवमन्यत्रापीमां नराः प्रोक्षणीरासादय गां दोहपवित्रे रज्जुमित्येतस्योच्चारणमात्रेण विभवान्नोभयोः । आग्नीध्रः स्तम्बयजुरुभयमभिगृह्णाति । ऋतमसीति पूर्वपरिग्राहौ । यदुद्धन्तो बृहस्पत इत्यादि याजमानमनूहेन । एवं कृते सत्युत्तरवेद्यामुत्तरवेदिः शम्यादानादिनोत्तरवेदिचात्वालविमाननिवपनादिसंछादनात्पूर्वं कृत्वा ।

---

* धनुश्चिह्नान्तर्गतपाठः केवलसूत्रपुस्तकस्थः ।

---

१ घ. ङ. ज. झ. म. ढ. 'रो होता ब्रह्माऽऽग्नी' ।

उभयत्र संभारा:[1] पाशुकमग्निप्रणयनम् ।

दक्षिणायतनेऽपि संभारानक्तुमुक्तमुभयत्रेति । उभयत्र पाशुकं प्रणयनमित्यपि संबध्यते । प्रणयनप्रकारस्तु गार्हपत्येऽग्निप्रणयनानीत्यादि विभज्येध्ममुभौ प्रणयतो नोद्यतहोमो नित्यधार्येऽपि चाऽऽहवनीयादेव प्रणयनम् ।

अग्नीनन्वाधाय ।

उभौ गार्हपत्यदक्षिणाग्नी अध्वर्युरेवाविकृतं सर्वं याजमानं च ।

आमिक्षयोर्वत्सानपाकुरुतो मारुत्यै प्रतिप्रस्थाताऽ-
ध्वर्युर्वारुण्यै सायंदोहस्याऽऽवृता दधिनी कुरुतः ।

शाखाहरणादिविधिना मारुत्या यागस्य पूर्वभावित्वात्पूर्वं प्रतिप्रस्थाता वत्सानपाकरोतीत्युक्तम् । वैश्वदेवेन कल्प इत्युक्तेऽपि पुनः सायंदोहस्येत्यादिपुनर्विधानं सद्यस्काछाऽऽमिक्षेति केषाचित्सूत्रकाराणा मतं तन्मा भूदित्येवमर्थं दधिनी कुरुत इत्युक्तम् । अत्र शुद्धा अपः० शतं मरुद्भ्यः । शतं वरुणायेत्येवमन्यत्र । उपवेषोऽसि । एता आचरन्ति । अप्रस्रंस्ता० कामधुक्षः० बहु० दुग्धि० सोमेन त्वा० इन्द्रस्य त्वा० । एवमष्टौ मन्त्रास्तत्तद्विभक्त्यन्ताभ्यां मरुद्वरुणपदाभ्यामूह्याः । यवागूच्छेषणं विभज्याऽऽतञ्च्योपरि निधानं परिस्तरणानि गार्हपत्यदक्षिणाग्न्योरध्वर्युरेव श्वो भूते कर्मणे वां यज्ञस्येत्यादिकमुभौ ब्रह्मयजमानासने अध्वर्युरेव दक्षिणेन दक्षिणविहारम् ।

पात्रसंस्सादनकाले यथार्थं पात्राणि प्रयुङ्क्तः
शमीमय्यः स्रुचो भवन्ति ॥ ४ ॥ हिरण्मय्यो वा ।

यथार्थमौषधसांनाय्यपात्राणीत्यर्थः । शम्या वृक्षस्य रजतस्य सुवर्णस्य वा स्रुवसहिताः स्रुचः । दक्षिणविहारस्येति भरद्वाजः । उभयत्रेति बौधायनः । अविशेषादुभयत्रेत्येव सूत्रार्थः । स्रुचां ग्रहणात्स्रुवस्यापि ग्रहणमुक्तमेव । उत्तरस्मिन्नेवाग्नौ प्रणीता आसादयत इति भरद्वाजः । कात्यायनेन तु साधारणत्वादध्वर्युरेवेत्युक्तम् । तत्र साधारणतापक्ष एवाऽऽश्रयणीयः । प्रणीताप्रणयनमदृष्टार्थतया विभजति तन्त्रमित्युक्तम् । अग्निसाध्यं हि यत्र प्रधानं तत्राङ्गानीति नियमान्न तन्त्रता । न चैता अग्निसाध्या दृष्टार्थतयाऽप्यध्वर्युसंस्कृता उभयत्र विनियोक्ष्यन्ते । अतो ब्रह्मन्नप इत्यध्वर्युरेव । ब्रह्माऽप्यविकृतमेवानुजानाति । कस्त्वेत्यन्तं याजमानमविकृतम् । यथार्थं पात्राणीति वचनादौषधपात्राण्यपि पृथगेव । स्फ्यादीनि प्राकृतेभ्योऽन्यान्येव तत्तद्वृक्षजानि ।

1 ख. ग. च ट ठ. ड. ण. संभारेषु ।

निर्वपणकालेऽध्वर्युः पञ्च संचराणि निरुप्यैन्द्राग्नमेकादशकपालं निर्वपति ।

आग्नेयादीनि पूर्वोक्तान्येवात्र संचारितानि निरुप्य वैशेषिकमैन्द्राग्नं निर्वपति ।

मारुत्यै मेष्यै प्रतिप्रस्थाता यवान्निर्वपति ।

मेषीप्रतिकृतये यवानां निर्वापो नियम्यते । मरुद्भ्यो जुष्टमित्यादि स्वरूप एव ।

अध्वर्युर्वारुणं मेषं निरुप्य कायमेककपालं निर्वपति ।

यवानेव मेषार्थम् । मेषमेषीप्रकृतिभ्यां यवान्निर्वपतीति भरद्वाजः । अध्वर्युर्वारुणाय मेषाय यवान्निरुप्येति वैखानसः । कायस्तु व्रीहीणामेव । निरुप्य निर्वपतीति पृथगारम्भसामर्थ्यात् । नानाबीजधर्मेणाध्वर्युः ।

मेषप्रतिकृत्योर्यवनियमादन्येषां व्रीहिनियमो मा भूदिति दर्शयति—

सर्वे वा यवा भवन्ति ।

व्रीहिनियमोऽन्येषां नास्ति यथाप्राप्तविकल्प एवेत्यर्थः ।

प्रोक्षण्युद्रेकेण यवान्संयुत्यावहन्ति ।

तेषां शुष्काणामवहननं न भवतीति यस्मिन्कस्मिंश्चिदुदके प्राप्ते प्रोक्षणीशेषेणेति नियमः ।

ऐन्द्राग्नपर्यन्तेषूपहितेषु प्रतिप्रस्थाता दक्षिणार्धे गार्हपत्यस्यैकादश द्वादश वा कपालान्युपदधाति ।

दक्षिणार्धे दक्षिणभाग ऐन्द्राग्नधर्मेण ।

अष्टौ मेषस्योपधायाध्वर्युः कायस्योपदधाति ।

दक्षिणार्धनिवृत्तय उपधायोपदधातीत्युक्तम् ।

प्रातर्दोहस्याऽऽवृता प्रातर्दोहौ दोहयत आमिक्षे कुरुतो यथा पुरस्तात् ।

अतिदेशप्राप्तेऽनेकानि वचनानि प्रापकाणि सूत्रान्तरे सद्यस्कालाऽऽमिक्षा लौकिकेन दध्नेत्याद्युक्तनिरासार्थानि । यथा पुरस्ताद्वैश्वदेव्यामिक्षावत् ।

ऐन्द्राग्नपर्यन्तेष्वधिश्रितेषु मेषप्रतिकृती कुरुतः ।

मेषीसदृशाकृतिं निरुप्तानां यवानां संयुतानां पिष्टानां प्रतिप्रस्थाताऽध्वर्युस्तथैव मेषप्रतिकृतिम् । एकबीजे त्वत्र विभागः ।

मारुतीं मेषीं प्रतिप्रस्थाता करोत्यध्वर्युर्वारुणं मेषं स्त्रीव्यञ्जनानि स्त्रियाः करोति पुंव्यञ्जनानि पुंसः ।

एते सूत्रे पूर्वव्याख्यानार्थे । स्त्रीव्यञ्जनानि योनिस्तनाः । पुंव्यञ्जनानि शिश्नवृषणकूर्चाः ।

एकादशसु द्वादशसु वा कपालेषु प्रतिप्रस्थाता मेषीमधिश्र-यत्यष्टसु मेषमधिश्रित्याध्वर्युः कायमेककपालमधिश्रयति।

विविच्य विविच्य विधानं तु केचित्कपालोपधानानन्तरं दोहमात्रमाहुरामिक्षाकरणमधिश्रयणानन्तरं केचिदधिश्रयणानन्तरमेव दोहामिक्षा इत्याद्यनेकक्रमदर्शनव्यावृत्त्यर्थम्।

कुम्भीपाक्यौ वा मेषौ भवतः।

कुम्भ्योः पाक्यौ पचनीयौ मेषी मेषश्च भवतः। अत्र कपालानां स्थाने कुम्भ्योर्विधानं मा भूदिति कपालोपधानसमये नोक्तं कुम्भ्यौ वोपधत्त इति स्थाल्यां कपालधर्मा इत्युक्तं तदपि मा भूदिति कुम्भीपाक्यावित्युक्तमिति भाति। तत्रावश्यं भवितव्यं धर्मैः प्रदेयद्रव्यत्वेन निर्वापादेः कृतत्वादतोऽन्यस्मिन्द्रव्येण तेनार्थेन संयुज्यमाने धर्मादेश इत्युक्तत्वात्। यथा चरोः प्रसिद्धा स्थाली प्राप्ता तथाऽत्र श्रुत्या कुम्भी प्राप्तेति दर्शयितुमेव श्रुतिरेव दर्शिता। तथा पिष्टपात्रीणाम्ततसाः प्रणीताः प्रकृताः प्रयोजिता अत्र पाकार्थमपि पुनः प्राप्नुवन्तीत्यन्याभिरद्भिः श्रपणं चरुवदेवोपधानादिना कर्तव्यं श्रुतौ कपालैः सह विकल्पानभिधानात्पाकमात्रविधानेन तद्धर्मा उन्नेया इतिप्रदर्शनार्थमेवमुक्तम्।

अन्येषां लौकिकानामामपेषाणा-
मीषदुपतप्तानां यवानां करम्भ-
पात्राणि कुरुतो यजमानः पत्नी च।

शमीकरीराणि करम्भस्तदाऽऽधारभूतानि पात्राणि तानि यवानामेवाऽऽपस्तम्बभारद्वाजोक्तेः। यवाश्च तूष्णींकृत्य पिष्ट्वा पश्चात्किंचिद्[3]तप्तानि दक्षिणाग्नौ तथा वाजसनेयिब्राह्मणं तेषा पात्राणि दंपती कुरुतः। लौकिकग्रहणेन सिद्धान्येव ग्राह्याणि।

यावन्तो यजमानस्य प्रेष्यामात्याः
सस्त्रीकास्तत एकाधिकानि।

प्रेष्याश्च तेऽमात्याश्च भृत्यपुत्रपौत्रशिष्यादयः सस्त्रीकाः पुत्रपौत्रा इति भारद्वाजः। तत्संख्यातोऽधिकमेकं येषा तावन्तीत्यर्थः। सर्वथा तदभावे त्रीण्येवोक्तानि कात्यायनेन।

उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यत
आज्येन दध्ना चोदेहीति संप्रैषस्यान्तः संनमतः।

नन्व यानि साधारणानीत्यनेनाध्वर्युरेव संप्रेष्यतीति वाच्यम्। आत्मैवात्र संस्कार्य इत्युक्तमतो भवति प्रत्येकम्। स्पष्टमन्यत्।

---

१ ख. ग ठ. ड. ण. 'म्भ्यौ चोप'। २ ख. ग. ठ. ड. ण. 'ना क°। ३ ड. 'दुपतप्ता°।

आषाढ्यां यथा फाल्गुन्यामेवं पृषदाज्यं गृहीतः ।

गतार्थम् ।

श्रावण्यां तु सक्तुदाज्यस्योपस्तीर्य द्विर्दधि गृहीत्वा सक्तुदाज्येनाभिघारयतः ।

स्पष्टम् ।

उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते ।

गतार्थम् ।

ऐन्द्राग्नपर्यन्तेष्वलंकृतेष्वनैडकीभिरूर्णाभिर्मेषप्रतिकृती लोमशौ कुरुतस्तास्वविद्यमानासु कुशोर्णानि श्लेषयतः ।

तथा वाजसनेयिब्राह्मणेऽभिहितं च । एककपालं पूरयति ।

मारुत्यां मेषमवदधाति वारुण्यां मेषीम् ॥ ९ ॥

आमिक्षयोर्मध्येऽवधत्तो व्यत्ययेन ।

उत्तरस्यां वेद्यामन्यानि हवींषि सादयति दक्षिणायां मारुतीं करम्भपात्राणि च ।

सर्वाण्याज्यपृषदाज्यानि दक्षिणविहारोपयुक्तान्यपि हवींष्युत्तरवेद्यामेवाऽऽसादयत्यध्वर्युरेकवचनादन्यस्यामेकां मारुतीमामिक्षामेव करम्भपात्राणि च प्रतिप्रस्थाता वाजिनमुत्कर उभावासाद्य ।

आसाद्य मेषप्रतिकृती विपरिहरतो मारुत्यां मेषीमवदधाति वारुण्यां मेषम् ।

क्रमप्राप्तेऽपि पुनरासाद्येति वचनं य आसादयति स एव ततो गृहीत्वाऽन्यस्यामामिक्षायां व्यत्ययेनावदधाति । स्पष्टमन्यत् ।

तयोः परःशतानि परःसहस्राणि वा शमीपर्णकरीराण्युपवपतः करम्भपात्रेषु चाऽऽवपति ।

मेषयोः पुरस्ताद्भक्षार्थमुभौ तान्येव ।

निर्मन्थ्यस्याऽऽवृता निर्मन्थ्येन प्रचरतः ।

पशुबन्धोक्तेन निर्मन्थ्यस्य विधिना निर्मन्थ्येनेति चैकवचनाभ्यामेक एव निर्मन्थ्यः । शाखान्तरवचनात्तु साधारणत्वादिति भावः । तदुक्तं कात्यायनेन मन्थनमात्रमध्वर्योरेवेति दर्शितं पश्चाद्द्विभज्योभौ प्रचरतो द्विवचनात्तस्मेऽध्वर्योरेव प्रचार इति भारद्वाजेनोक्तं प्रत्युत निर्मन्थ्यौ द्वावित्यापस्तम्बोक्तं च ।

वेदं निधाय सामिधेनीभ्यः संप्रेष्यति ।

अध्वर्युरेवानूहेनेत्युक्तं साधारणत्वात्[1]प्रै[2]वैरं[3] चाऽऽग्नीध्रसंप्रैषश्चेत्युक्तम् ।

संमृष्ट उत्तरेऽग्नावसंमृष्टे दक्षिणे प्रतिप्रस्थाता पत्नीं पृच्छति पत्नि कति ते जारा इति सा यावतः प्रब्रूयात्तान्वरुणो गृह्णात्विति निर्दिशति यज्जारꣳ सन्तं न प्रब्रूयात्प्रियं ज्ञातिꣳ रुन्ध्यात् ।

पत्नीसमीपं गत्वा प्रतिप्रस्थाता तां पृच्छति कति ते जारा इति भर्तृव्यतिरिक्ता-स्तस्यां मैथुनेन संसृष्टास्तान्वरुणो गृह्णात्वित्यध्वर्युरेवाग्रे पुनः प्रतिप्रस्थातृग्रहणात् । जारैकत्वद्वित्वयोस्तं ताविति वक्तुमुक्तं सा यावत इति । सति जारे यदि न कथयेत्तर्हि तस्या प्रियं ज्ञातिं गोत्रजं रुन्ध्याद्व्याध्यादिना वरुणोऽवरोधं कुर्यात् । अविद्यमाने न सन्ति जारा इति प्रब्रूयात्तदा ताननिति नास्ति । जारकथने तु तेनैव प्रायश्चित्तमिति केचित् । कर्मान्ते कार्यमित्यन्ये ।

प्रघास्यान्हवामह इति प्रतिप्रस्थाता पत्नीमुदानयति ।

स्पष्टम् । सजोषस इत्यन्तः ।

ऐषीके शूर्पे करम्भपात्राण्युप्तानि पत्नी शीर्ष-ण्यधि निधायान्तरा वेदी गत्वाऽग्रेण दक्षिण-मग्निं प्रत्यञ्चाववतिष्ठेते यजमानः पत्नी च ।

उत्तरेण विहारमग्रेणोत्तराहवनीयमन्तरेण च वेदी गत्वा पूर्वमेवासाऽऽदितानि करम्भपात्राण्यैषीके शूर्प उप्तानि तानि सह शूर्पेण शीर्ष्णि स्थापयित्वाऽन्तरा वेदी दक्षिणाहवनीयस्याग्रेण गत्वा दंपती तत्र प्रत्यङ्मुखाववतिष्ठेते ।

मो षू ण इति यजमानः पुरोनुवाक्यामन्वाह यद्ग्राम इत्युभौ संनिगद्य शूर्पेण दक्षिणेऽग्नौ जुहुतः ।

तिष्ठन्नेव पुरोनुवाक्याधर्मेण मो षू ण इति । गीरित्यन्तः । पुरोनुवाक्यामन्वाह तत उभौ दंपती यद्ग्राम इत्यादि स्वाहान्तमुक्त्वाऽन्तेनोभावपि जुहुतः । प्रघास्या मरुतो देवता । स्पष्टमन्यत् ।

अध्वर्युर्वा जुहोत्यन्वारभेते इतरौ ।

मन्त्रावपि पठित्वाऽध्वर्युरेव जुहोति दंपती अन्वारभेते ।

अक्रन्कर्म कर्मकृत इति विपरायन्तौ जपतः ।

सुदानव इत्यन्तं व्यत्ययेन स्वं लोकं यथेतं प्रतिपठन्तौ गच्छतः ।

---

१ ण. °त्प्रपरं । २ च. ट. °वरं वाऽऽग्नी° । ३ ठ. ड. °र त्वाग्नी° । ४ ड. °क्त्वा तेनो° ।

संमार्ष्टि दक्षिणमग्निम् ।

पूर्वमसंमृष्टमिदानीं संमार्ष्ट्याग्नीध्रः ।

ऐन्द्राग्नपर्यन्तैः प्रचरिते ।

आघारादितस्रमाज्यभागान्तमुभयोराग्नेयादिकमध्वर्योस्तस्मिन्नैन्द्राग्नपुरोडाशप्रचारान्ते सति, तावत्स्रुक्पाणिरास्ते प्रतिप्रस्थातेति कात्यायनः ।

प्रतिप्रस्थाता मारुत्याः पूर्वेण सहावदानेन कृत्स्नां मेषीमवद्यत्युत्तरेण शमीपर्णकरीराणि ।

पूर्वमुक्तान्येवोत्तरावदानेन सहावदाय प्रचरतीत्यर्थः । स्पष्टमन्यत् ।

अध्वर्युर्वारुण्याः पूर्वेण सहावदानेन कृत्स्नं मेषमवद्यत्युत्तरेण शमीपर्णकरीराणि ।

अवदाय प्रचरतीत्यर्थः । स्पष्टमन्यत् । अत्राऽऽमिक्षयोः सांनाय्यविकारत्वाद्यानमानं सांनाय्यवदेव । भाष्यकृता तु वैश्वदेव्यामिक्षाविकारत्वान्मरुतामहं देवयज्यया प्राणैः सायुज्यं गमेयमित्येवं वारुण्यामपीत्युक्तं तद्बहुभाष्यविरोधादुपेक्ष्यम् । नहि दर्शादेवानुमन्त्रणप्राप्तौ विकृतेरनुमन्त्रण ग्रहीतुं शक्यम् । न च तत्स्था धर्म आमिक्षाया वैश्वदेव्यास्तत्प्रकरणेऽनधीतत्वाद्विश्वेषां देवानामिति मन्त्रस्य । स हि मन्त्रोऽनारभ्याधीतो यत्र विश्वे देवा देवतास्तत्राऽऽमिक्षाया चरावाज्यहविषि वा प्राप्नुयाल्लिङ्गेन । ततस्तु वैश्वदेवचरौ यदुक्तमग्नीषोमानुमन्त्रणं तदप्ययुक्तम् । आनुमानिकाद्वाक्याल्लिङ्गस्य बलीयस्त्वात् । एवं च वैश्वदेवहविर्मात्रस्य मन्त्रो न वैश्वदेव्यामिक्षाया एव स्वधर्म इति नाऽऽमिक्षान्तरेषु तस्यातिदेशः । किंच भरद्वाजेनोक्तमाग्रयणेष्टावेव वैश्वदेवचरौ विश्वेषां दे० प्राणैरित्यादि, तस्मिन्नेककपाले द्यावापृथिव्योरित्यादि । ततः पुनराहाथो एवात ऊर्ध्वं वैश्वदेवप्रभृतीनामनुमन्त्रयेदिति । तथाचैते देवताप्रयुक्ता एव मन्त्रा नान्यदेवताकहविरन्तरं प्राप्नुवन्ति । तस्मात्कस्याप्यनुमन्त्रणं न द्यावापृथिव्यादीत्यपि सिद्धम् । तच्च कस्याहं दे० न्नाद इदमेव । कात्यायनेऽप्येवमेव सूत्रे ।

प्रकृतमनुसरामि—

कायानुब्रूहि कं यजेति ॥ ६ ॥ एककपाले संप्रेष्यति ।

शाखान्तरीया श्रुतिरियं प्रायेण देवतानिर्णय उदाहृताऽन्यथाऽपि निर्वाप एव ब्रूयात् । सर्वनामाऽपि सर्वशब्दो देवतावाच्यस्ति कस्मै स्वाहेत्यादिदर्शनात् । तदर्थं काय जुष्टमित्येव ज्ञेयमिति दर्शितम् । कस्याहं दे० न्नाद इत्येतदनुमन्त्रणम् ।

---

१ ख. ग. च. ट. ठ. ड. ण. प्रचरितैः ।

नभश्च नभस्यश्चेति चतुर्भिर्मासनामभिरेककपालमः-
भिजुहोति नभसे स्वाहा नभस्याय स्वाहेति वा ।

मासनामभिरित्यनेन सर्वत्राऽऽन्तरालिकपर्वणा मासा एव देवतात्वेन गृह्यन्ते । तेन काम्यं वैश्वदेवमात्रं पर्व यत्र तत्र च न पूर्वोक्ता मासहोमा एवमत्रैककपालेऽपि नेति ज्ञेयम् ।

परिवत्सरीणाᳬ स्वस्तिमाशास्त इति
सूक्तवाकस्याऽऽशीःषु होताऽनुवर्तयति ।

कृतव्याख्यानम् ।

प्रहृतेषु परिधिषु सᳬस्रावेणाभिजुहुत्य वाजिनेन प्रचरतः ॥

मतार्थम् ।

यथा पुरस्तात् ।

वाजिनस्य कर्मनामधेयत्वाभावाद्यथेत्युक्तम् । अयमाशयः—एतद्ब्राह्मणान्येव पञ्च हवीᳬषीति सार्थवादसाङ्गातिदेश इति न्यायमतमिति ।

यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः । यद्वा मे प्रतितिष्ठति तेन मा वाजिनं कुरु तेन सुप्रजसं कुरु तस्य ते वाजिन्वाजिभिर्भक्षं कृतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति दक्षिणे विहारे भक्षयन्ति ।

सर्वेऽपि वाजिनाश्रावणप्रैषकर्तृत्वादध्वर्योरपि भक्षः ।

आ मा विशन्त्विन्दव आगल्गा धमनीनाम् ।
रसेन मे रसं पृण तस्य ते वाजिन्वाजिभिर्भक्षं
कृतस्य मधुमत उपहूतस्योपहूतो भक्षयामीत्युत्तरे ।

भक्षयन्तीत्यनुवर्तते । नात्र प्रतिप्रस्थाताऽनुपयोगात् ।

सᳬस्थाप्य वारुण्या निष्कासेन तुषैश्चावभृथमवः-
यन्ति तस्य सौमिकेनावभृथेन कल्पो व्याख्यातः ।

निष्कासः कुम्भीगतः । अत एवोक्तं भरद्वाजेन स्थालीगतं निष्कासं प्रज्ञातं निदधातीति । प्रायणीयस्य निष्कास उदयनीयमिति सूत्रकारोऽपि तथैवातो नावदानशेषो निष्कास इति । एष वै दर्शपूर्णमासयोरवभृथ इत्यादाववभृथशब्दो गौण एवातो मुख्यः सौमिकावभृथ एव तस्यैव स्वधर्मत्वात्तेन व्याख्यातोऽयमवभृथः ।

न साम गीयते ।

प्रतिषेधादित्यर्थः ।

---

१ घ. ङ. ज. झ. ञ. ढ. °शास्ते दिव्यं धामाऽऽशास्त । २ ग. ठ. ड. ण. °ष्वाभिव्या°ं ।

तूष्णीमेव परेत्य ।

उदकमिति शेषः ।

वारुणस्य धर्मेण निष्कासं प्रतिपाद्य ।

यत्र वारुण एककपालो विहितस्तस्य स्थाने निष्कासेन तुषैश्चावभृथमवयन्तीति श्रुतेर्वारुणस्य पुरोडाशस्य धर्मेणेत्युक्तमन्यस्मिन्द्रव्ये तेनार्थेनेत्युक्तत्वात् । ननु निष्कासः शेषः स कथं वरुणाय हविष्ट्वेन देय इत्याशङ्क्योक्तं प्रतिपाद्येति । प्रतिपत्तिरपि वचनात्स्विष्टकृद्यागोऽपि भवतीत्याशयः । तथा च यावदुक्तमवभृथे प्रयाजादि तत्स॰ र्वमपि भवति ।

तुषानृजीषधर्मेण प्रतिपादयति ।

तुषैश्चावभृथमित्युक्तत्वात्तुषानित्युक्तम् । तेन यत्ते ग्राव्णा चिच्छिदुः सोमेति मन्त्रेषु यद्वो मुसलेन चिच्छिदुर्व्रीहयो यथा राजानः । प्रियाण्यङ्गानि॰मुसलेन परूᳲषीत्येवमादिकमूहनीयम् ।

अवभृथादुदेत्य वाससी यस्मै कामयेते तस्मै दत्तः ।

परिहिते वाससी । स्पष्टम् ।

श्वो भूते पौर्णमासेनेष्ट्वोदवसायानुदवसाय वा प्रसूता देवेन सवित्रेत्युन्दति ।

गतार्थम् ।

यदुघर्मः पर्यवर्तयदन्तान्पृथिव्या दिवोऽग्निरीशान ओजसा वरुणो धीतिभिः सहेन्द्रो मरुद्भिः सखिभिः सहाग्निस्ति॰ ग्मेन शोचिषेति निवर्तनं वापनं यथा पुरस्तात् ॥ ७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे पञ्चमप्रश्ने द्वितीयः पटलः ॥ २ ॥

अत्रापि संज्ञाया अभावाद्यथेत्युक्तम् ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां पञ्चमे वरुणप्रघासप्रश्ने द्वितीयः पटलः ॥ २ ॥

अथ पञ्चमप्रश्ने तृतीयः पटलः ।

ततश्चतुर्षु मासेषु कार्तिक्यां मार्गशीर्ष्यां वा त्र्यहᳲ साकमेधैर्यजते ।

साकमेधा मेधा यज्ञास्तन्त्रेण क्रियमाणाः साकं सहेत्युक्ताः । समासे साकमित्यस्य

---

१ घ. ङ. ज. झ. ञ. ढ. °षकल्पेन प्र° । २ ग. ङ. च. ज. झ. ञ. ठ. ड. ढ. °मास्येष्ट्वो° । ञ. ढ. °मासेष्ट्वो° । ३ ख. ग. च. ठ. ठ. ड. ण. °सूतेत्यादि ग° । ४ ज. °न्दन्ति य° ।

मन्त्रोपदेशच्छान्दसः । पञ्चम्यां पौर्णमास्यां क्रियमाणानां महाहविष एव चतुर्षु मासेष्वतीतेषु क्रियमाणत्वात्तस्यैवाङ्गेष्टिभिः सह ग्रहकालता । साकमेधाः साकꣳ सूर्येणेत्यादिना विहिताः । अतः साकमेधप्रधानान्यङ्गैः सह ग्रहसाध्यानीत्यर्थः । ततश्चतुर्दश्यां सूर्योदयात्प्रागुपक्रमः ।

अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता साकꣳ रश्मिभिः प्रचरन्तीत्येकेषां मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुं न बर्हिरनुप्रहरतीत्येकेषामपराह्णे गृहमेधीयाय वत्सानपाकरोति यावन्तो यजमानस्यायजुष्केण वत्सानपाकरोतीत्येकेषाम् ।

उद्यतोदयमागच्छता निर्वापोऽथवा प्रधानप्रचारः । उद्यद्भिः प्रथमरश्मिभिरिति यावत् । यावन्तो यजमानस्य वत्सास्तान्सर्वानपि पुंस्त्वमविवक्षितमेकशेषात्सिद्धमिष्टिः । अपराह्णे स्पष्टं गृहमेधीयकर्मणे चरवे वा गृहमेधिनो देवता यस्य तत्तथा । यद्यपि विशिष्टा देवता तथाऽपि विशेष्येणैव नामता वैमृधवत् । अतो न देवतार्थे पयसे वत्सापाकरणं किंतु चरुश्रपणार्थं यत्र क्रियते तत्र लौकिकवत्सापाकरणमित्युक्तम् । अयजुष्केण वत्सानपाकरोतीत्येकेषाम् । इषे त्वेत्यादि यजुर्यत्र न क्रियते कर्मणि तादृशेन तूष्णीकेन कर्मणा वत्सापाकरणमात्रं दृष्टार्थमेव कर्तव्यम् । तत्र न शाखा नित्या पूर्ववत्किंतु सांनाय्ययजुर्भिर्विना तूष्णीं शाखामाहृत्य तूष्णीमपाकरोति । एतस्माज्ज्ञापकात्केचिदाहुः पक्षे मन्त्रैरिति तच्च दर्विहोमत्वाद्यावदुक्तमेव नहि लिङ्गेनातिदेशानुमानं दर्विहोमेऽस्ति ।

सायꣳ हुतेऽग्निहोत्रे गृहमेधीयस्य तन्त्रं प्रक्रमयति ।

स्पष्टम् ।

तत्र यावत्क्रियते तद्व्याख्यास्यामः ।

तस्य दर्विहोमत्वस्य न्यायशास्त्रे निर्णीतत्वात्तातिदेशेनाङ्गप्राप्तिरतोऽन्यशाखोपदेशतो यानि प्राप्तानि तानि व्याख्यायन्ते । उक्तं चैतदर्थं दार्शपौर्णमासिकानि प्रधानान्युत्तरस्यां ततौ चोद्यन्तेऽन्यत्र सोमाद्धर्माद्दर्विहोमेभ्य इति, तानि स्वधर्माणीति च । तस्मान्नातिदेशोऽपि तु यावदुक्तस्वधर्माण्येव ग्राह्याणि ।

अग्नीनन्वाधाय वेदं कृत्वाऽग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीꣳ स्तीर्त्वा यथार्थं पात्राणि प्रयुनक्ति ।

औषधपात्राणि ।

पवित्रेण दोहपक्षे चरुश्रपणकुम्भीमपि दोहपात्रं वा कपालस्थान आह—

कुम्भीं निस्रश्च पात्रीः ।

पाकार्थं कुम्भीमुद्धरणपात्रीः । अत्रेध्माबर्हिःपरिसङ्ख्या प्रणीतानां च न प्रणीताः प्रणयतीति भरद्वाजः । ब्राह्म वरणं च । अत्र स्तीर्त्वेत्यन्तमुपदेशेनान्यत्सामर्थ्येनेति ज्ञेयम् ।

निर्वपणकाले मरुद्भ्यो गृहमेधिभ्यः प्रभू-
तान्व्रीहीन्निर्वपति यावत्पयो मन्यते ।

पयोनुसारेण व्रीहीणां निर्वापः । चतुरो मुष्टीन्निरुप्य प्रभूतानन्वावपतीति भरद्वाजा-पस्तम्बौ । चतुर्थ्यन्तदेवतापदेन मन्त्रोऽप्यनुज्ञातो देवस्य त्वेति ।

पवित्रेण गां दोहयति ।

वत्सापाकरणार्थमानीतेन शाखापवित्रेणेतरधर्मनिवृत्तिश्च परिसंख्यानात् । तथा चैत-दुक्त्वाऽऽपस्तम्बः पक्षान्तरमाह सांनाय्यवदिति । स पक्षोऽस्माद्स्ति । वत्सापाकरण-ममन्त्रममन्त्रो दोहः । पवित्रेण कुम्भ्यामन्तर्गार्हपत्येऽधिश्रितायामित्यर्थः ।

न तण्डुलानुत्पुनाति यजुरुत्पूतेनैव पयसा श्रपयतीत्येकेषाम् ।

चरुधर्मत्वेन प्राप्तत्वात्प्रतिषेधो नोत्पुनातीति । तूष्णीं शाखाहरणपक्षे तु पवित्रेणे-त्ययं विधिरेकेषां शाखिनां यदा न शाखाहरणं तदा यजुरुत्पूतेनेति विधिरेकेषाम् । एवकारः प्रणीतानिवृत्त्यर्थः । पवित्रेण दोहनिवृत्त्यर्थत्वेऽत्र पयः श्रपणार्थं श्रूयते तथाऽपि प्रतिषेधान्न पयः प्रणयतीत्यर्थः । यजुषा देवो वः सवितेत्यनेनोत्पूतेन । अत्र हि श्रूयते सर्वासां दुग्धे सायं चरुमिति । तत्र दुग्धस्य श्रपणार्थत्वेन श्रूयमाणत्वान्न प्रदेयद्रव्यतेति लौकिकं वत्सापाकरणं लौकिको दोहः । तत्र प्रणीताप्रतिषेधाय यजुरु-त्पूतेनेति पक्षो न्यायसिद्धः । शाखान्तरे तु शाखया वत्सानपाकृत्य पवित्रेण संदोह्य तं चरुं श्रपयतीति । तथा तमेव प्रकृत्य श्रूयते तस्य द्वय्यावृदिति द्विःप्रकारा क्रिया सांनाय्यवदौषधवदिति श्रुतेरर्थः । तत्रास्यापूर्वकर्मत्वाद्यावदुक्तमेव ग्राह्यम् । औषध-धर्मास्तु युक्ता एव दर्शिताः । सांनाय्यधर्मास्तु वचनात्पक्षे यावदुक्ता एव ग्राह्या नतु तेषां मन्त्रा अपि। मन्त्रा ह्यतिदेशान्न भवन्ति । दोहविकारत्वाभावात् । तस्माद्दोहोऽप्य-मन्त्र एव । यदपि श्रूयते यजुषा वत्सानपाकरोतीति तदपि प्राप्तये नतु प्राप्तनिषेधेन तस्य यजुषोऽतिदेशोपदेशाभ्यामप्राप्ते, नचात्र वाचनिकोऽतिदेशोऽस्ति । अतिदेशवत्त्वं सामानाधिकरण्येनेति श्रुतिः सायमग्निहोत्रमिति संज्ञा तथैतद्ब्राह्मणानीति वाक्यम् । नचैतन्नित्यवत्कर्तव्यमिति विधिरस्तु किंतु क्रियानौषधधर्मः क्रियाऽश्रुतधर्मोऽत्र दृश्यत

---

१ ख. ग. च. ट. ठ. ड. ण. °म् । म° । २ च. ट °म् । तुषध° । ३ च. ट. °क्षेण प° । ४ च. ड. °काद्यम् । ५ च ट. तु प्राप्तः कि° ।

इत्यर्थः । सादृश्येन वत्सापाकरणादिना तु दर्विहोमत्वात्स्वधर्मस्यातिदेशो निराकृतः स्वेनैव । अत्रायं प्रयोगक्रमः–यजमान वाच यच्छेत्युक्त्वा वाग्यतः पात्राणीत्यादि । ततो यथार्थनिर्वापादि त्रिष्फलीकृत्य प्रक्षालनं निनीय ध्रुवाऽसीति स्थालीमुपधायाधिश्रयण-काले तु न तण्डुलानुत्पुनाति स्थाल्यां शाखापवित्रवत्यां तूष्णीं दोहयित्वाऽनुत्पूतानेव तण्डुलानोप्य श्रपयति । श्रपणपक्षे तु न शाखाहरणं न शाखापवित्रकरणमुपधाय स्थालीं लौकिकेन कर्मणा गां दुग्ध्वा तत्पयो दर्भपवित्राभ्यां यजुषोत्पूय तत्स्थाल्यां निक्षिप्यानुत्पूतानेव तण्डुलानोप्य श्रपयति । आपस्तम्बस्यैव समन्त्रदोहपक्षस्तृतीय उक्तो नान्यैर्भरद्वाजादिसूत्रकारैर्नाप्यस्मदाचार्येण प्रथमं शाखाहरणादिपक्ष एव सर्वं समन्त्रं केचिदाहुस्तच्चिन्त्यम् ।

दक्षिणाग्नौ प्रतिवेशमोदनं पचति ।

पत्न्यै स्त्रीकुमारेभ्यश्च प्रतिवेशमोदनं पचतीत्युक्तं वैखानसेन प्रतिवेशमोदनं दक्षि-णाग्नौ लौकिकेन कर्मणा पचति ।

स्फ्यमादाय स्तीर्णाया वेदेर्लोमभ्योऽधिस्तम्बयजुर्हरति ।

सांतपनेष्टौ न बर्हिरनुप्रहरतीत्युक्तमतस्तस्मिन्स्तीर्णे एव बर्हिषि लोमभ्योऽवयवे-भ्योऽपि उपरि स्तम्बयजुर्हरति ।

उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यते ।

स्तम्बयजुर्हरणेन वेदिकरणमुक्तम् । स्पष्टं, गतम् ।

यदन्यदिध्माबर्हिषः पत्नीसंनहनाच्च तत्संप्रेष्यति ।

न पत्नीं[१] संनह्यति न सामिधेनीरन्वाहेति वचनाद्बर्हिषः स्तीर्णत्वादिध्मस्याभावा-दित्यर्थः ।

यत्प्रागाज्यग्रहणात्तत्कृत्वा ध्रुवायामेव गृह्णाति ।

न प्रयाजा इज्यन्ते नानूयाजा नाऽऽघाराविति वचनाद्ध्रुवायामेवेत्युक्तम् ।

प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्य वेदिं
प्रोक्ष्य प्रोक्षणावशेषं निनीय पवित्रे
अपिसृज्य ध्रुवां[१] स्रुवं च सादयति ।

दर्विहोमत्वादपूर्वकर्मान्तरविधानार्थमेवमुक्तं वेद्यामेवाऽऽस्तीर्णायामेव प्रोक्षण्यव-शेषमित्यादि ।

एषाऽसददिति मन्त्रं[१] संनमति ।

एता असदन्निति मन्त्रम् ।

---

१ ख. ग. घ. च. ट. गः ।

विष्णवसि वैष्णवं धाम प्राजापत्यमित्याज्यमभिमन्त्रयते ।

विष्णूनित्यस्य संनामः ।

यदानीकवतस्य बर्हिस्तत्सांतपनीयस्य
तद्गृहमेधीयस्य तत्स्तीर्णमेवेत्येकेषाम् ।

सांतपनेऽपि पूर्वमेव बर्हिरानीकवतस्यापि न बर्हिरनुप्रहरेदित्यर्थः । प्रस्तरप्रहरणं तूभयपक्षेऽप्यस्ति ।

उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते ।

स्पष्टम् ।

शृतस्य हविषः शरमुद्धृत्य प्रज्ञातं निधाय ।

गृहमेधीयस्योपरि स्थितस्य हविषः सफेनं मण्डं शरम् । गतम् ।

पात्रीषूपस्तीर्य त्रीनोदनानुद्धरति ।

आसादितासु पात्रीषूपस्तीर्य तास्वेव त्रिसंख्याकान्कुम्भीत उद्धरति ।

निष्कासितां कुम्भीं निदधाति ।

अन्तर्बहुतरौदनशेषलिप्तां स्थापयति ।

अनिमृष्टं दर्व्युदायुवनमवधाय ।

दर्वी ययौदन उद्ध्रियते सा प्रसिद्धा । तस्या योऽग्रिमभागो विस्तीर्णः स उदा॰ युवनं पच्यमान ओदनो येन दर्वीप्रदेशेनाधस्ताद्ध्रियमान ऊर्ध्वमा समन्ताच्च यूयते मिश्रः क्रियते तद्दर्व्युदायुवनं तदप्यनिमृष्ट बहुतरलेपयुक्तमनिष्कासितलेप निधाय तस्यां कुम्भ्यामेव ।

अभिघार्योत्पूयालंकृत्यौदनानासादयति ।

वेद्याम् ।

ओदासु देवतास्वग्निमुपवाज्याऽऽज्यभागाभ्यां प्रचर्य ।

सामिधेनीनां प्रवराघारप्रयाजाना निवृत्तिः । देवतावाहनानन्तरमग्नीदग्निं त्रिः संमृड्ढीत्युक्त्वोपवाज्याऽऽज्यभागाभ्यामेव प्रचरेत् ।

जुह्वामुपस्तीर्य सर्वेभ्य ओदनेभ्यः समव-
दायाभिघार्य मरुद्भ्यो गृहमेधिभ्योऽनु-
ब्रूहि मरुतो गृहमेधिनो यजेति संप्रेष्यति ।

सर्वेभ्यस्त्रिभ्य ओदनेभ्यः सकृत्सकृदेवावदायाभिघार्य वषट्कृते जुहोतीति शेषः ।

---

१ घ. ङ. च. झ. म. °पनस्य । २ ख. ग घ. ट. ठ. ड. ण. °र्वेभ्य. ।

स्विष्टकृत्प्राशित्रमिडा च क्रियन्ते प्राशितायाममा-
त्येभ्य ओदनानुपहरन्ति ये हविर्भोजना भवन्ति ।

पात्रीगतानोदनानमात्येभ्यो ददाति ये हविर्भोजना हविर्भोजनार्हा अनुपनीतस्त्री-व्यतिरिक्ता इत्यर्थः ।

प्रतिवेशपक्वस्य पत्न्यश्नाति ।

पत्नीस्त्रीकुमारा इति वैखानसः ।

इडान्तो गृहमेधीयः संतिष्ठते ।

पूर्णादर्विहोमस्तु नैतस्याङ्गमपि तु कौण्डिनेष्टेः । कौण्डिनस्य तन्त्रं प्रक्रमयति पुरा प्रातरग्निहोत्रात्पूर्णदर्व्येण प्रचरन्तीति भरद्वाजोक्तेर्नैतत्तन्त्र इति संतिष्ठत इत्युक्तम् ।

आञ्जतेऽभ्यञ्जतेऽनु वत्सान्वासयन्ति ।

अञ्जनं चक्षुषोः सर्वेषाममात्यानां दंपत्योर्ऋत्विजां च । ततोऽभ्यञ्जनं तदुच्यते पादाभ्यञ्जनं गोभिर्मातृभिर्वत्सानां संसृष्टतया वास एतानि कर्तव्यानि ।

प्रतिवेशाश्च पचन्ते ।

अन्यानपि ।

गाश्च घ्नते ।

व्यञ्जनाय पचन्ति ।

सुहिता एतां रात्रिं वसन्ति प्रतीता अनवर्तिमुखिनः ।

सुहितास्तृप्ताः । प्रतीताः प्रणयिनः । न विद्यतेऽवर्तिः खिन्नता यत्र तन्मुखमन-वर्तिमुखम् । तदस्ति येषां ते तथा । अखिन्नमुखा हृष्टा इति यावत् ।

पराचीनरात्रेऽभिवान्यवत्साया अग्निहोत्र्याश्च वत्सौ बध्नाति ।

अभिवान्यो वत्सो यस्या या मृतवत्साऽन्येन वत्सेनाधःप्रस्नुता सा तथा तयोर्व-त्सयोर्वचनं दृष्टार्थं वत्ससङ्गे मन्थार्थमग्निहोत्रार्थं च दोहौ न स्तः । पराचीनोऽपरो भागो रात्र्याः पराचीनरात्रम् ।

पुरा प्रातरग्निहोत्रात्पूर्णदर्व्येण प्रचरन्ति ।

पूर्णा दर्वीत्यनेन मन्त्रेण क्रियमाणो होमः पूर्णादर्विहोमः ।

दर्व्यामुपस्तीर्य शरनिष्कासस्य दर्वीं पूर-
यित्वा निमृष्टं दर्व्युदायुवनमवदायाभिघार्य ।

शरेण युक्ता निष्कासा स्थालीगतस्य मिश्रस्य तेन दर्वीं पूरयित्वा निमृष्टं निमृज्य गृहीतं दर्व्युदायुवनलेपं दर्व्यामेवावदायाभिघार्य दर्वीम् ।

---

१ ख. ग. च. ट. ठ. ड. ण. क्रियते । २ घ. ढ. °प्रात्पौर्णद° । ३ च. ठ. °त्पूर्णाद° । ४ घ. ङ. ज. झ. ञ. ढ. °ण च° । ५ ग. ठ. ङ. ण. प्रचरति । ६ घ. झ. ढ. °ष्कासेन द° ।

पूर्णा दर्वीत्यनुद्रुत्यर्षभमाहूय देहि म
इति तस्य रवते गार्हपत्ये जुहोति ।

शतक्रतो इत्यन्तं मन्त्रमुच्चार्य तत ऋषभं बलीवर्दमाहूयाऽऽकार्य । प्रसिद्धमेतल्लोके भार्यया गौराकारितो रौति शब्दं करोति तस्मिञ्शब्दे कृते सत्येव निहरामि त इत्यन्तेन स्वाहान्तेन मन्त्रेण गार्हपत्ये जुहोति । इन्द्रो देवता । ऐन्द्रं शर इति श्रुतेः ।

यद्दृषभो न रूयाद्ब्रह्माणमामन्त्र्य तेनानुज्ञातो जुहुयात् ।

ब्रह्मन्होष्यामीत्यामन्त्र्य ।

मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति
साकꣳ सूर्येणोद्यता साकꣳ रश्मिभिः प्रचरन्तीत्येकेषाम् ॥ ९ ॥

गतार्थम् । पौर्णमासं तन्त्रं संतिष्ठते ।

तदानीमेव महाहविर्भिर्यजते ।

प्रमासायामिष्टौ महाहविर्नामकैर्हविर्भिर्यजते । तत्र तान्यपि हवींषि साकमेधश-ब्दवाच्यानि । तथा चानीकवत्प्रभृतिषु पञ्चस्वपीष्टिषु साकमेधीयं हविरित्येव ।

तेषां वारुणप्रघासिकेनोत्तरेण विहारेण कल्पो व्याख्यातः ।

उत्तरविहारकर्मणा व्याख्याता गतार्थता । अत्रानुख्यमानपक्ष एव बह्वनुग्रहाय ।

पञ्च संचराणि निरुप्यैन्द्राग्नमेकादशकपालं
निर्वपत्यैन्द्रं चरुं वैश्वकर्मणमेककपालम् ।

गतार्थम् ।

असꣳसृष्टमैन्द्राग्नमवहत्य तस्य प्रज्ञाताꣳस्तुषान्निदधाति ।

नानाबीजवत्पृथङ्निर्वापाद्यवहननं तस्यैन्द्राग्नस्यैव तुषानवभृथार्थं निदधाति । अन्ये-षामेव तुषैरुपवापः ।

कार्तिक्यां यथाऽऽषाढ्यामेवं पृषदाज्यं
गृह्णाति मार्गशीर्ष्यां तु यथा श्रावण्याम् ।

गतार्थम् ।

अग्ने वेर्होत्रं वेर्दूत्यमूर्ध्वो अध्वरेष्ठा अवतां त्वा
द्यावापृथिवी अव त्वं द्यावापृथिवी अव
स्विष्टकृदिन्द्राय देवेभ्यो भव जुषाणो अस्य हविषो
घृतस्य वीहि स्वाहेति स्रुचमाघारमाघारयति ।

द्वितीयाघारे वैशेषिको मन्त्रो गतार्थः । इन्द्रो देवा वा देवता ।

सहश्च सहस्यश्चेति चतुर्भिर्मासनामभिरेककपालमभि-
जुहोति सहसे स्वाहा सहस्याय स्वाहेति वा ।

गतार्थम् ।

इदावत्सरीणाꣳ स्वस्तिमाशास्ते दिव्यं धामाऽऽ-
शास्त इति सूक्तवाकस्याऽऽशीःषु होताऽनुवर्तयति ।

गतार्थम् ।

ऐन्द्राग्नतुषैरवभृथमवयन्ति गमनसंयुक्तं
तुषप्रतिपादनं च क्रियते ॥ १० ॥

इति सत्याषाढहिरण्यकेशिसूत्रे पञ्चमप्रश्ने तृतीयः पटलः ॥ ३ ॥

अत्रावभृथशब्दो गौणः पूर्ववद्धर्मानभिधानादतः परिसंख्येतरकर्मणामिति दर्शयितु-मुक्तं गमनसंयुक्तं यावत्तावदेव कृत्वाऽवभृथं गत्वा तुषांस्तूष्णीमेव प्रतिपादयतीत्यर्थः ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवै-
जयन्त्यां पञ्चमप्रश्ने साकमेधस्तृतीयः पटलः ॥ ३ ॥

अथ पञ्चमप्रश्ने चतुर्थः पटलः ।

तदानीमेव महापितृयज्ञेन यजते ।

पिण्डपितृयज्ञान्महापितृदेवताको यज्ञस्तेन साकमेधैः सहैतस्य त्रैयम्बकस्य च समानप्रधानता । साकमेधान्पितृयज्ञं त्र्यम्बकानिति पृथङ्निर्देशात् ।

दक्षिणतःपुरस्ताद्दक्षिणाग्नेर्यजमानमात्रीं चतुरश्रां वेदिं करोति ।

दक्षिणाग्नेर्दक्षिणतःपुरस्तादिति विदिक्ष्वाग्नेयकोणाभिमुखां चतुरश्रां न दीर्घां प्राकृतवेदिबाधेन ।

तस्याः प्रतिदिशꣳ स्रक्तयो भवन्ति ।

तस्या वेदेः स्रक्तयः कोणा दिक्षु भवन्ति । तत्रैवमूह्यं दक्षिणाग्निमध्ये शङ्कुं निखाय चतुरस्रं कृत्वा मध्ये शङ्कौ पृष्ठ्यायाः पाशं निधाय तां रज्जुं चतुरश्राग्नेय-कोणेन नीत्वा वितत्य ततो दक्षिणाग्न्यायतनभ्रमणरेखारज्जुसंयोगे शङ्कुं निहत्य तत्र यजमानमात्र्या रज्ज्वा उभयतःपाशायाः पाशं निधाय द्वितीयपाशं वितत्य पृष्ठ्यां निहितशङ्कौ निदधाति सा प्राची । पृष्ठ्यायामेतया चतुरश्रं यजमानमात्रं विहृत्य समानसंनामां[2] कुर्यात् । सा च विदिक्षु संनता दिक्स्रक्तिः पितृमेधीयवेदिः ।

अवान्तरदेशाꣳस्तनुमध्यानि[3] ।

[4]विदिशः प्रति तनूनि संनतानि मध्यानि मध्यभागाश्चतुरश्राया भवन्ति । विदिश

---

१ ख. ग. च. ट. ठ. ड. ण. °नं क्रि° । २ च. ट. °समानं कु° । ३ घ. ङ. ढ. °शानमु° । ञ. ध. म. °शातमु° । ४ च. ट. °दिशान्प्रति ।

आग्नेय्याद्या एव कर्माणि तु स्वभावतः सिद्धा एव प्रागादिदिशो भवन्तीति ज्ञेयम् । दक्षिणस्रक्तिं दक्षिणेन ब्रह्मयजमानस्थान उत्करस्तूत्तरस्रक्तिप्राचीनस्रक्तिमध्यदेश एव । तृतीयभागे द्विपदेन पश्चिमस्रक्तिसमीप उत्तरतो होतुः स्थानं तदनुरूपतया यजमान-होतृषदनानि भवन्ति ।

सर्वत्र देवप्रवादमन्त्रं देवपितृवत्संनमति ।

सर्वेषु सर्वग्रहणमापस्तम्बमतव्युदासार्थं तदग्रे वक्ष्यते । देवान्प्रकृष्टतया प्रयोगतया प्रधानकर्मसमवेततयेति यावत् । तथा यो वदति मन्त्रः स देवप्रवादः । एकवचनं जातिख्यापनार्थं, तं मन्त्रं, देवपितृवत्, देवाः पितरश्च प्रतिपाद्यत्वेन विद्यन्ते यस्मिन्न-भिधानकर्मणि तद्वत्तं संनमति तथोहति क्रियाविशेषणं नपुंसकम् । अथवा देवपितृप्र-वादं मन्त्रवत्संनमति उभयपदयुक्तान्करोति ।

विकृतस्य प्राकृतानन्तरं समावेशं दर्शयन्नुदाहरति—

यथा पृथिवि देवपितृयजनि देवानां पितॄणां परिषूतमसि देवपितृबर्हिर्मा त्वाऽन्ववस्मा तिर्य-क्पर्वणे वां देवेभ्यः पितृभ्यः शकेयमिति ।

संनामेन देवपदस्य त्यागो मा भूदिति द्व्यवन्मन्त्राः पठिताः । अत्र हि श्रूयते—उभये हि देवाश्च पितरश्चेज्यन्त इति । तत्र सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपतीति सोमो देव इज्यते स पितृणां राजेति पितृत्वम् । पितृभ्यो बर्हिषद्भ्यो० मासा वै पितरो बर्हिषद इति मासाभिमानिनां देवानां तथात्वम् । एवमुत्तरत्रापि तेषामपि पितृत्वं श्रूयते—ये वै यज्वानस्ते पितरोऽग्निष्वात्ता इति । सर्वेषां देवत्वं पितृत्वमस्तीति देवाश्चेति भवति बहुवचनेन निर्देशस्तस्माद्द्वयोरपि पदयोर्ग्रहणमिति भावः । अत्र प्रथमं देवस्य त्वेति मन्त्रमुपेक्षितवान् । तत्रायमभिप्रायः—इज्यमानदेववाचिनो देवपदात्पितृपद-मूहनीयमुक्तं श्रुतेरेवं स्वयमप्युक्तवान्यथार्थमूह इति । तत्तु पितॄणामिज्यमानानामेव चात्र प्राप्तिस्त इज्यमाना एव देवा यत्र मन्त्रे प्रतिपाद्या देवपदेन तत्रैव पितृपदमूह-नीयं देवस्य त्वेति मन्त्रे देवपदं नेज्यमानदेवप्रकाशकमपि तु द्योतनात्मकस्यासमवेतस्य सवितुस्तस्य ततो नोहः । उपसर्जने देवपदे नोह इत्यापस्तम्बः । ये के च देवसंयुक्ता मन्त्रा देवेभ्यः पितृभ्य इति तान्संनमति । यथा भवति पृथिवि देवपितृयजनीत्यविकारो वा परवाक्यश्रवणादिति देवापित्रे(त्रि)ष्ट्यामिति पृथिवि देवपितृयजनीत्युक्तं समवेतदेवप्र-काशकत्वं यथा देवेभ्य इत्यत्र तथाऽत्रापीति भावः । बर्हिराहरणे प्रथममुदाहरणमनुप-सर्जनं देवानां प्रतिपादकं द्वितीयमुपसर्जनं देवानां ततस्तु मध्येऽन्वाधानमन्त्राणामूहो

१ ख. ग. घ, ज झ ञ ट. ठ ड. ण. पितृणा । २ ख. ट. °वय° ।

नोक्तः । तत्र विहव्यानामसमवेतार्थप्रकाशकत्वान्न लिङ्गानुरोधो नानाकर्मसु विनियोगस्तु श्रुत्या, उपस्थानेऽग्निहोत्रे कश्चिद्व्यवयवेनैव । तस्मान्नाऽऽसां दर्शपूर्णमासदेवताप्रतिपादकत्वमतो नोहः । अग्निं गृह्णामीत्यादीनां च देवतापदेषु नोहस्तस्य हविर्भागिदेवपितृसाधारणत्वात् । देवपदं हि प्राकृतजातिवाचि न देवतापदं तस्य संप्रदानवाचित्वात् । तथा च यो वै देवताः पूर्वः परिगृह्णातीत्युक्त्वैतद्वै देवाना-मित्यादिना देवपितृमनुष्याणामुपसंहारेणाग्निं गृह्णाति । स एवाऽऽयतने देवताः परि-गृह्णातीति सर्वे देवमनुष्यपितरो देवतापदेन गृहीताः । सूत्रकारोऽपि देवप्रवादमित्ये-वाऽऽह देवशब्देनैव प्रवदन्तीत्यर्थख्यापनाय । तान्देवान्पितॄनिति भवत्येवाग्रे च वक्ष्यते देवेभ्यः पितृभ्यो जुष्टमिहेति । देवानां पि०देवपितृबर्हिरित्युक्त एव । देवपितृबर्हिः शतवल्शमिति देवपितृगमसि । तत्रापि देवान्यजेत्यत्र न भवति । यत्र प्रधानाङ्गदे-वतासाधारण्येन प्रधानपरतया वा देवशब्दः स एवोह्यो नत्वन्य इत्याद्यूह्यम् । प्रयोगे स्पष्टं भवेत् । वेदे देव वेदेत्यविकृतं देवेभ्यो वेदेति च नोह्यं भूतार्थस्तुत्या प्रवृत्तत्वात् । वेदोऽसि वित्तिरसि विदेयेत्याहेत्यत्र देवजातेर्वित्तवेदयितृत्वेन भूतार्थो गृहीतोऽत्राप्य-भव इति भूतप्रत्ययात् । यो वो देवाः पितरश्चरतीति त्रिविधानि कर्माणि प्रधानहवि-र्मात्रसंस्कारकाणि । यथा साङ्गनिर्वापप्रोक्षणावहननादिकान्यासादनान्तानि ततस्तान्येवं-जातीयकानि ज्ञेयानि कानिचित्प्रधानस्येत्यङ्गभूतान्यदृष्टार्थानि आद्यानि, द्वितीयान्यङ्ग-द्रव्यसंस्काररूपाणि । यथाऽऽज्यग्रहणं जुहूपभृतोः । तृतीयानि अङ्गप्रधानार्थद्रव्यसं-स्कारकाणि । यथाऽन्वाधानबर्हिःपाणिप्रक्षालनवेदिकरणाज्यनिर्वापादीनि । तत्रादृष्टा-र्थेषु नोहस्तथा च समवेतप्रकाशकेषु यथा देवान्यजेति तथा देवस्य त्वेत्यादि । इतरेषु समवेतदेवतावाचकपदेषूहः कार्यः । अत्र केचिदाहुः–प्रधानद्रव्यसंस्कारेषु देवपदस्थाने पितृपदमिति, तेषामभिप्रायः—सोमादयः पितृरूपा एव । यदपि श्रुतौ–उभये हि देवाश्च पितरश्चेज्यन्त इति तदङ्गप्रधानाभिप्रायमिति तदतिमन्दम् । सोमादीनामेकैकस्यै-वोभयात्मकत्वमाह श्रुतिः । कुतः, दक्षिणतः प्राचीनावीती निर्वपतीति तथोत्तरत एवो-पवीय निर्वपेदिति विकल्पेनोभयधर्मदर्शनात् । संवत्सरो वै सोमः पितृमानित्यादिना च प्रधानदेवतानामेव द्विरूपतोच्यतेऽतस्त्वं देवानामित्यादावपि सत्येव देवपदे पितृपदमपि द्वितीयमावपनीयमिति संक्षेपः ।

अत्राऽऽदौ वेदं कृत्वा वेदिमेव करोतीत्याह—

उद्धननान्तं कृत्वा सर्वतः परिश्रित्योत्तरा९ स्रक्तिं द्वारं कृत्वा ।

उद्धननान्तैव वेदिरखाता भवतीति श्रुतेः । इमा नरा इत्यादि न लुप्यते । अदृष्टार्थ-

१ छ. °स्मात्तासा । २ च. ट. °षु स्ववत्पदसोमे पि° ।

स्त्वादत्र प्रैषस्य। ऋतमसीति पूर्वपरिग्राहः। सर्वासु दिक्षु कटादिना परिश्रयणं वेद्देरे-वाऽऽवरणम्। उत्तरां स्रक्तिं द्वारं कृत्वा।

दक्षिणाग्नेरङ्गारानाहृत्य मध्ये वेदेर्न्युप्योपसमादधाति।

मध्यतोऽग्निराधीयत इति श्रुतेः।

एषोऽत्राऽऽहवनीयः।

गतम्।

आहवनीयं गार्हपत्यं दक्षिणाग्निं चान्वाधाय।

अमुमेवाऽऽहवनीयं प्राकृते प्रणीतेऽपि नान्वाधानमिति वक्तुमुक्तः क्रमः। नो चेदग्नी-नन्वाधायेति ब्रूयात्ततः सर्वेषामन्वाधानं प्राप्नुयात्तदनङ्गे प्राकृत आहवनीये मा भूदिति त्रयाणामेव ग्रहणम्। देवान्पितॄन्परिगृह्णामीति माहापितृयज्ञं हविः।

इध्माबर्हिराहरति द्राघीयः प्राकृ-
तात्समूलं बर्हिर्दात्युपमूललूनं वा।

इध्माबर्हिः प्राकृताद्दीर्घम्। वर्षीयानिध्म इध्माद्भवतीति श्रुतेः। बर्हिस्तु सह मूलै-रुत्पाटितं मूलसमीपे छिन्नं वा पूर्वत्र न च्छेदनं तन्मन्त्रश्च।

द्वौ परिधी सर्वान्वोपसंनह्यति।

इध्मे द्वौ त्रीन्वा संनह्यति। यदा द्वौ तदा विंशतिर्भवेत्यूहः। न चेत्र। समानासु सामिधेनीषु ³तत्स्व(तीष्व)सौ यथाप्रकृतीत्युक्तत्वात्।

पात्रसंसादनकाले यथार्थं पात्राणि प्रयुनक्ति।

गतम्।

सोमाय पितृमते षट्कपालानि पितृभ्यो
बर्हिषद्भ्यो धानार्थं कपालम्⁴।

स्थूलमित्यर्थः।

पितृभ्योऽग्निष्वात्तेभ्यो मन्थार्थं वारणं पात्रं शरावं वा।

वरणवृक्षस्य पात्रं मृन्मयं शरावम्।

निर्वपणकालेऽध्वर्युर्दक्षिणतः शक-
टमारुह्य प्राचीनावीती यवान्निर्वपति।

अध्वर्युरेव प्राचीनावीती, अग्रे सर्वेषां प्राचीनावीतित्वविधानात्।

---

१ ठ. ड. °णीय तेनापि। २ घ. ङ. ज. झ. ञ. ढ. °यः प्रश्न'। ३ च. ट. सह्वासो। ४ ख. ठ. ड. °म्। स्थल°।

उत्तरतो वा यज्ञोपवीती ।

उत्तरतः शकटमारुह्य यज्ञोपवीती निर्वपति ।

सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपत्याज्यं वा ।

आज्यं तु यागकाल एव नत्विदानीम् । आज्येन यजतीत्यर्थः ।

पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्नि-
ष्वात्तेभ्यो मन्थं यमाय मन्थमित्येकेषाम् ।

मन्थस्य विकल्पेन देवताद्वयम् ।

प्रोक्षण्युद्रेकेण यवान्संयुत्यावहन्ति ।

गतम् ।

त्रिष्फलीकृतेषु विभागमन्त्रेण षट्कपालमपच्छिद्य पिनष्टि ।

तमेव पिनष्टि ।

उपधानकाले—

दक्षिणार्धे गार्हपत्यस्य षट्कपालान्युपधाय प्रथमेन
कपालमन्त्रेण[1] दक्षिणार्धौ[2] भर्जनार्थं कपालमुपदधाति ।

यवानां भर्जनयोग्यं कपालं, प्रथमग्रहण*मूहप्रतिषेधार्थम् ।

षट्कपालमधिश्रित्याधिश्रयणमन्त्रेणो[3]प्य धाना भर्जयति ।

धानार्थान्यवान् ।

अनुपदह्यमानाः परिशेरते ॥ ११ ॥

धानाः कपालस्था एव यथा न दग्धा भवन्ति तथा करोतीत्यर्थः ।

अखाता वेदिर्भवत्युत्तरं परिग्राहं परिगृह्य ।

गतम् ।

संप्रैषेण प्रतिपद्यते यदन्यत्पत्नीसंनहनात्तत्संप्रेष्यति ।

गतम् ।

न पत्नीं संनह्यति नान्वास्ते गृहेष्वेवाऽऽसीनाऽऽज्यमवेक्षते ।

स्पष्टम् ।

यत्प्रागाज्यग्रहणात्तत्कृत्वा प्रतिहृत्य गार्हपत्य आज्यानि गृह्णाति ।

आज्यानि गार्हपत्यं प्रत्यानीय गृह्णाति । पुनरानीय ग्रहणम् ।

---

* ग. च. ट. ठ. पुस्तकटिप्पण्यां 'णमन्यप्र' इति पाठः ।

---

१ ठ. ढ. 'ण धाना' । ड. 'ण धानार्थं द' । २ च. ट. ण. 'र्धौ धाना' । ३ ख. ग. ठ. ड. ण. 'न्त्रेण धा' ।

सर्वाणि चतुर्गृहीतानि द्विर्वोपभृति ।

अपबर्हिषः प्रयाजानूयाजा अतश्चतुर्गृहीतानि द्विर्वोपभृति गृह्णाति ।

प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्येध्मं वेदिं बर्हिश्च प्रोक्ष्य-
ण्यवशेषं निनीय पवित्रे अपिसृज्याग्रेषु बर्हिर्गृहीत्वा ।

इदमेव विधातुं पूर्वोक्तः ।

त्रिः प्रसव्यमग्निं धून्वन्पर्येत्यौर्ध्वः प्रस्त-
रस्तं धारयमाणस्त्रिरधून्वन्प्रतिपर्येति ।

सर्वं बर्हिर्गृहीत्वा विधून्वन्किरन्स्तृणान्निति यावत् । अप्रदक्षिणमग्निं परितो गच्छति । और्ध्वो यो भागो मुष्टिना यावान्गृहीतस्तावन्तं परिशेषयेत्तमेव प्रस्तरं धारयमाणस्तथैव प्रदक्षिणमस्तृणन्नेवं प्रतिपर्येति । इदमेव वेदिस्तरणं स्तरणमन्त्रः सकृत्स प्रस्तरो भवति प्रकृतबाधेन ।

द्वौ परिधी सर्वान्वा परिदधाति ।

गतार्थम् ।

प्रतिषिद्धे विधृती तूष्णीं प्रस्तरं न्यस्य-
त्युद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते ।

प्रस्तरस्थाने विना विधृती तूष्णीं तूष्णीमेव न्यस्येदिति श्रुतेस्तं मुष्टिं प्रस्तरत्वेन न्यस्यति ।

यत्प्रागलंकरणात्तत्कृत्वा ।

गतम् ।

विभागमन्त्रेण धाना विभज्य पिष्टानामावृताऽर्धान्सक्तून्कृत्वा ।

कपालस्था धाना भृष्टास्तण्डुलास्तासामर्धस्तदर्धो भागो(?)यथाभागं व्यावर्तेथामिति विभज्य सक्तून्पिष्टानि करोति । पिष्टानामावृताऽधिवपनादिविधिना । पिष्टानामावृतेति वचनं न्यायोपलक्षणार्थं व्यत्ययेन क्रियमाणयोः पाकपेषणयोः प्राकृतधर्मलाभार्थं वार्तिककृता साधितम् ।

अभिवान्यवत्साये दुग्धे वारणे पात्रेऽर्धशरावे वेक्षु-
शलाकया दक्षिणासीनोऽनारभमाणस्त्रिः प्रसव्यं
मन्थमुपमन्थति शलाकास्तम्बं मन्थं करोति ।

सक्तूनभिवान्यवत्साया दुग्धे वारणपात्रस्थिते त्रिरप्रदक्षिणमुपमन्थति दक्षिणामुख आसीनो मन्थमनारभमाणः साक्षादस्पृशन्मन्थति । कथं तर्हि मन्थति तत्राऽऽहेक्षुश-

---

१ घ. च. ऽ. 'ताऽर्धाः मन्तु' ।

आकया रज्जुकृतयाऽन्येन शलाकासमुदायेन मन्थरूपेण वारणे पात्रे शरावस्य विकल्पः सूत्रविशेषस्तच्छरावमर्धपूरितं दुग्धेन तत्र मन्थति पूर्ववदन्यत् ।

दक्षिणाग्नेरेकोल्मुकं धूपायत्पराचीनमपरेण गार्हपत्यमत्याहृत्या-ग्रेणाऽऽहवनीयं पर्याहृत्य दक्षिणेनाऽऽहवनीयमन्तर्वेदि निदधाति ।

पराचीनं प्रत्यगानीय पश्चाद्गार्हपत्यमतिक्रम्योत्तरतो विहारस्याऽऽनीय प्रकृताह-वनीयस्याग्रेण परितो नीत्वा दक्षिणाहवनीयस्याप्यग्रेण नीत्वा तस्यैव दक्षिणत उल्मुकं निदधाति ।

अलंकृत्यैकैकश आज्यानि हवींषि चाऽऽसादयति ।

एकैकमेवाऽऽज्यमेकैकमेव हविश्च गृहीत्वा दक्षिणाहवनीयस्य पश्चाद्भागे स्तीर्णे बर्हिष्येकैकमेवाऽऽसादयति यथाप्रकृति ।

दक्षिणत आञ्जनमभ्यञ्जनं कशिपूप-बर्हणमुदकुम्भं च प्रतिष्ठापयति ।

हविषो दक्षिणभागे कज्जलमञ्जनं मस्तु तैलं वाऽभ्यञ्जनं कशिपु तूलिकोपबर्हणं शिरउपधानमुदकपूर्णं कुम्भं च स्थापयति ।

यज्ञोपवीतं कुरुते यदि प्राचीनावीती भवति ।

हविर्निर्वपणकाले यदि यज्ञोपवीत्येतर्हि तदस्त्येव । यदि तत्र प्राचीनावीतं स्यात्त-देतावत्कालं तथैवेदानीं यज्ञोपवीतं कुर्यात् ।

अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहीति संप्रेष्यति ।

वाचनिकोऽयं प्रैषो न तूहेन तस्योहस्याप्राप्तेः ।

उशन्तस्त्वा हवामह इत्येतां सामिधेनीं त्रिरन्वाह ।

एकामन्वाह त्रिरन्वाहेति याजुषहौत्रमिदमाध्वर्यवकाण्डपठितं व्याख्यातम् । अत्र[१] याजुषे हौत्रे तु मध्ये पूर्वयाऽर्धर्चसतानो न नाप्युत्तरया । वक्ष्यति स्वयमेव-ऋषेर्ऋषेर्वेति । ये हि ऋषिदृष्टे ऋचौ तयोर्देव(?)संतानेनानुवचनमन्यथा नास्तीति ।

त्रैधमिध्मं प्रतिविभज्य सर्वमादधाति ।

पञ्च पञ्चैकैकस्मिन्प्रणव एकैकामन्ते सर्वास्वादधाति ।

ओढासु देवतास्वग्निमुपवाज्य स्रुवाघारमाघार्याग्नी-त्परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढीति संप्रेष्यति ।

यदि द्वौ परिधी यदि त्रयो यथाप्रकृति प्रैषः । स च प्रथमाघारानन्तरमेव ताव-दन्यथाऽन्यत्प्रकृतम् ।

---

१ ग. ण. 'ष प्राक्'। २ ख. ग. ङ. ण. 'ति । यदि हि ।

संमृष्टे प्रवरं प्रवृणीते ॥ १२ ॥ सीद होतरित्येतावान्प्रवरः ।

ब्रह्मणा प्रसूत आश्राव्याऽऽह सीद होतरिति तथैव भारद्वाजापस्तम्बोक्तत्वादिदं वक्तुमेतावानेवेत्युक्तम् । स्पष्टमन्यत् ।

स्रुच्यमाघार्य—

अपबर्हिषः प्रयाजान्यजति नोपभृतः समानयते ।

गतार्थम् ।

जीवातुमन्तावाज्यभागौ ।

गुणविशिष्टावाज्यभागौ ।

ताभ्यां प्रचर्य ।

गतम् ।

विस्रस्य यज्ञोपवीतानि प्राचीनावीतानि कुर्वते ।

सयजमाना ऋत्विजो यज्ञोपवीतग्रन्थीन्विस्रस्य शिथिलान्कृत्वा प्राचीनावीतानि सर्वेऽपि कुर्वते ।

आज्यानि हवींषि च विपरिहरन्ति ।

व्युत्क्रमेण स्थापयन्ति ।

विपरिक्रामन्त्यृत्विजः ।

व्युत्क्रमेण तिष्ठन्ति ।

दक्षिणतो जुह्वामु(उ)पभृतः सादयति ।

जुहूर्यथास्थानगतं(ता) । तस्या दक्षिणभाग उपभृतम् ।

दक्षिणत उपभृतं ध्रुवाम् ।

तदुत्तरतः स्रुवेण सहितां स्थालीम् । गतम् ।

दक्षिणतः पुरोडाशं धानाः सादयति दक्षिणं धानाभ्यो मन्थम् ।

गतम् ।

होताऽध्वर्युराग्नीध्रश्च दक्षिणा विपरिक्रामन्ति ।

उत्तरस्रक्तौ स्थिता दक्षिणस्रक्तिमागत्य तिष्ठन्ति ।

उत्तरतो ब्रह्मा यजमानश्च ।

दक्षिणस्रक्तौ स्थितावुत्तरस्रक्तौ तिष्ठतः । आहवनीयाभिमुखाः सर्वेऽपि ।

समानत्र जुहूः षट्कपालश्च ।

एतयोर्न व्यत्ययोऽपि तु समानत्र पूर्वस्थान एव तिष्ठतः ।

---

१ ब. क. ज. ञ. भ. ड. जीववन्तौ । २ ख ग. ठ. ङ. ण. °स्थाने । ग° । ३ ङ. ज. ञ. भ. °क्षिणामुपभृति ध्रु° । ठ. ड °क्षिणा उ° ।

ब्रह्मयजमानावित्येकेषाम् ।

अनयोः पूर्वं व्युत्क्रमणमुक्तं तत्र विकल्पः । पूर्वत्रैव तिष्ठत एकेषाम् ।

सर्वेभ्यो हविर्भ्यः समवदायैकैकां देवतां यजति ।

सर्वेभ्यस्त्रिभ्यः सकृत्सकृदवद्यतीत्यापस्तम्बभरद्वाजोक्तेः । एकैकामेव देवतां यजति । तदेवाऽऽह—

जुह्वामुपस्तीर्य पुरोडाशादवदाय धानानामुपसंगृह्णीतेऽथ मन्थस्य ।

अवदानं सकृदेव । उपसंग्रहणं संस्कारार्थं वचनात् । अन्यथाऽन्यस्यै निर्वापोऽन्यस्या अपि दानं कथं स्यात् । अत उक्तमुपसंगृह्णीत इति ।

द्विरभिघारयति चतुरवदानस्य त्रिः पञ्चावत्तिनः ।

चतुरवदानस्य यजमानस्य वचनादत्र षडवत्तं द्विरभिघारणेनान्यस्य त्रिरभिघारणेन +समावत्तम् ।

सोमाय पितृमतेऽनु स्वधेति संप्रेष्यति द्वे पुरोनुवाक्ये अग्ना[१]हैकैकां याज्याः[२] समणवे स्याताम् ।

द्वे पुरोनुवाक्ये प्रणवान्ते स्याताम् । ब्रूहि, श्रावय, श्रौषट्, ये यजामहे, वौषट्, एतेषामपवादत्वेनान्ये स्वधेति पञ्चाना स्थाने विधीयते वषट्कारस्थाने स्वधा नम इति ।

परिधीन्स्पर्शयित्वोच्यमाने दक्षिणमुत्तरं परिधिं मध्यमेमुपसमस्यति ।

सह निदधाति । होत्रे त्वया हि नः पितरः सोमपूर्व इति याज्यायां वन्वन्वातः परिधीन्स्पर्शयेति पदत्रये श्रूयमाणे ।

उदङ्ङतिक्रम्याऽऽस्वधेत्याश्रावयति ।

दक्षिणतः स्थित उदक्क्रान्तिमागत्याऽऽस्वधेत्याश्रावयति, दक्षिणामुख इत्येव । तथैव सूत्रान्तरेष्वपि ।

अस्तु स्वधेति प्रत्याश्रावयति सोमं पितृमन्तः स्वधेति संप्रेष्यति ये स्वधामह इत्यागूर्भवति स्वधा नम इति वषट्करोति ।

प्लुतस्तु यथाप्रकृति विकारेष्वपि ज्ञेयः । वृत्रहा भूयासम् । एवं पितरो बर्हिषदः पितरोऽग्निष्वात्ताश्चाग्नीषोमीयविकारौ विशेषणेन ह्यधिकाधिकारत्वात् । गतार्थमन्यत् ।

\+ अत्रागवत्त मिश्रपेक्षितं न वेति विचारणीयम् ।

---

१ घ. ङ. ज. झ. ञ. ढ 'ग्नौ षि' । २ ख. ग. घ. च. ज.झ. ञ. ट. ड. ण. 'म उप' ।

एतेनैव कल्पेनोत्तराभ्यां प्रचरति ।

धानामन्थाभ्यां हविर्भ्याम् । एतनेति चतुरवत्तिनः पञ्चावत्तिनश्चोक्तावदानकल्पेनेत्येतावदतिदिश्यतेऽन्यत्स्वयमेव दर्शयति ।

दक्षिणाऽतिक्रम्य जुहू मुपस्तीर्य धानानामवदाय पुरोडाशादुपसंगृह्णीतेऽथ मन्थस्य पितृभ्यो बर्हिषद्भ्योऽनुस्वधेति संप्रेष्यत्युदङ्ङतिक्रम्याऽऽस्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयति पितॄन्बर्हिषदः स्वधेति संप्रेष्यति ये स्वधामह इत्यागूर्भवति स्वधा नम इति वषट्करोति दक्षिणाऽतिक्रम्य जुहामुपस्तीर्य मन्थादवदाय पुरोडाशादुपसंगृह्णीतेऽथ धानानां पितृभ्योऽग्निष्वात्तेभ्योऽनुस्वधेति संप्रेष्यत्युदङ्ङतिक्रम्याऽऽस्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयति पितॄनग्निष्वात्तान्स्वधेति संप्रेष्यति ये स्वधामह इत्यागूर्भवति स्वधा नम इति वषट्करोत्येतेनैव कल्पेनाग्निं कव्यवाहनꣳ स्विष्टकृतं यजति दक्षिणाऽतिक्रम्य जुहामुपस्तीर्य पुरोडाशादवदाय धानानामुपसंगृह्णीतेऽथ मन्थस्याग्नये कव्यवाहनाय स्विष्टकृतेऽनुस्वधेति संप्रेष्यत्युदङ्ङतिक्रम्याऽऽस्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयत्यग्निं कव्यवाहनꣳ स्विष्टकृतꣳ स्वधेति संप्रेष्यति ये स्वधामह इत्यागूर्भवति स्वधा नम इति वषट्करोति॥ ११ ॥

अत्राऽऽवृत्तिर्मध्ये सूत्रान्तरदृष्टवैकल्पिकपक्षनिरासार्थमित्येवं ज्ञेयम् ।

मन्थमेके स्विष्टकृतꣳ समामनन्ति[२] ।

मन्थं स्विष्टकृतमेव निरूप्य सैव देवता पितॄणामग्निष्वात्तानां विकल्पेन यमस्तु विकल्पेन पूर्वं दर्शित एव । एवं च देवतात्रयं मन्थस्य विकल्पेन[३] ज्ञेयम् । अत एवाऽऽहाऽऽपस्तम्बः—यथासमाम्नायमग्नये कव्यवाहनाय यमाय वा मन्थमिति । तथाच स्विष्टकृद्यागाय पुनरपि तमेवाग्निं स्विष्टकृतं तु यजत्येव स्विष्टकृल्लक्षणप्रतिपन्ने स्थाने तस्याविधानात्तल्लोपो मा भूदित्यस्त्येव स्विष्टकृत् ।

न प्राशित्रमवद्यति ।

प्रतिषेधात् ।

---

१ घ. ङ. ज. ञ. ढ. °ल्पेन यथादेवतमुत्त° । २ घ. ङ. ज. झ. ञ. ढ. °के स्रोविष्ट° । ३ ख. °न तथाच निर्वाप एव ज्ञे° । च. ट. °न निर्वाप एव ज्ञे° ।

एवमेवेडामवघ्राति ।

सर्वेभ्यो हविःशेषेभ्यश्चतुरवत्तिनः पञ्चावत्तिन उक्तावदानधर्मेण ।

मन्थमिडामवघ्राति मन्थादिडामवघ्रातीत्येकेषाम् ।

सर्वं मन्थमिडामेवावघ्राति नान्यत् । मन्थादेव वेति विकल्पौ ।

मन्थमवघ्राणार्थं परिशिष्य ।

सर्वहविःशेषात्सकाशान्मन्थावशेषं पृथक्कृत्यावघ्रातुं प्रज्ञातं निदध्यात् ।

इडायां[१] हविःशेषान्संश्लिष्य ।

ये हविःशेषा अवदानातिरिक्तास्तानपीडायामेवावधाय मर्दनेनैकीकृत्य ।

एतत्ते ततेति तिसृषु स्रक्तीषु त्रीन्पिण्डान्निदधाति ।

एतत्ते तत ये च त्वामन्विति । एतत्ते पितामह ये च त्वामन्विति । एतत्ते प्रपिता-
मह ये च त्वामन्विति । अत्रैतत्ते ततासावित्यापस्तम्ब आचार्योऽपि पिण्डपितृयज्ञे
यथैवोक्तवानिति चात्रासाविति नोक्तः । ततस्तु पिण्डपितृयज्ञवदेव मन्त्रा ज्ञेया इति
केचित् ।

पिण्डस्थानान्याह—

पूर्वार्ध्यायां दक्षिणार्ध्यायां पश्चार्ध्यायाम् ।

पूर्वो भागस्तत्र भवा पूर्वार्ध्या । तस्यां स्रक्तौ प्रेत्यञ्चमेव क्रमेण त्रीन्पिण्डान्नि-
दधाति । आध्वर्यवमेवेदम् ।

लेपमुत्तरस्यां निमार्ष्टि ।

उत्तरस्यां स्रक्तौ हस्तं लिप्तं निमार्ष्टि ।

अत्र पितरो यथाभागं मन्दध्वमित्युक्त्वोदञ्चो निष्क्रामन्ति ।

दक्षिणतो विद्यमानाः सर्वे सयजमाना ऋत्विजः । यदि ब्रह्मा यजमानश्चोत्तरो
यातां तदाऽन्ये ।

तत आहवनीयमुपायन्ति ।

सयजमाना ऋत्विज आहवनीयं दक्षिणं समीपमागच्छन्ति । तत उत्तरतः ।

सुसंदृशं त्वा वयमित्याहवनीयमुपतिष्ठन्ते ।

हरी इत्यन्तेन ।

आतमितोस्तिष्ठन्ति ।

श्वासं निरुध्य यावत्तुतिः स्यात्तावत्तिष्ठन्ति ।

अक्षन्नमीमदन्त हीति गार्हपत्यमुपतिष्ठन्ते ।

हरी इत्यन्तेन ।

---

१ ख. ग. ङ. ठ. ड. ण. 'न्संप्रक्षि' । २ ख. ग. ठ. ड. ण. प्रति एवमे' ।

अक्षन्पितरोऽमीमदन्त पितर इति प्रतिपद्यन्ते ।

उत्तरत आगच्छन्ति मदन्तीत्यन्तेन ।

मन्थꣳ होताऽवजिघ्रति ।

हविःशेषात्पृथक्कृतं मन्थावदानं होताऽवजिघ्रति ।

अथाध्वर्युरथ ब्रह्माऽथाऽऽग्नीध्रोऽथ यजमानः ।

तमेव मन्थभागमेतेऽपि क्रमेणावजिघ्रन्ति ।

मन्थꣳ होताऽवघ्रायान्तर्वेदि निनयतीत्येकेषाम् ।

नान्येऽवजिघ्रन्ति ।

उदकुम्भमादायाया विष्ठा जनयन्कर्व-
राणीति त्रिः प्रदक्षिणं परिषिञ्चन्पर्येति ।

वेदिपरितः । स्पष्टम् ।

निधाय कुम्भं त्रिरपरिषिञ्चन्प्रतिपर्येति ।

गतार्थम् ।

अत्राञ्जनाभ्यञ्जने वासोदानं नमस्कारानुत्थापनीयं प्रवाहणीꣳ
सꣳसाधनीं मनस्वतीं पङ्क्तिप्राजापत्याश्च समामनन्ति ।

असाववनेनिक्ष्वेति, असावभ्यङ्क्ष्वेति, एतानि व इति, नमो वः पितर इति, उत्तिष्ठत पितरः प्रेतपूर्वे इति, परेत पितर इति, यन्तु पितर इति, मनो न्वाहुवामह इति, अक्षन्नमीमदन्तेति, प्रजापत इति, एतैर्यथाविहितं कार्यमित्याह ।

यथा पिण्डपितृयज्ञे ।

गतम् ।

व्यवच्छादयन्ति परिश्रितम् ।

आवरणं निष्काशयन्ति ।

संप्रसारयन्ति परिधीन् ।

यथास्थानं कुर्वन्ति ।

विस्रस्य प्राचीनावीतानि ।

अनुवादोऽयम् ।

विधत्ते—

यज्ञोपवीतानि कुर्वत आज्यानि[१] हवीꣳषि च विपरिहरन्ति
विपरिक्रामन्त्यृत्विजोऽप्रबर्हिषावनूयाजौ यजति देवौ

---

१ घ. ङ. ज. झ. ञ. ट 'नि वि' ।

यज यजेति पूर्वमनुयाजं संप्रेष्यति यजेत्युत्तरं सूक्तवाकं प्रति होता निवीतं कुरुते न पत्नीः संयाजयन्ति न समिष्टं जुहोति सर्वमन्यत्क्रियते ॥ १४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे पञ्चमप्रश्ने चतुर्थः पटलः ॥ ४ ॥

निगदव्याख्यातानि । सर्वपिष्टलेपफलीकरणहोमः सारस्वतहोमादि सर्वप्रायश्चित्तान्तं सर्वं करोति ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां पञ्चमप्रश्ने महापितृयज्ञश्चतुर्थः पटलः ॥ ४ ॥

अथ पञ्चमप्रश्ने पञ्चमः पटलः ।

रौद्रांस्त्र्यम्बकान्प्रतिपूरुषमेककपालान्निर्वपति ।

रुद्रा देवता निर्वापे त एव त्र्यम्बकनामानः ।

यावन्तो यजमानस्यामात्याः सस्त्रीकास्तत एकाधिकान् ।

गतार्थम् ।

तूष्णीमुपचरिता भवन्ति ।

दर्विहोमत्वान्नात्रातिदेशतोऽङ्गप्राप्तिरिति तूष्णीमित्युक्तम् । निर्वापमात्रे मन्त्रोऽन्यत्तूष्णीं सर्वमपि ।

दक्षिणार्धे गार्हपत्यस्य श्रप्यन्ते ।

पुरोडाशा इति शेषः ।

तानभिघार्यानभिघार्य वा ।

तुल्यश्रुतित्वाद्विकल्पः ।

मूते मूतयोर्मूतेषु कोशापिधाने वोद्वास्य ।

मूतं धान्याधानेन बन्धनार्थं तृणमयं व्याख्यातं, तेषां संख्याविकल्पः । कोशः करण्डः पेटा वा तस्यापिधानं पटलकम् । एतेषु कुत्रचिदुद्वास्य पुरोडाशान् ।

दक्षिणाग्नेरेकोल्मुकं धूपायत्प्राचीनमपरेण गार्हपत्यमत्याहृत्याग्रतो हरन्ति ।

धूपायद्धूमायत्प्राचीनमवाङ्मुखं गच्छतां बहिर्ऋत्विजां सपत्नीकसामात्ययजमानानामग्रे हरन्त्युल्मुकम् । स्पष्टम् ।

---

१ ख. ग. ठ ड. ण. °नस्य प्रेष्यामा° । २ ठ. ड. °मयमत्वा° । ३ ख. ग. न. ठ. ण. पेडा ।

यावन्तो गृह्याः स्म इति गार्हपत्यमुप*तिष्ठते ।

अध्वर्युरेव । द्वितीयाय तस्य इत्यन्तो मन्त्रः ।

उत्तरपूर्वमवान्तरदेशं गच्छन्ति ।

विहाराद्बहिरुत्तरपूर्वमीशान्यभागं गच्छन्ति सर्वेऽपि । ततस्तु यत्र चतुष्पथस्तत्र गच्छन्ति ।

आखुस्ते रुद्र पशुरिति व्रजमेयाऽऽखूत्कर एकं पुरोडाशमुपवपति ।

तं जुषस्वेत्यन्तो मन्त्रः । आखुनोत्कीर्णमृदि निदधाति गच्छन्नेव । तथा चतुष्पथं गच्छेद्यथा मध्य आखूत्करो भवति ।

चतुष्पथ एकोल्मुकमुपसमाधाय संपरिस्तीर्य ।

मार्गसंयोगश्चतुष्पथः । स्पष्टम् ।

मध्यमेन पलाशपर्णेनान्तिमेन वा सर्वेभ्यः पुरोडाशेभ्यः समवदायाभिघार्यैष ते रुद्र भाग इति जुहोति ।

सर्वेभ्यः पुरोडाशेभ्यः सकृत्सकृत्समवदाय पलाशपत्रेण जुहोत्युल्मुके । तं जुष-स्वेत्यन्तः ।

भेषजं गव इति द्वाभ्यामुपतिष्ठन्ते ।

सर्वे तमग्निमुपतिष्ठन्ते व्यवसाययादित्यन्तेन ।

प्रतिपूरुषं पुरोडाशानादाय ।

प्रतिमनुष्यम् ।

त्र्यम्बकं यजामह इति त्रिः प्रदक्षिणं चतुष्पथं परियन्ति ।

प्रत्येकं प्रतिप्रदक्षिणं मन्त्रावृत्तिः ।

सामान्यमुक्त्वा विशेषमाह—

तानूर्ध्वानुदस्य भगवः स्थ भगस्य वो लिप्सी-येति प्रतिगृह्य परीत्य यजमानाय समावपन्ति ।

प्रथमं तूष्णीमादाय पुरोडाशं तत ऊर्ध्वानाकाश उदस्य पश्चाद्भगवः स्थेति मन्त्रेण भूमौ पतन्तं पुरोडाशं प्रतिगृह्य त्र्यम्बकमित्यनेन परीत्य प्रदक्षिणीकृत्य चतुष्पथम् । ततो यजमानस्याञ्जलौ निक्षिप्य पुनरादायोर्ध्वमुदस्य प्रतिगृह्य परीत्य यजमानाञ्जलौ निधाय । तथैव तृतीयपर्यायेऽपि ।

---

* सूत्रपुस्तकेषु ' उपतिष्ठन्ते ' इति वर्तते ।

---

१ ख. ग. ठ. ड. °न्ति । आ° । २ व. ङ. ज. झ. ञ. ढ. °डाशानामु° । ३ घ. ङ. ज. झ. ञ. °नान्तमे° । ४ ख. ग. च. ठ. ड. ण. °भ्यः स° । ५ घ. ज. झ. ञ. ढ. पर्येति । ६ ग. ङ. च. ज. झ. ञ. ट. ण. °त्य परीत्य य° ।

यदि यजमानस्य दुहिता पतिकामा स्यात्सा विपरीयात् ।

सा वक्ष्यमाणमंत्रे[2] विशेषः । (?)

त मन्त्रमाह—

त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वा-
रुकमिव बन्धनान्[3]मृत्योर्मुक्षीय मा पतेरिति परि-
क्रम्य जपति[4] ॥ १९ ॥ पूर्वयोः परिक्रमण-
योर्यजमानाय समावपन्त्युत्तमे पतिकामायै ।

पूर्वो मन्त्रः परिक्रमणे । एवं परिक्रमणजपे यजमानाय समावपन्ति उत्तमे पति- कामायामावपन्ति । तृतीये पर्याये पतिकामायै पूर्वयोः पर्याययोर्यजमानाय न तृतीये ।

तस्यामविद्यमानायां[4] सर्वत्र यजमानाय ।

तस्यामकामाया सर्वत्र तृतीयेऽपि पर्याये ।

तान्मूत उपनह्य परोगव्यूतिं गत्वा वृक्ष आसजति ।

गव्यूतिः क्रोशद्वयं ततोऽपि परं गत्वा वृक्षे मूतेन सह पुरोडाशशेषान्बध्नन्ति । परोगोष्ठ आसि[6]जन्तीति भरद्वाजः ।

एष ते रुद्र भागस्तं जुषस्व तेनावसेन
परो मूजवतोऽती ह्यवततधन्वा पिनाक-
हस्तः कृत्तिवासोमिति त्रिरवताम्यन्ति ।

प्रणवान्त मन्त्रमुक्त्वाऽनुच्छ्वसन्तो यावन्निरोधं तिष्ठन्ति । त्रिवारमेवमेवाऽऽवृत्तिः ।

अपः परिषिच्याप्रतीक्षमायन्ति ।

मूतेऽपः परिषिञ्चन्ति । अप्रतीक्षमायन्ति । आसाञ्जितं मूतमनवलोकयन्त आवर्तन्ते ।

परोगोष्ठे मार्जयन्ते ।

गोष्ठो गवां विश्रामस्थानम् । तस्य परतो मार्जयन्ते । सुमित्रा न इत्येतेनेति भरद्वाजः ।

एधोऽस्येधिषीमहीत्याहवनीये समिधोऽभ्यादधाति ।

एकवचनादध्वर्युर्यजमानो वा ।

अपो अन्वचारिषमित्युपतिष्ठन्ते ।

सर्वेऽपि ।

एवं पत्नी गार्हपत्येऽभ्याधायोपतिष्ठते ।

गतम् ।

---

१ ख. °मन्त्रवि° । २ च. ट 'त्रेण वि' । ३ ख. ग. घ. ङ च. ट. ठ ण. °नादितो मुक्षी° । ४ घ. ज. झ. ञ. ढ. पतिकामा । ५ ख. ग. च. ट ठ. ड. ण. °ति । पूर्वो° । ६ च. ट. °सञ्जयन्तीति ।

प्रत्येत्याऽऽदित्यं घृते चरुं निर्वपति ।

तस्याग्न्याधेयिकवत्कल्प इति भरद्वाजः । तत्राऽऽदित्यमेव चरुमित्युक्तम् । अतोऽदितिर्देवता । तथा सप्तदश सामिधेन्यः । इडाभागः सर्वोऽपि ब्रह्मण एव । चतुर्धाकरणेऽप्विदं ब्रह्मण इत्येव । सर्वेऽपि भागा ब्रह्मण एवेति पूर्ववदित्यापस्तम्बः । प्रत्येत्येतिवचनात्त्र्यम्बकाङ्गमिष्टिरियम् । संतिष्ठन्ते त्र्यम्बकाः ।

श्वोभूते पौर्णमासेनेष्ट्वोदवसायानुदवसाय वा प्रसूता देवेन सवित्रेत्युन्दन्ति । यो अस्याः पृथिव्यास्त्वचि निवर्तयत्योषधीरग्निरीशान ओजसा वरुणो धीतिभिः सहेन्द्रो मरुद्भिः सखिभिः सहाग्निस्तिग्मेन शोचिषेति निवर्तनं वापनं यथा पुरस्तात् ॥ १६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे पञ्चमप्रश्ने पञ्चमः पटलः ॥ ५ ॥

गतार्थम् ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां पञ्चमप्रश्ने त्र्यम्बकः पञ्चमः पटलः ॥ ५ ॥

अथ पञ्चमप्रश्ने षष्ठ. पटल ।

ततो द्व्यहे त्र्यहे चतुरहेऽर्धमासे मास ऋतौ चतुर्षु वा मासेषु शुनासीरीयेण यजते तस्य वैश्वदेवेन कल्पो व्याख्यातः पञ्च संचराणि निरुप्यैन्द्राग्नं द्वादशकपालं निर्वपति वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमेककपालं वायव्या यवागूः प्रतिधुग्वेन्द्राय शुनासीराय पुरोडाशं द्वादशकपालमुत्तममेके समामनन्ति ।

द्व्यहाद्यतीते पर्वणि प्रयोगो वचनाच्छुनासीरोपलक्षितत्वाच्छुनासीरीयं कर्म, उत्तरवेदेरभावाद्वैश्वदेवेनेत्युक्तम् । गतार्थम् । वायव्यपयसः स्थाने वायव्या यवागूः प्रति-

---

१ ख. ग. घ. ङ. च. ज. ञ. ट. ठ. ड. ढ °मास्येष्ट्वो° ।

धुग्वा पयोर्थे पूर्वेद्युः शाखाहरणादि सायं वत्सानपाकरोति उपवेषं शाखापवित्रं च । प्रातर्दोहस्याऽऽवृता काले प्रातर्दोहं दोहयति । तथैवोक्तमापस्तम्बभरद्वाजाभ्याम् । सांनाय्यवदनुमन्त्रणमेककपालस्याऽऽग्नेयवत् । यवागूश्चरुकल्पेन । प्रतिधुग्धारोष्णं पयः। तत्रैव रूढिर्लिङ्गं च । गौर्वा प्रतिधुक्तस्यै शृतमिति प्रसिद्धिः । तस्यामेव शृतं पक्वमि॰ त्यर्थः श्रुतेः । प्रतिधुषा प्रातःसवने, एतदस्मै शृतं कुरुतेति लिङ्गम् । तथा भरद्वा॰ जोऽपि प्रतिधुगिति दुग्धमात्रमाह इति । यवागूर्वा प्रतिधुग्वा तदपि वायव्यमेव तस्यापि दोहधर्मेण दुग्ध्वा न संक्षालनम् । आसाद्यैवावदाय याग इति सर्वं कात्यायनेन पूर्वपक्षसिद्धान्ताभ्यां साधितं ज्ञेयम् । तथा सौर्यस्योत्तमस्थान इन्द्रायेत्याद्युक्तः पुरोडाशः शाखान्तरीयः । एवं च सर्वेष्वपि पक्षेषु दश हवींषि ।

सꣳसर्पोऽस्यꣳहस्पत्याय त्वेत्युत्तमेन मासनाम्नैककपालमभिजुहोति ।

एकमेव नामेष्टमापस्तम्बस्यापि तथैव ।

अनुवत्सरीणाꣳ स्वस्तिमाशास्ते दिव्यं धामाऽऽशास्त इति सूक्तवाकस्याऽऽशीष्षु होताऽनुवर्तयति वत्सरीणामिति वा ।

गतार्थम् ।

अपरपक्षे समस्यन्स्वकाले पौर्णमास्ये(सेने)ष्ट्वोदवसायानुद्वसाय वा प्रसूता देवेन सवित्रेत्युन्दन्त्येकं मासमुदसृजत्परमेष्ठी प्रजाभ्यस्तेनाऽऽभ्यो मह आवहदमृतं मर्त्याभ्यः प्रजामनु प्रजायसे तदु ते मर्त्यामृतं येन मासा अर्धमासा ऋतवः परिवत्सरा येन ते ते प्रजापत ईजानस्य न्यवर्तयन्तेनाहमस्य ब्रह्मणा निवर्तयामि जीवसेऽग्निस्तिग्मेन शोचिषेति निवर्तनं वापनं यथा पुरस्तात् ॥१७॥

अपरपक्षे कृष्णपक्षे शुनासीरीयहवींषि समस्यैतैर्यजेत्स्वकाल आमावास्येन हविषेष्ट्वा स्वकाले पौर्णमासेनेष्ट्वा तत उदवसायेत्यादिविधिः । कृतं व्याख्यानम् ।

संतिष्ठन्ते चातुर्मास्यानि ।

शुनासीरीयान्तैव संस्था चातुर्मास्यानां सोमादेरङ्गत्वात् ।

नैनमनीजानꣳ सोमेन फाल्गुनी प्राप्नुयात् ।

एनं यजमानं सोमेनानीजानं फाल्गुनी पौर्णमासी न प्राप्नुयात् । फाल्गुन्यां पौर्णमास्यां सोमेनावश्यमेष्टव्यमित्यर्थः । चतुर्षु वा मासेषु शुनासीरीयेण यजत इत्ययं पक्षो यदा पुनःप्रयोगं चिकीर्षति तदैव संभवति नान्यदा तत्रापि फाल्गुन्याः पूर्वेद्यु॰

---

१ ठ. ड. ण. °त्यर्थश्रु° । २ घ. ड. ज. म. °ति तंव° ।

श्चतुर्दश्यामेव शुनासीरीयेण यजेत ततः फाल्गुन्यां पुनःप्रयोगश्चातुर्मास्यानां चैत्र्यां प्रथमोपक्रमे तस्या अपि फाल्गुनीत्युपलक्षणं सर्वमेतत्कात्यायनेन स्पष्टीकृतम् । सोमोऽग्निष्टोमः ।

सोमाभावे पशुना ।

अशक्तौ पशुना निरूढकल्पेनानन्तरे पर्वणि ।

पश्वभावे पुनःप्रयोगश्चातुर्मास्यानाम् ।

इष्टिरप्युक्ता कात्यायनबौधायनाश्वलायनैः । तदकरणे पुनःप्रयोगः । तान्यकृत्वैव पुनःप्रयोगोऽभ्यास इत्यर्थः । ततोऽपि सोमेन पशुना वा समाप्तिः । इष्टिराग्नेयी कात्यायनीयानाम् । अन्यैः सवनेष्टिरित्युक्तम् । आग्नेयोऽष्टाकपाल ऐन्द्राग्न एकादशकपालो वैश्वदेवो द्वादशकपालो वैश्वदेवश्चरुर्वा समानतन्त्रा भिन्नतन्त्रा वैका ।

नित्यानि चातुर्मास्यानि उक्त्वाऽन्यान्याह—

वैश्वदेवेन पशुकामो यजेत यस्मिन्नस्य वसन्ते भूयिष्ठं पयः स्यात् ।

यस्मिन्वसन्ते यजमानस्य गोषु विपुलं दुग्धं भवति तत्रोपक्रमः ।

वैश्वदेवेन पशुकामो यजेत यावत्सहस्रं पशून्प्राप्नुयात् ।

सहस्रपशुप्राप्तिपर्यन्तं वैश्वदेवपर्वणि वैश्वदेवेनैव पर्वणाऽभ्यासः ।

प्राप्ते सहस्रे स्वस्थानैरितरैर्यजते ।

वरुणप्रघासकाल आगते वरुणप्रघासैरेवमितरैः सोमः पशुर्वाऽन्ते ।

शुनासीरीयेण यजेत ग्रामकामः प्रजाकामः पशुकामो वृष्टिकामोऽन्नाद्यकामो वा वर्ष्यमुदकमन्ववसाय तत उदकार्थान्कुर्वाणः ।

वर्षासु भवं वर्ष्यमुदकं यत्रास्ति तत्र गत्वा यजेत तस्मादेवोदकादुदकप्रयोजनम् ।

पञ्चसंवत्सराणि व्याख्यास्यामस्तन्त्रं पञ्चहोता वैश्वानरपार्जन्यौ च फाल्गुन्यां प्रयुज्य द्वावृतू संवत्सराविष्ट्वा तृतीयस्य मासं न यजेत चैत्र्यां तु प्रयुज्य त्रीनृतून्संवत्सरानिष्ट्वा चतुर्थस्य मासं न यजेतैवं विहितं द्व्यवराध्यं त्र्यवराध्यं वाऽभ्यस्येदभ्यस्येत् ॥ १८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे पञ्चमप्रश्ने षष्ठः पटलः ॥ ६ ॥

इति हिरण्यकेशिसूत्रे पञ्चमः प्रश्नः ॥ ५ ॥

पञ्चसंवत्सराणि पञ्च संवत्सराः कालो येषां चातुर्मास्यानाम् । अयं प्रयोगो नित्यानां काम्यानां च फलभूयस्त्वकामनया स्यात् । तन्त्रमेकारम्भत्वात् । प्रथम एव प्रयोगे पञ्चहोत्रादि । यदा फाल्गुन्यामुपक्रमस्तदा चाऽऽवृत्त्या द्वावृतू संवत्सराविष्ट्वा

चातुर्मास्यानां द्विरावृत्तिः सर्वेषां भवति संवत्सरद्वयेन पुनश्च वैश्वदेवपर्वमात्र चातुर्मास्यमध्ये भवति । तत ऊर्ध्वमाषाढमासो भवति तस्मिन्प्राप्ते वरुणप्रघासैर्न यष्टव्यं मासमतिक्रम्य श्रावण्यां वरुणप्रघासैर्यष्टव्यं चैत्र्यामुपक्रमे तु संवत्सरत्रयमभ्यस्य पुनश्चैत्र्यां वैश्वदेवेनेष्ट्वा श्रावण्यां वरुणप्रघासैरेवं चैत्रमारभ्यर्तुत्रय भाद्रपदे भवति ततो मासमतिक्रम्य कार्तिके साकमेधैर्यजेत् । अनेन प्रकारेण पञ्च संवत्सरान्यजति । ततोऽपि फलभूम्नो द्विस्त्रिर्वा पञ्चसंवत्सराणि चातुर्मास्यानि यजेत । तथा च पञ्च दश पञ्चदश वा त्रयः प्रयोगा विकल्पेन भवन्ति । अभ्यासः प्रश्नसमाप्त्यर्थः ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां पञ्चमप्रश्ने शुनासीरीयः षष्ठः पटलः ॥ ६ ॥

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवकृतयां प्रयोगवैजयन्त्यां पञ्चमश्चातुर्मास्यप्रश्नः ।

अथ षष्ठः प्रश्नः ।

(तत्र प्रथमः पटलः ।)

ऋग्वेदाद्युपदिष्टेषु साङ्गकर्मसु कर्तृता ।
होत्रादेः परिभाष्याथाध्वर्योर्याजुषकर्मसु ॥ १ ॥
निरूपिता ब्रह्मणोऽपि हविर्यज्ञेषु तेषु तु ।
प्रधानकर्तृदम्पत्योः फलप्राप्तिं निवारयन् ॥ २ ॥
संकल्पादेव कर्तृत्वमनयोर्मुख्यमादिशन् ।
फलं च सर्वकर्मस्वत्रैवान्यच्च प्रसङ्गतः ॥ ३ ॥
किंचिदुक्त्वा हविर्यज्ञयाजमानं सविस्तरम् ।
होत्रादिवेदसंज्ञाभिर्विहितेष्वपि कर्मसु ॥ ४ ॥
होत्रादिकर्तृनियमापवादेन निरूप्यते ।
लिङ्गाद्वाक्याद्विशेषाभिधानाच्छ्रुत्या च बाधने ॥ ५ ॥
सन्ति सामान्यसंज्ञायाः षष्ठे प्रश्ने प्रतिज्ञया ।
अवैतानिककर्माणि सब्रह्माण्यपि चर्त्विजाम् ॥ ६ ॥
साध्यानि तेषु चोत्सर्गात्कर्तृगामि फलं स्थितम् ।
न्यायवैदग्ध्यविज्ञेयं याजमानमितीरितुम् ॥ ७ ॥

प्रतिज्ञाकरणं तावदादौ सर्वस्य तन्यते ।
हविर्यज्ञे दर्शपूर्णमासादौ तन्निरूप्यते ॥ ८ ॥

याजमानं व्याख्यास्यामः ।

यद्यपि यज देवपूजासंगतिकरणदानेष्विति धात्वनुशासनसूत्रेण यजेर्धातोः पूजाद्यर्थस्य लटः शतृशानचाविति सूत्रेण लडादेशशानचप्रत्ययान्तस्य व्युत्पत्त्या यजमानशब्देन देवपूजादिकर्मणः कर्ताऽऽत्मनेपदार्थाच्च फलभोक्ता प्रतीयते तथाऽपि याग(यो)रूढ्या चार्त्विक्साध्ये कर्मणि फलभोक्ता यः स एव प्रतीयते । पूर्तेषु यजत्यर्थेष्वपि यजमानशब्दप्रयोगात् । देवपूजाकर्तर्यदर्शनाच्च । तस्माद्दक्षिणार्थे प्रवृत्तार्त्विक्कर्तृके कर्मणि यः फलभोक्ता स एव यजमानशब्दवाच्यः । नच कर्ममात्रफलभोक्तरि दृश्यते प्रयोग उपनयनादिषु सामयाचारिकेष्वपि च फलभोक्तरि प्रयोगाभावात् । तयोः फलभोक्त्रोः कर्म तद्याजमानम् । पत्न्या अपि फलं भोक्तृत्वस्याऽऽधानप्रश्ने निरूपितत्वात् । यद्यपि तत्तद्वेदविहितानि वैतानिकानि होतृवेदादिसंज्ञाभिर्होत्रादिनियतकर्तृकाण्येवेति स्थापितं तथाऽपि विशेषप्रमाणैस्तद्बाधेन दंपत्योरपि क्वचित्कर्तृत्वं प्राप्तं तन्निरूप्यत इत्यर्थः ।

तत्र फलप्रापकं यजमानमात्रानुष्ठेयं प्रमाणमाह—

समस्ते क्रतावर्थे श्रूयमाणं यजमानः कामयते ।

समस्ते नियतेऽनियते च साङ्गे क्रतौ क्रतुशब्दपुरस्कारेणार्त्विग्विधिभिर्विहितार्त्विक्कर्तृके कर्मणि । दर्शपूर्णमासयोश्चत्वार ऋत्विज इत्यादिनाऽग्निहोत्रस्य यज्ञक्रतोरेवमन्तेन दर्शपूर्णमासचातुर्मास्यपश्वग्निहोत्राणामक्रतुरूपाणामपि क्रतुशब्देन गौणेनाप्युपात्तानामिह ग्रहणं, ज्योतिष्टोमस्य तु मुख्यत्वेनोपात्तस्य यागविशेष एव सपशुके सोमाख्ये क्रतुशब्दो याज्ञिकप्रसिद्ध्या रूढो वेदे च वाजपेये सर्वे यज्ञक्रतवोऽवरुध्यन्त इत्यादौ ततोऽन्यत्र पञ्चमहायज्ञेषु यज्ञसत्रशब्दवद्गौणः । प्रकृते मुख्यमात्रग्रहणे हविर्यज्ञयाजमानकर्मविधानं विरुध्येत तस्माद्गौणमुख्यानां ग्रहणम् । यज्ञं व्याख्यास्याम इत्यत्र विधिलक्षणानि कर्माणि कर्मभिर्निःश्रेयसमित्यादौ च प्रयुक्तयज्ञशब्दकर्मशब्दावपहाय क्रतुशब्दं प्रयुञ्जानेनाऽऽचार्येणार्त्विक्साध्यान्येव कर्माणि क्रतुशब्देन गृहीतानीति गम्यते । अर्थ ममेदं भूयादित्यर्थ्यते तदर्थं फलमिति यावत् । क्रतौ प्रयोजनतया साध्यत्वेन प्रयोजकोऽर्थः । तं क्रतौ साध्यं विधिश्रुत्येष्टसाधनयोग्यपरया नियतेषु निःश्रेयसलिङ्गसहकृतया विश्वजिदादौ स्वर्गं रात्रिसत्रादौ प्रतिष्ठादिकं कामादिपदवद्वाक्यसहकृतया च वायव्यं श्वेतमालभेत भूतिकाम इत्यादौ भूत्यादिकमर्थत्वेनाऽऽवेदितं यजमानः कामयते । नच वर्तमानापदेशादनुवादः कामस्येति वाच्यम् । निष्प्रयोजनत्वादानर्थक्यमेव स्यात् । तस्मात्कामयेतेति विधौ प्रयोगोऽप्राप्तत्वात् । नच फलकामनायां विधिरस्ति । कामनेच्छा

सा वस्तुसौन्दर्यज्ञानादेव जायते नतु विधिना । विधिर्हि न फले प्रवर्तकः । अत एव फलांशे भावनायास्तु प्रत्ययो न विधायक इत्युक्तं तस्मात्फलसाधने विधिरिति वाच्यम् । तत्र वाचिको यः कामाभिनयोऽप्राप्तः स एव कामयतो विहितोऽतो यजमान एवेत्ययं नियमोऽपि युज्यते । नानावेदगतं फलं तथाऽपि नर्त्विग्भिः संकल्पनीयं समाख्याया बाधात् । अत एव यो यक्ष्य इत्युक्त्वेत्यत्राऽऽत्मनेपदं श्रूयते । उक्त्वेत्यनेन संकल्पस्य वाचिकत्वमुक्तं तदेव प्रथमं यजमानकर्म श्रुत्यैवोक्तं पुरुषरूपप्राप्तं तेन यज्ञे प्रवर्तमानत्वेन यजमानो नत्वनारब्धयज्ञो यजमानः स्यात्किंतु यक्ष्यमाणः । अतोऽनेन यज्ञेन यक्ष्य इति कृतवाचिकसंकल्पोऽङ्गप्राप्तमानो येन क्रतुना यक्ष्य इति कृतसंकल्पः । तत्र श्रूयमाणं फलमपि कामविषयत्वेनानुवदेदमुककाम इति तद्वाक्यशेषत्वेनान्यथा सिध्यतः फलस्यानन्वये संकल्पवाक्यमसमर्थं स्यात् । यागेन भावयिष्य इत्युक्ते किमित्याकाङ्क्षा जायते तत्पूरणायामुककाम इति वक्तव्यमित्यर्थः । अत एवान्यफलकर्मणि चर्त्विक्कर्तृत्वविधानार्थं यजतीति परस्मैपदनिर्देशो नहि प्रयत्नपरिस्पन्दाश्रयत्वमात्रेण मुख्यं कर्तृत्वं संभवति । स्वतन्त्रः कर्तेति पाणिनिस्मरणात्स्वातन्त्र्यं भोक्तुरेव मुख्यं तत्प्रेरितेषु तु स्वातन्त्र्यं गौणं विवक्षितं दर्शयितुं यजतीति परस्मैपदप्रयोगः । सूत्रकृताऽप्यृग्वेदेन होता करोतीत्यादौ परस्मैपदप्रयोगेणान्यप्रेरितत्वं दर्शितं, नहि परार्थफले कर्माणि परेणाप्रवर्तितः प्रवर्तते । ननु स कथं फलभोक्ता स्यात्प्रधानकर्मणोऽकर्ता यतो नच वैदिके कर्मणि स्वातन्त्र्यमात्रेण कर्तृता । तथा च जैमिनिः पूर्वपक्षसिद्धान्तावाह शास्त्रफलं प्रयोक्तरि तल्लक्षणात्वादिति सूत्रेण । सर्वं कर्म फलभोक्त्रैव कर्तव्यमिति प्रा(त्यभिधा)य राद्धान्तितम्—उत्सर्गे वा प्रधानं स्यादिति । सर्वस्य साङ्गस्य कर्मणो हि ऋत्विक्साध्यत्वेऽपि यागमात्रप्रधानं तत्पत्न्या कर्तव्यमेतावता तत्फलप्राप्तिः । अत एव कात्यायनः—प्रधानस्वामी फलभागादिति । तेनापि द्रव्यदेवतात्यागो याग इत्युक्तम् । तस्मात्प्रधानमात्रकर्तृत्वेन कर्मफलं तस्येति युक्तम् । भवत्पक्षे तु त्यागप्रधानता प्रथमपटले निराकृता । प्रधानं यागो होतृकर्तृको होमोऽध्वर्युकर्तृक इति होतृकर्तृक इति स्थितं स्वातन्त्र्यमात्रेण कर्तुः कर्मफलं स्यादिति चेत् । उच्यते—यः प्रधानस्य कर्ता सोऽङ्गानामिति परिभाषितत्वाद्यागस्य प्रधानस्य यजमानकर्तृकत्वे तु यजमानकर्तृकत्वमङ्गानामपि स्यादिति समाख्याभिर्नर्त्विक्कर्तृताऽपि स्यात् । अतो न प्रधानकर्ता यजमान इष्टः सूत्रकृता । तस्मादन्यतोऽप्रवृत्तः फलार्थं सङ्कल्पेन प्रवृत्त एव स्वतन्त्रः कर्ताऽन्यो नेति सूत्रतात्पर्यम् । नचान्येन कृतस्यान्यः फलभोक्ताऽतिप्रसङ्गापत्तेरिति वाच्यम् । यथा यजमानेन त्यागे कृते प्रधाने यजमानपत्न्या अपि फलम् । तत्केन हेतुना संकल्पेनेति वाच्यम् । तत्राऽऽपस्तम्बसमाधिरिति समः समाधिविधिः । यथाऽङ्गेषु कर्तुरन्यस्मिन्नपि यजमानेऽपूर्वमुत्पद्यते तद्वत्प्रधानं पूर्वमपि संकल्पकर्तर्येव स्यात्तत्फलं चेति नातिप्रसङ्गः ।

यथा लोके राजादिः संकल्पमात्रेण राज्यं भुङ्क्ते प्रेरितै राज्यग्रहणाय प्रधानादिभिः कृत-ग्रहणमपि विहितेष्वपि देवताप्रतिष्ठादिपूर्तेषु प्रतिष्ठाप्रधानेषु त्यागासंभवाद्द्रव्यदानादावपि तथात्वात्संकल्पमात्रेणर्त्विक्कृतस्य प्रधानकर्मणो यजमान एवापूर्वमेव तस्य फलं च भव-तीति न किंचिदनुपपन्नम् । एवं वा सूत्रयोजना—समस्ते साङ्गे कर्मक्रतौ यो यक्ष्य इत्यनुवादेन वचनाभिनयेन चोन्नीतेन यक्ष्य इति संकल्पे यद्यपि फलं तथाऽपि विधि-वाक्ये क्रतौ श्रूयमाणं यजमान एव कामयतेऽनेन यक्ष्य इति वाक्य इदमनेन फलं कामय इति वाक्यशेषेण कामयते । तस्माद्यज्ञारम्भ एवानेन कर्मणा यक्ष्ये यावज्जीवमित्यादि यथासंभवमुक्त्वाऽनेन निःश्रेयसं कामय इत्यादि तत्तत्कामनानुसारेण वदेत् । यथोक्त-मापस्तम्बेनापि क्रत्वादौ क्रतुकामं कामयेत यज्ञाङ्गादौ यज्ञाङ्गकाममिति । समस्ते साङ्गेऽपि क्रतौ साध्यत्वेनेष्टं श्रावयेदित्युक्तं तच्च यज्ञारम्भे प्रधानफलमङ्गारम्भे चाङ्गफल-मित्युक्तं भवति ।

ननु नियतेष्वङ्गेषु विधिश्रुतिमात्रेण न फलं निःश्रेयसं कल्प्यं नापि रात्रिसत्रन्याये-नाऽऽर्थवादिकम् । नापि विश्वजिन्न्यायेन स्वर्गफलम् । किंतु नियताङ्गानि प्रधानेन स्वफलसिद्ध्यर्थं कथंभावाकाङ्क्षिगृहीतानि न पृथक्फलाकाङ्क्षाणि तथाऽपि श्रुत्या कामपदवत्याऽनन्यार्थया च यत्रापि फलमङ्गेष्वनङ्गेषु चास्ति तत्रापि कामना क्वचिदात्विङ्निष्ठाऽपि श्रूयते तत्र किमृत्विजा फलमथवा यजमानस्यैव । यजमानफलेऽपि संकल्पोऽत्रर्त्विजा यजमानस्येति निर्णयार्थमाह—

तथा नित्येषु यज्ञाङ्गेषु यानि तु कामयतिः श्रावयति ।

तुशब्देनोत्सर्गबाधो न सर्वत्राङ्गेष्वर्थवादैः फलकल्पना । नाप्यङ्गेषु फलश्रुतिरर्थवाद एवेति । किंतु नित्येषु फलनिरपेक्षया विधिश्रुत्या फलवत्प्रधानाङ्गेषु तथा निय-तेषु फलाभावेऽपि नियमेनानुष्ठेयेषु यज्ञाङ्गेषु यज्ञफलवत्तया फलवत्सु । ननु किमर्थं नित्येष्विति यज्ञाङ्गेषु हि नियमेनानुष्ठानं तद्यज्ञाङ्गग्रहणेनैव सिद्ध-मिति चेत् । न । वैकल्पिकं यत्राङ्गमस्ति[1] तथाऽतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति पाक्षिके षोडशियागे फलार्थतयैव प्रवृत्तिर्नान्यथा यज्ञस्य तेन विना ह्यवैगुण्यात् । तस्माद्वैगुण्यपरिहारार्थमनुष्ठीयमानं नित्यमित्यर्थः । तेष्वप्यन्य-तःसिद्धस्य स्थानेष्वपि यानि चार्थरूपाणि स(पू)र्वसूत्रेऽर्थमिति पदं व्युत्पन्नमर्थ्यत इति फलमुक्तं तत्र नपुंसकनिर्देशेन जातिवाचिनोपदिष्टस्यात्र(त्र) व्यक्तिवाचकेन बहुवच-नान्तेन नपुंसकलिङ्गेन परामर्शो यानीति । यान्यर्थ्यमानानि पुरुषेण नित्याङ्गसाध्यानि कामयतिर्धातुः श्रावयति अभिधयैव बोधयति तान्येवाङ्गफलानि नान्यानि तान्येव यजमान एव कामयते सर्वानुषङ्गः । अयमभिप्रायः—यज्ञाङ्गेष्वपि श्रुत्याऽनन्यपरया

१ ख. च. ट. ठ. 'स्ति यथा' ।

बोधितानि फलान्येव न सा श्रुतिरर्थवाद एवानङ्गेष्वपि च । किं वक्तव्यं यानि फलं विना नानुष्ठेयानि तत्रार्थवाद एवाननुष्ठानलक्षणमप्रामाण्यं स्याद्विधेः । तस्मादुभयत्रापि नार्थवादता किंतु फलार्थतैव । अत्र कामयतिरू(रु)पलक्षणमिच्छाविषयत्वं(त्वे)नार्थप्रतिपादकानां शब्दानाम् । बुभूष[ति] तितीर्षत्यनयोः साक्षादेकार्थकत्वात् । इतरार्थप्रत्ययस्यापि समानार्थत्वात् । अभिचरन्नामयाव्यादिशब्दानामनिष्टार्थानामपि विधिषु न श्रुत्यावेदितार्थस्यापूर्वस्येष्टस्य साध्यस्याऽऽवेदकानामिच्छाविषयत्वं विना साध्यत्वासंभवादवश्यमर्थाक्षिप्तेच्छाविषयत्वमपि बोधयतामुपलक्षणम् । तान्यङ्गानङ्गफलानि यजनस्य कर्मणां स्वतन्त्रकर्तुरेव । तथाऽप्यध्वर्य्वादिकामना श्रूयते तथाऽपि नाध्वर्य्वादयः स्वार्थतया साधयितुमीशते शास्त्रफलं च कर्मणां स्वतन्त्रकर्तुरेवेति न्यायात् । नह्यनेन प्रवर्तितस्य कर्मणः फलमन्यस्य स्यात् । यद्प्यन्यस्य प्रपाप्रवर्तनादिषु कर्मसु तृप्तिः फलमन्येष्वप्यस्ति तथाऽपि न तद्विधिफलम् । किंतु तदानुषङ्गिकं विधिफलं कर्तुरेवेति न व्यभिचारः । तथा च यान्कामयेत यजमानानिति तथा यं कामयेत सर्वमायुरियादिति यजमानकाम्यमेव फलं नाध्वर्युकाममनिच्छतो यजमानस्य फलं स्यात् । एवमृत्विजामपि क्वचित्स्वकामनाविषयत्वेन स्वफलता दृश्यते । तत्रापि यदि यजमान एवानेन कर्मणा म ऋत्विजां फलं भूयादिति कामयते तदैव नान्यदा । तदेतत्सर्वं यानीत्यनेन दर्शितम् । तथा यं कामयेत प्रमायुकः स्यादित्यादेरपि न फलपरता मानत्वाभावात् । अध्वर्युणाऽनिष्टं काम्यमानमपि न यजमानप्रयुक्तेन कर्मणा भवतीत्युक्तम् । यथा यजमानायानिष्टं कामयते तादृगेवेति । तथा न कार्यमित्यर्थवादः । यत्र तु कामनासमानार्थपदैरबोधितं तत्काम्यमानमपि नाङ्गफलमित्यपि कामयतिरित्यनेनोक्तम् । श्रावयतीत्यनेन कामादिपदबोधितमपि यद्यभिधया न प्रतिपाद्यते किंत्वनूद्यतेऽभिधायाः पदान्तरेण प्रतिबन्धात् । तत्रापि न फलताऽपि त्वर्थवाद एव । यथा त्रिष्टुभा परिदध्यादिन्द्रियं वै त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजत इति तथा जगत्येत्यपि । अत्र खलुवैपदानां हेतुत्वेनाभिधाप्रतिबन्धादनुवादेनार्थवादतैव । यदि कामयेत ब्रह्मवर्चसमस्त्विति गायत्रिया परिदध्यादिति फलपरतैवात्र नार्थवादता । अत्र फलवन्त्यङ्गानि क्रियाजातिद्रव्यगुणाः । क्रिया तावत्—आधानेऽग्नये भगिनेऽष्टाकपालेष्टिः । सा नित्या च काम्या च । तथा राका सिनीवाली पत्नीसंयाजभागौ । जातिर्यावत्पालाशं ब्रह्मवर्चसकामस्य यूपं कुर्यात् । द्रव्यमपि—द्रव्यमग्निहोत्रहोमे पयः । गुणः—यूपे त्रिरत्निपञ्चारत्नित्वं च । एषां संयोगपृथक्त्वन्यायेन यागाङ्गता । तथाऽनङ्गान्यपि क्रत्वाश्रितानि चतुर्था कुहूयागः पत्नीसंयाजेषु । जातिः—यदि कामयेत ब्रह्मवर्चसमस्त्विति गायत्रिया परिदध्यादिति परिधानी[या]यां गायत्रीत्वम् । द्रव्यम्—कांस्यमृन्मये प्रणयनाश्रिते । गुणः—

---

१ च. ट तयाऽपि ।

आघार उपनीयते । एतेषां क्रत्वङ्गत्वावेदकं प्रमाणं नास्ति । यदि प्रकरणेनाङ्गत्वं तदा वाक्यभेदः स्यात्सकृच्छ्रुतस्य वाक्यस्य ।

उदाहरति—

यथाऽऽघारस्योर्ध्वतायां नीचैस्तायां च ।

ऊर्ध्वमाघारयेत्स्वर्गकामस्य न्यञ्चं वृष्टिकामस्येति यथा यजमान एव कामयते तथा यान्कामयेत यजमानान्समावर्त्येनानिति व्याहृतिविधाने स्थानविशेषलक्षणो गुणो यजमानफलार्थं विधीयमानो यजमानेनैव कामयितव्यः संकल्पेनेत्यर्थः ।

एतत्सूत्रे नियमविधानेन फलितां परिसंख्यां दर्शयति—

अर्थवादा इतरे ।

आघारस्येत्यनुकर्षः । आघारगतगुणविध्यर्थवादा इतरेऽनन्यथासिद्धया श्रुत्यैवाऽऽवेदितार्थप्रापका विध्युद्देशान्तर्गतास्तेऽतोऽन्ये वाक्यशेषा विध्युद्देशानन्तर्गताः सन्तः पृथगपि वाक्यार्थं प्रतिपादयन्तो वाक्यैकवाक्यतां गच्छन्तोऽर्थवादाः स्तावका न फलप्रापका इत्यर्थः । ब्रह्ममीमांसकानामिव वाक्यैकवाक्यताऽर्थवादानामिष्टा सूत्रकृतामवान्तरवाक्यार्थेऽपि प्रामाण्यस्वीकारात्तत्तु(न्नतु)जैमिनीयानामिव पदैकवाक्यता ।

यथा संततमाघारयतीत्यत्र प्राणानामन्नाद्यस्य संतत्या इत्येवमादयोऽर्थवादा आघारयोस्तथाऽन्येष्वपि नियतेषु यज्ञाङ्गेषु प्रकारान्तरसिद्धा अर्थवादा एवेत्याह—

तथा[1]ऽन्येषु यज्ञाङ्गेषु पुरीषवतीं करोति प्रजयैवेनं पशुभिः पुरीषवन्तं करोति यद्रूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्या इषे त्वोर्जे त्वेति शाखामाच्छिनत्तीषमेवोर्जं यजमाने दधातीति ।

शाखान्तरीयं वाक्यम् । इतीति नानाप्रकाराणामर्थवादाना पूर्वदर्शितानां ग्रहणार्थम् ।

द्रव्यप्रकल्पनं यजमानस्य दक्षिणादानं ब्रह्मचर्यं जपाश्च ।

यद्यागाङ्गभूतं द्रव्यं सिद्धं जात्यादिना पश्चादङ्गत्वेन तत्तद्वेदविहितमपि नर्त्विग्भिः संकल्प्यं तत् । नहि तत्र तत्र वेदे संपादनं विधीयतेऽपि तु सिद्धस्याङ्गताऽतो द्रव्यप्रकल्पनं पूर्वमर्थसिद्धं तत्तु स्वार्थसिद्ध्यर्थं यजमान एव कुर्यात् । नहि त ऋत्विजो दक्षिणालोभेन प्रवृत्ताः स्वयं व्ययं कर्तुं प्रभवन्ति । अत आज्यव्रीहिपशुतण्डुलगोजाश्वादीनां संपादनं याजमानं यजमानः स्वद्रव्यव्ययेन साक्षाद्वाऽन्येन वा संपादयेत् । अत्र यजमानग्रहणं पुनः संकल्पे प्रवर्तमानस्य द्रव्यप्रकल्पकत्वं मा भूत्किंतु संकल्पात्पूर्वमेव वक्ष्यमाणस्येति । यजमानपदं द्रव्यप्रकल्पनपदेन न संबद्धमिति पुनराग्रिमैरेव संबन्धो

---

१ घ. ङ. ञ. °था निल्येषु ।

यथा स्यादिति सप्रयोजनं दक्षिणादिग्रयेण संबध्यत उत्तरत्रानुवर्तते च । दक्षिणादानं स्वत्वत्यागरूपं नास्वामिनः संभवति । सामर्थ्यमपि श्रुत्या बाध्यतेऽनड्वान्होत्रा देय इत्यादिना । अष्टाङ्गमैथुनत्यागो ब्रह्मचर्यं तद्यजमानसंस्कार एव समाख्यायाः सामर्थ्येन बाधात् । ऋत्विजां हि ब्रह्मचर्याभावेऽपि कर्तृत्वसंभवात् । तस्माद्दीक्षासंस्कारवत्स्वामिनः संस्कार इति भवत्यदृष्टार्थः संस्कारो यजमानस्यैव । अत एव लिङ्गेन समाख्याबाधे सति योऽस्याग्नीनाधास्यमानो भवति स एतां रात्रिं ब्रह्मचर्यं चरतीत्यध्वर्योर्ब्रह्मचर्यविधानम् । यत्र कुत्रापि वेदे पठितानां मन्त्राणां जपं पत्न्या अपि । वक्ष्यति च धर्मेषु नहि प्रवसति यजमाने पत्न्या नैमित्तिकेषु दानेषु स्तेयमुपदिशन्तीति तस्या अपि स्वाम्यमस्त्येवेति प्रवसति यजमाने दक्षिणादानं पत्न्याऽपि कार्यं वरो देयः । छिन्द्रप्राणि दद्यादित्यादिना विहितं स्कन्नादिनिमित्तं दानमपि दक्षिणाशब्देन प्रदेयमात्रग्रहणात् ।

जपानां विधिमर्थसिद्धं दर्शयति—

प्रत्यगाशिषो मन्त्रानकर्मकरणाञ्जपति ।

यजमान इत्यनुवर्तते । मन्त्रप्रयोक्तुरात्मानं प्रतिपाद्यत्वमागच्छन्तीति प्रतीच इष्टप्रार्थनास्ताः प्रतिपाद्यत्वेन येषां मन्त्राणा ते तथा प्रत्यक्षं मह्यं स्यादित्यात्मगामित्वम् । आशिष इष्टप्राप्तिप्रार्थनारूपार्थवादा उपलक्षणम् । तान्मन्त्रान्यजमानो जपति । यजमान एव जपत्येवेति चोभयं नियम्यते । तेन जपस्तथाचादृष्टार्थं चातुस्वर्यं पाणिनिस्मृतिन्यायेन सिद्धमसिद्धमितीत्यविहितानां जपार्थतया विधिर्जपतीत्येव कल्प्यो यजमानकर्तृकः साक्षादित्यर्थः फलति । प्रत्यक्षजपविधिविहितानां विनियोगं जपतीति चेत्यनेन वक्ष्यत्यतो ज्ञायतेऽत्र विधिः कल्प्य इति । अयमाशयः—अध्ययनविधिनोत्पादितानां मन्त्राणां स्वार्थावबोधद्वारा फलवत्कर्मसाधनाना यज्ञकर्मार्था मन्त्रा इति परिभाषासूत्रेण सर्वमन्त्राणां यज्ञानुष्ठानार्थत्वमुक्तम् । तत्र येषां विनियोजको विधिर्नास्ति ते केन प्रमाणेन यज्ञकर्मार्थाः स्युः । अतस्त्वध्ययनविधिनैव ते सामान्येन विनियुक्ता एव । तेषां विशेषविद्याकाङ्क्षिणां प्रत्यगाशीस्त्वलक्षणलिङ्गेन स्वस्यानुपमर्दको जप एव विधेयत्वेन साध्यो धात्वर्थो नान्यो योग्यः स्यात् । ननु शेषस्य विनिधानमित्यादिसूत्रैरविनियुक्ता सा विनियोगलिङ्गेन वदता दशतयी सामर्थ्यातिरिक्तानामपि मन्त्राणां तूष्णीकेषु प्राकृतेषु यजुरिति सूत्रेण विनियुक्तत्वान्नैतेभ्योऽन्ये मन्त्राः सन्ति । येषां जपे विनियोगः कल्प्य इत्युच्यते । अत्राऽऽहाकर्मकरणानिति । कर्मबाह्या चेष्टा तस्यां करणत्वेन प्रतीतास्ते कर्मकरणास्ते हि तूष्णीकाक्रियासु प्राकृतासु

१ क. ग. ण. °स्या न वा° ।

विहितास्त्वेव प्रत्यगाशिषोऽपि मन्त्रसाकाङ्क्षासु लिङ्गेन तत्र क्रियाप्रतिपादनत्वलक्षणेन गच्छन्त्येव । प्रत्यगाशीर्लिङ्गं च विधिकल्पकमभिभूय श्रुतिविधेयक्रियामेव क्रियाप्रतिपादनलिङ्गेनाप्यकल्पनालाभाच्च न संनाथेन गच्छन्ति । ये स्वकर्मकरणास्तेषां तूष्णीकाः क्रियाः प्रति गमने सामर्थ्यं नास्ति । यद्यपि तद्भाषाकाङ्क्षास्वथाऽपि ते न केवलप्रत्यगाशीःपराः क्रियाया अप्रतिपादकाः कथं क्रियामभिधया प्राप्नुवन्ति । नचात्र ब्राह्मणविहितत्त्वमस्ति येन यथोपदिष्टं ब्राह्मणवन्त इति सूत्रेण लक्षणयाऽपि क्रियाप्रतिपादकाः स्युः । तस्मात्तेषामध्ययनविधिबलेन स्वसाध्यजपविधिकल्पकत्वमेव युक्तम् । नह्यनुच्चारितस्य कर्माङ्गत्वमध्ययनविधिनाऽऽवेदितुं किंतूच्चारणेनोत्पन्नस्याभिव्यक्तस्यैव वा, इदानीं दृष्टे चासंभवति तदुच्चारणेन विधेयेन साक्षादपूर्वमेव वाच्यं संस्कार्यार्थस्याप्रतीतेः । नच मन्त्रं जपतीत्यस्ति द्वितीयानिर्दिष्टं संस्कार्यमिति वाच्यम् । मन्त्रस्यान्यत्र विनियुक्तविनियोक्ष्यमाणत्वाभावाद्द्वितीयया नेप्सिततमत्वं किंतु कारकत्वमात्रमवगम्यते ह्यकर्तरि चेति पाणिनिस्मृतेः । तस्मान्न द्रव्यमात्रे चादृष्टमाधेयशब्दापरपर्यायं जनयत्तद्द्वाराऽपूर्वोत्पादकं किंतु साक्षात्फलभोक्तरि स्वामिन्येवौत्सर्गिकं मन्त्रोच्चारणक्रिययाऽपूर्वं जन्यते । वैधकर्मणा फलाशासनं मुख्यं फलं स्वामिन्येव स एव मह्यमिष्टमिदं भूयादिति कामयितुं योग्यो नर्त्विक् । तस्यान्यफलशासने यद्यपि या काचनाऽऽशिषमृत्विगाशास्ते तां यजमानस्येति तथाऽपि यजमानफलशासने मन्त्रवाच्ये मह्यमिदं भूयादिति गौणमेव । नचाभिधाबाधेऽन्यद्विनियोजकं प्रमाणमस्ति । समाख्यायास्तु लिङ्गेन बाधान्मुख्यवृत्त्या भोक्तैवोच्चारणे कर्ता यजमानो यागेन फलं साधयितुं प्रवृत्तः फलापूर्वाश्रयत्वयोग्यमात्मानं दीक्षयेव करोत्यपूर्वेण संस्कृतम् । एवं च दीक्षणीयेष्टिवदेव जपस्याऽऽरादुपकारकत्वेऽपि यजमानसंस्कारकत्वमुपपद्यते । स्वसंस्कारव्यतिरिक्ते कर्मणि प्रतिनिधिः प्रवसतो यजमानस्यर्त्विग्वक्ष्यते । जपस्य संस्कारकत्वान्न तत्र प्रतिनिधिरिति स्वस्यैव प्रवसतो जपो वक्ष्यते । तदेवं जपस्याऽऽरादुपकारकत्वे संपादित एवोपपद्यत इति युक्तमुत्पश्यामः । तस्मादृग्वेदादिसमाख्याप्राप्तार्त्विज्यबाधेन यत्र यत्र मन्त्रपाठस्तत्र तत्र कर्मसमीपे जपः कार्यः । द्रव्यप्रकाशनेन प्रत्यगाशीःप्रार्थनं यत्र मन्त्रेषु स्यात्तत्र तत्र तत्तद्द्रव्यजन्यं क्रिययोपलक्षिते काले कर्तव्यस्तत्तत्कर्माङ्गतया । तत्र पाठादुत्कर्षोऽपि मन्त्रेऽवान्तरलिङ्गेनानुज्ञातः पाठात्तस्य प्रबलत्वात् । ये च क्रियाकरणद्वारा प्रत्यगाशीःपरास्तत्र क्रियां विनाऽऽशीःप्राप्त्याभावात्क्रियालिङ्गमेव प्रबलं तेन तूष्णीकेषु प्राकृतेषु तत्तदार्त्विक्कर्मसु प्रत्यक्त्वमारोप्य गौण्याऽपि वृत्त्या प्रवर्तन्ते । ये प्रत्यगाशिषः श्रुत्या क्रियायां विनियुक्तास्तेषां लिङ्गं श्रुत्या सुतरां बाधितमिति गौण्या वृत्त्या क्रियापरत्वम् । तथाचाजपन्यूङ्खसामस्विति

पाणिनिना वक्ष्यमाणन्यायमूलमाश्रित्योक्तमैकश्रुत्यमपि बाधितमिति जपे चातुः स्वर्यमपि सिद्धमस्याध्वर्युपाठेन ।

एवं च परिभाषिते यजमानकर्तृके जपे सति परिभाषितन्यायेन शब्दान्तरैर्बोधितकर्मभेदेष्वपि तत्तद्विधिविहितेष्वपि केषुचिज्जपधर्मं यजमानकर्तृकत्वं चातिदिशति—

तथोपदिश्यमानानुपतिष्ठतेऽनुमन्त्रयतेऽभिमन्त्रयतेऽभिमृशति जपतीति च ।

जपतीति चेत्यन्तेन विधिजातेनोपदिश्यमानानपि प्रत्यगाशिषो मन्त्रांस्तत्तदुपदिष्टविशेषेण विशिष्टकर्मान्तरविनियुक्तानपि तथा जपति यजमान एव । न तु तां क्रियां साधनतया तत्तद्वेदविहितया तृतीयया श्रुत्या भासमानानाप्यृत्विग्जपं प्रयुञ्जते(?) । अत्र चातुःस्वर्यमाशीःपरत्वेन यजमानकर्तृकत्वं चातिदिश्यते जपे विहिते यजमानकर्तृत्वमित्यर्थः । अयं भावः—यद्यपि चोपतिष्ठत इत्यादिना कर्मभेदोऽस्ति जपे तु प्रयोगभेदस्तथाऽपि न तेन तत्कर्मसाधनतया प्रतीयमाना मन्त्राः प्रत्यगाशीःपरत्वं जहति । क्रियामंशभूतां प्रति तृतीयया न साधनत्वमुच्यते किंतु प्रत्यगाशीःशासनं प्रत्येव प्राधान्यादंशात्तद्द्वारा तेषामङ्गत्वात् । उपतिष्ठत इत्यादिना विशिष्टाभिधानेऽपि विशेषणांशाना क्रियारूपाणामपि मन्त्रोच्चारणेन सहभाविनामयोग्यत्वान्न मन्त्रसाध्यत्वम् । नहि हस्ताञ्जलिकरणमुपस्थानेऽनुसंधानमनुमन्त्रणेऽभिमुखीयाचनमभिमन्त्रणे हस्तेन स्पर्शनमभिमर्शने मन्त्रान्ते च क्रियते किंतु पूर्वमारब्धं सहमन्त्रोच्चारणेऽनुवर्तते तत्कथं मन्त्रसाध्यं स्यात् । मन्त्रैरप्रतिपाद्यत्वाच्च । नहि ताः क्रिया मन्त्रवर्णेषु दृश्यन्ते । तस्मान्मन्त्रप्रतिपाद्याशीःप्रतिपादनसाधनत्वेनैव तृतीयोपपद्यते । अर्थस्तुतिरवान्तरवाक्यार्थोऽर्थं स्तुत्वाऽऽशिषामाशासनं महावाक्यार्थः । तदेव विधेयं मन्त्रप्रतिपाद्यत्वेन । स्तुतिस्तदङ्गमिति न तेन विरुध्यते तेन चात्र तेषां संस्कार्यत्वेन द्वितीयेति वाच्यम् । उपस्थाने तावद्वाय्वाद्यर्थानां द्वितीयानिर्दिष्टानामपि कर्मासमवेतत्वात् । अग्न्यादीनां कर्मसमवेतानामपि न संस्कार्यत्वं वैरूप्यापत्तेः । किंच तेभ्यः फलाशासनप्राप्तये तेषामर्थानामुपस्थानं स्तुतिरेव स्तुतिविषयत्वेन द्वितीया निर्दिष्टा । अपि च स्तुतिर्हि गुणकीर्तनं गुणिकीर्तनस्तोत्रशस्त्रवत् । उपस्थाने स्तुतित्वं स्पष्टमेव दृश्यते तेऽग्निमस्तुवन्त एभ्यः स्तुतो रात्रियाः साऽग्निमस्तौत्स एनꣳ स्तुत इत्यादौ चाप्युपस्थानस्य स्तुतिरूपत्वेन स्तुतत्वात् । एतेष्वेवार्थवादेषु स्तुत्या फलप्राप्तिमपि दर्शयति पशूनिराजते देवाः पशून्निरत्रा कामाꣳ अकुर्वतेति । स एनꣳ स्तुतः सुवर्गं लोकमगमयदिति । किंचाऽऽहिताग्नेराशीर्यदग्निमुपतिष्ठत इत्यत्रापि चाऽऽशीःपरमेवोपस्थानम् । तत्रार्थस्तुतिरङ्गं नतु द्वितीयया गुणी प्रतिपाद्यभूतेन संस्कार्यं तत्प्रतिपाद्यं च गुणाश्रयत्वेन नतु प्राधान्येन । एवमनुमन्त्रणादिष्वपि स्तुत्यत्वेन द्वितीया नतु संस्कार्यत्वेनेप्सिततमत्वात् । किंत्वकथितं चेति विषयत्वेन

साधनत्वमात्रमाह । किंचानुमन्त्रणे हुतं द्रव्यं द्वितीयानिर्दिष्टं स्तुतिस्तु तद्देवतानामा-शीरर्था दृश्यते तेभ्य एव फलशासनात्—अग्नेरहं देवयज्ययाऽन्नादो भूयास-मित्याहाग्निर्वै देवानामन्नादस्तेनैवान्नाद्यमात्मन्धत्त इति ब्राह्मणे च । यद्यप्यन्नादो द्रव्यस्य संस्कार्य[त्व]मपि संभाव्यते तथाऽपि न तन्मन्त्रप्रकाश्यत्वेनापि अपूर्वक्रिया-मंशभूतां प्रत्येव स्यान्नतु मन्त्रप्रतिपादनं प्रत्यपि । आशीःपरत्वमङ्गात् । तदभङ्गेनैवा-र्थस्य संस्कार्यत्वोपपत्तेः । नतु प्राधान्येन । अत एव प्रवसतो यजमाने जपवदेवोप-स्थानादीनामपि स्वसंस्कारकर्मत्वेन तन्मन्त्राः स्वयमेव जपतीति वक्ष्यति । संस्कार्य यदि द्रव्यं स्यात्तदा परार्थानामध्वर्युकर्तृ[क]त्वेन प्रतिनिधिः स्यात् । नह्येतान्यारा-दुपकारकाण्येवोपस्थानादीनि सन्ति न क्रियापराणि स्तुतिवज्जपरूपाण्येव । ननु कथमत्र विशिष्टो जपो विधेय उपतिष्ठत इत्यादिषु जपत्वाप्रतीतेः । प्रतीतौ च न तृतीयानिर्दिष्टमन्त्रसंबन्धः स्यात् । उच्यते—उपान्मन्त्रकरण इति पाणिनिसूत्रेणोपति-ष्ठत इत्यात्मनेपदं विहितं मन्त्रसाध्यं करणं यस्य तत्कर्म मन्त्रकरणम् । उपपूर्वकस्ति-ष्ठतिः परिधानवाची मन्त्रोच्चारणं विधेयम् । अर्थप्रतिपादनं तु सामर्थ्यात् । अथवाऽर्थ-प्रतिपादनं विधेयमुच्चारणं तु सामर्थ्यादिति न्यायादन्यतरस्यैकस्य विधायकत्वे प्राप्ते जप एव सूत्रकारेण विधीयते । प्राथम्यात्पुरुषयत्नसाक्षात्साध्यत्वाच्च । प्रति-पादनं न साक्षात्पुरुषव्यापारेण शब्दव्यापारत्वात्तस्येवोच्चारणे साक्षात्पुरुषप्रयत्नसाध्ये विधिगोचरे सति पश्चात्प्रतिपादनपरम्परया पुरुषजन्यमर्थात् । अत एव सूत्रकृता संब-न्धार्थमेव मन्त्राणामुपदिश्यमानानां द्वितीयया निर्देशः कृतः । तत्र मन्त्रेणोपतिष्ठत इत्यत्र तृतीयाऽर्थप्राप्तप्रतिपादनसाधनतानुवादिकेति मत्वा मन्त्रामन्त्रस्य विषयत्वेन साध-नत्वं विना याऽऽक्षिप्ता द्वितीयोपदेशे दर्शितोपरि(?) निति । अकथितं चेति सूत्रेणैव विहिताऽपि । तथा चाप(?)उत्थायाञ्जलिपुटं कृत्वा मन्त्रं जपन्मन्त्रोऽङ्गवाचका(?) स्तुवन्नात्र प्रतिपादयेदिति । मन्त्रेणानुमन्त्रयत इत्यत्रापि द्रव्यमनुसंधाय मन्त्रं जपन्म-न्त्रेण द्रव्यदेवताः स्तुवन्नित्यादि समानम् । मन्त्रयतिधातुः स्वाभिप्रायाविष्करणप्रति-पादकवचने प्रसिद्ध उपसर्गभेदाद्विशिष्ट वर्तते । अभिमन्त्रयतेऽत्रापि अभिमुखो भूत्वा द्रव्यं पश्यन्मन्त्रं जपन्मन्त्रेण द्रव्यमेव स्तुवन्नित्यादि समानम् । अभिमृशतीत्यत्रापि द्रव्यं स्पृशन्मन्त्रमुच्चारयन्मन्त्रार्थं मन्त्रेण स्तुवन्नित्यादि समानम् । सर्वत्र प्रत्यगाशिरर्थो मुख्ययैव वृत्त्या यजमानस्य जपतेरुपतिष्ठत इत्यादीनां च जपवाचकत्वेऽपि शब्दान्तरै-रर्थभेदात्कर्मभेदो ज्ञेयः । यथा धात्वनुशासनसूत्रेषु यज दाने हु दाने ह्वदाल्दान इत्यादिना समानार्थत्वविधानेऽपि रूढ्याऽर्थभेदादपर्यायत्वेन शब्दान्तरैः कर्मभेद एव-मत्रापि । तत्र यजत्यादिषु कृतमेव व्याख्यानं प्रथमे परिभाषापटले । तद्वदत्रैवोपतिष्ठत इत्यादीनामपीति युक्ततरं सूत्रम् । जपोऽपि श्रुत्यैवेति सर्वमवदातम् । चकार इति-करणस्य प्रत्येकसंबन्धार्थः ।

यावदुक्तं कर्माणि करोति ।

यजमान एव । उपस्थानादिजपानामङ्गभूतानि कर्माण्यपि यावदुक्तमनतिक्रम्य करोति । प्रत्यगाशीर्मन्त्रैरुत्सर्गेण जपस्तैः कर्माणि यावद्विहितान्येव करोति यजमानो नतु यत्र यत्रापि । तथा प्रणीताप्रणयनादीनां याजमाने श्रुतत्वाद्यजमानकर्तृ[क]त्वे प्राप्ते पुनरधीतेन सूत्रं योज्यम् । अस्माभिर्यावत्कर्तव्यं यजमानस्योच्यते तावदेव तेन कार्यं न यजमानकाण्डविहितं सर्वम् । अयमभिप्रायः—प्रणीताप्रणयनादिकमाध्वर्यवेऽपि विधीयते नचोभाभ्यामेकं कर्म कर्तुं शक्यमतोऽध्वर्युणा कृते यजमानकृतमिव भवतीति न याजमानबाधोऽत्यन्तं भवति, यजमानेन कृते तु नाध्वर्युणा कृतमिति सर्वथाऽऽध्वर्य-वबाधः स्यात् । प्रणीतादिप्रणयने प्रणीतादिप्रकाशकमन्त्राणां जपेऽपि याजमानत्वोप-पत्तिः । आज्यावेक्षणादिसंस्काराणामुभयकर्तृ[क]त्वं विधानात्सिध्यतीति । ननु तर्हि यथा भारद्वाजेनोक्तं यत्र क्व चोपतिष्ठतेऽनुमन्त्रयत इति चोदयेद्यजमान एव तत्कुर्या-दिति यथोक्तमेवं वक्तव्यं जपतीत्यध्याहारेण किमर्थमुक्तमिति चेत् । उच्यते—एवमु-च्यमाने करणमन्त्रतैव स्यात् । अस्तु का हानिरिति चेत् । न । आध्वर्यवमेव तदा स्यात् । ननु वचनाद्याजमानं भवेत् । न । तस्य न्यायमूलत्वान्न्यायासंभवे याज-मानं न स्यात् । न्यायश्च फलमात्राशासनपरत्वे हि फलापूर्वाधानसामर्थ्यं जपापूर्वेण यज-माने भवति दीक्षणीये वा यदि करणमन्त्रः स्यात्तदा न तथा । ततस्तु स्यादार्त्विज्यमपि । किंच प्रवसति यजमानेऽध्वर्योरेव स्यात्परार्थेषु तस्य प्रतिनिधित्वाङ्गीकारात् । स्वसं-स्कारत्वे तु न प्रतिनिधिरिति याजमानमेव । तत्राङ्गमात्रलोपेऽनाज्ञातजपादिविष्णुस्मर-णादिना समाधिर्भवेत् । प्रधानं च जपस्तु प्रवसताऽपि कार्यः । उपस्थानादौ तु मानसी क्रियाऽङ्गं सा यजमानेनैव कर्तुं शक्येति युक्तमुत्पश्यामः । जपत्वेन विधाने चाध्ययनस्वरधर्मताऽपि साध्यते । तथाच पाणिनिनैकश्रुतिदूरात्संबुद्धौ यज्ञकर्मण्यजप-न्यूङ्खसामस्विति[1]स्मरणात् । सूत्रकारेण तु न्यायादेव साधितमध्ययनस्वरधर्मत्वम् । कथम् । अधीतिपठत्योरिव जपतेरुच्चारणप्राधान्यात् । यादृशमध्ययन उच्चारणं तादृगेव जपति-नाऽभिहितम् । करणमन्त्रत्वे तु यावताऽर्थस्मृतिर्जायते तावानेव करणत्वेनापेक्षितो विहित एकश्रुत्या चार्थप्रत्यायनान्नाङ्गं स्वराः । यद्यपि बहुव्रीहौ प्रकृत्या पूर्वपदमि-त्यादिषु स्वरस्याप्यर्थज्ञानेऽङ्गतोक्ता साऽपि पाठावसरेऽर्थनिर्णयार्थमुपायोऽपि नाङ्गम-तस्तत्रैव निश्चितार्थेन मन्त्रेण क्रिया साध्या । अत एवोक्तं यज्ञकर्मणीति । शस्त्रेषु करणमन्त्रत्वाभावेऽप्यैकश्रुत्यं वचनात् । शंसतीति विधेर्देवतागुणप्रकाश-कत्वमात्रेण पर्यवसानम् । उक्तं चाकरणमन्त्रत्वम् । अपि वा स्तौतिशंसती

---

१ च. ट. 'वमेव व' ।

प्रधानकर्मणी स्यातामिति प्रधानकर्मता प्रकाशनमात्रप्राधान्यादुच्चारणप्राधान्यात् । शास्त्रेषूच्चारणमङ्गमेव करणमन्त्रेष्विव । स्तोत्रेषु साम्ना स्तुवीतेति गीतिषु सामाख्येति जैमिनिनोक्तत्वाद्गानं च स्वरसाध्यमेवेति साम्ना गीत्या संस्कृताभिर्ऋग्भिर्देवतागुणान्प्रकाशयेदिति स्तौतेः पर्यवसानात्करणमन्त्रेषु मन्त्रसाध्यक्रियया स्तोत्रशस्त्रयोरर्थप्रकाशनेन जपे तूच्चारणेनापूर्वोत्पत्तिरिति विधिसामर्थ्येन प्रकृतिश्रुत्याऽनुगृहीतेनावगम्यत इति चतुरश्रम् । सर्वत्रोपस्थानादिषु जपत्वे सत्यपि चासाधारण्येन व्यपदेशा भवन्तीति न्यायान्नागृहीतविशेषेण विशेष्ये बुद्धिरिति चोपसर्गविशिष्टैर्धातुभिर्विशिष्टमेव वाच्यमिति विशिष्टानामेव व्यपदेश उपस्थानमनुमन्त्रणमभिमन्त्रणमभिमर्शनमिति केवलेऽपूर्वोत्पादके मन्त्रोच्चारणे तु जप इति व्यपदेशो धारणार्थेऽध्ययनमिति द्वयविलक्षणे च मन्त्रपाठ इत्युच्चारणप्रधानता तु सर्वत्र न व्यभिचरतीति युक्ततरं सूत्रमिति ।

यावदुक्तं पत्न्याः कर्माणि ब्रह्मचर्यं जपाश्च ।

दंपत्योरविशेषेण प्राप्तानि यजमानकर्माणि पत्न्या नियम्यन्ते । कुतः । यदि याजमानं कर्म सर्वं तस्या अपि स्यात्तदा पत्न्यवेक्षत इत्यनर्थकं स्यादतो ज्ञायते यावदुक्तमेव तया कार्यम् । अत्र यावदुक्तमेव कर्माणीति नियमो नतु यावदुक्तं कर्माण्येवेति न ब्रह्मचर्यजपपरिसंख्येति वक्तुमुक्तं ब्रह्मचर्यं जपाश्चेति । ब्रह्मचर्यं तद्यजमानस्य ब्रह्मचर्येणार्थात्तस्या अपि सिद्धमेव तथाऽपि मनोविकारमपि निरुन्ध्या(न्ध्या)दिति वक्तुं पुनर्वचनम् । पत्नीप्रत्यगाशिषां मन्त्राणां याजमाने च न विनियोग इति तेषां लिङ्गेन जपार्थोऽयमारम्भः । जपशब्देनोपस्थानादिकमपि स्वस्याः प्रत्यगाशिषां नियम्यते ।

दर्शपूर्णमासयोर्याजमानं व्याख्यास्यामः ।

दर्शपूर्णमासादय एव हविर्यज्ञा उक्तास्तेष्वेव याजमानं व्याचिख्यासितम् । तथाऽपि पूर्वतनं याजमानं सर्वकर्मसाधारणमिति वक्तुं दर्शपूर्णमासयोरित्युक्तम् । पूर्वतनं प्रसङ्गेन सर्वार्थमित्यर्थः । दर्शपूर्णमासयोर्व्याख्यास्याम इत्येतावता सिद्धे याजमानग्रहणं दर्शपूर्णमासशब्देन कालग्रहणं मा भूदिति । तेन वपनं विधीयमानं न काल-मात्रे विधीयतेऽपि तु यजमानस्य संकल्पस्य सर्वाङ्गपूर्वभावित्वेनाभिधानाद्यष्टुं प्रवृत्तस्यैव तदङ्गतया कार्यं नतु दैवात्कर्तुमशक्तेन दर्शपूर्णमासौ विच्छिन्नौ(?) नष्टाग्निनाऽपि वा कार्यम् । उत्तरसूत्रे यजमानग्रहणं पत्न्या व्युदासार्थम् ।

पर्वणि यजमानः केशश्मश्रूणि वापयते ।

प्रथम एव पर्वणि यथा स्यादित्येवमर्थं पुनः पर्वणीति चैकवचनं च प्रथमपर्वसंस्कृत उभयत्राधिकारीत्युभयप्रयोगसाध्यत्वादपूर्वस्य । अत एव वैखानसः—पूर्वस्मिन्पर्वणि

पौर्णमासेन यक्ष्य इत्युक्त्वा केशश्मश्रूणि वापयित्वोपवसति । दर्शेन यक्ष्य इत्युक्त्वोपवसतीति । संकल्पानन्तरं पौर्णमास्यामेव वपनमिष्टं तदङ्गत्वेन । केचित्तु यावत्पर्यन्तं* प्रयोगसमाप्तिस्तावद्वपनस्य काल इति ज्ञापयितुं पर्वग्रहणमित्याहुः । केशाश्छिरोगतान्मुखगतानि श्मश्रूणि नापितेन वापयते । अत्र केशशब्दप्राथम्यमजन्तत्वेन ननु क्रमार्थम् । क्रमस्तु श्मश्रूण्यग्रे वापयतेऽथोपपक्षावथ केशानथ नखानि सव्यस्य हस्तस्य कनिष्ठादि ततो दक्षस्यैवं पादयोः ।

पौर्णमास्यां प्रातराशे जायापती सर्पिर्मिश्रमश्नीतः ।

पूर्वसूत्रे व्युदस्ता पत्नी पुनर्गृहीता । प्रातराशः प्रातर्भोजनं, प्रथमभोजने रूढोऽयं शब्दः प्रातराश इति न तु प्रातरेवेति । तेनाध्वर्यवे च उदित आदित्ये गार्हपत्यादाहवनीयमित्यादिनोक्तोऽन्वाधानस्य प्रातःकालो न बाधितः प्रातरन्वाधानस्येष्टत्वात् । कालस्त्वनियतः । सत्या क्षुधि भोजननियमः । तत्र सर्पिर्मिश्रता कर्माङ्गत्वेन नियम्यते, भोजनं त्विच्छात एव, तत्रासत्यां क्षुधि कालबाधेऽपि सर्पिर्मिश्रत्वं न बाध्यते वचनादुभयोरपि नियमः ।

तत्रैच्छिकेऽदनीये प्राप्ते परिसंचष्टे—

यदन्यन्मांसान्माषेभ्यश्च ।

उभयोः परिसंख्यानादनिषिद्धं भोक्तव्यम् ।

न सुहितौ स्याताम् ।

नातितृप्तौ भवतः ।

प्राग्वत्सापाकरणादमावास्यायां कामं सुहितौ स्याताम् ।

पूर्णमासे भोजनकालानियमोऽत्र नियमः ।

> पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं तु साग्निकः ॥
> पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥ इति ।

क्रमेण ततो भोजनं वत्सापाकरणं व्रतं च । अत्रापि सर्पिर्मिश्रताऽनुवर्तते यदन्यदिति च । अत्र पिण्डपितृयज्ञमासिककर्तुरपराह्णे भोजनानन्तरं वत्सापाकरणं कात्यायनोक्तम् । अत्रापि पूर्ववदेव । सर्पिषोऽभावे दध्ना पयसा वेत्यापस्तम्बवैखानसौ ।

अग्निं गृह्णामि सुरथमित्यन्वाधीयमानेषु जपति ।

यथालिङ्गं देवतारूपेष्वग्निष्विति शेषः । अहिर्बुध्नियो नियच्छास्वित्यन्तान्यथालिङ्गमन्वाधाने विहितांस्तथैव जपति तीर्थेन प्रविश्याग्रेणाऽऽहवनीयं गतः स्वायतन उपविष्टः ।

---

* अत्र पर्यन्तशब्दोऽधिकः ।

इदमहमग्निज्येष्ठेभ्यो वसुभ्यो यज्ञं प्रब्रवीमीदमह-
मिन्द्रज्येष्ठेभ्यो रुद्रेभ्यो यज्ञं प्रब्रवीमीदमहं वरु-
णज्येष्ठेभ्य आदित्येभ्यो यज्ञं प्रब्रवीमीत्यन्वाहितेषु ।

जपतीत्यनुषङ्गः ।

बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायाम् ।

बर्हिषा तदाहरणेन सह वत्सापाकरणेन सहेति ज्ञेयम् ।

अशनमग्न्यन्वाधानं व्रतोपायन-
मित्येवमनुपूर्वाण्येके समामनन्ति ।

पौर्णमास्यामनियतकालं प्राप्तं भोजनम् । तत्रेदमुच्यते सत्यां क्षुधि काले भोजनं ततोऽन्वाधानं न प्रातरेव । ततो व्रतं व्यवधानेनैव बर्हिषा पूर्णमासे व्रतमुपैतीत्युक्तम् । तस्य विकल्पनमग्न्यन्वाधानमनन्तरमेव व्रतोपायनमेकेषामित्यर्थः । ततस्तु श्वोभूते बर्हिराहरणपक्षेऽयमेव क्रमः ।

अग्न्यन्वाधानमशनं व्रतोपायनमित्येके ।

अनुपूर्वाण्येवेत्यर्थः । अतंनयतोऽप्येवमेव ।

प्रणीतासु प्रणीयमानास्वासन्नेषु
हविःषु चैतौ साधारणौ कालौ ।

पर्वद्वयेऽप्येतयोः कालयोर्व्रतोपायनं विकल्पत इत्यर्थः । अत्र साधारणग्रहणात्पूर्वयोः पक्षयोर्व्यवस्थितो विकल्पः क्रमेण पर्वद्वय इति गम्यते ।

व्रतोपायनमेव दर्शयति—

विद्युदसीत्यप उपस्पृश्य ।

अत्राग्निहोत्रोक्तेन मयि श्रद्धेत्यन्तेन ।

अपरेणाऽऽहवनीयं दक्षिणाऽतिक्रम्य
पयस्वतीरोषधय इत्यप आचामति ।

सꣳसृजेत्यन्तः । आचामति प्राश्नाति । ततो बहिःशुद्ध्यर्थमाचमनम् ।

देवा देवेषु पराक्रमध्वं प्रथमा द्वितीयेषु द्विती-
यास्तृतीयेषु त्रिरेकादशा इह माऽवत । इदꣳ
शकेयं यदिदं करोम्यात्मा करोत्वात्मन इदं
करिष्ये भेषजमिदं मे विश्वभेषजा । अश्वि-
ना प्रावतं युवमिति देवता उपतिष्ठते ।

त्रयस्त्रिंशद्देवता उपतिष्ठते दक्षिणातिक्रान्त एव ।

समुद्रं मनसा ध्यायन्सम्राडसि व्रतपा असि
व्रतानां व्रतपतिरसि व्रतमारभे तन्मे प्रब्रवीमि तच्छ-
केयं तेन शकेयं तेन राध्यासमित्यादित्यमुपतिष्ठते ।

समुद्रध्यानं कुर्यादित्येव । तदुक्तं सूत्रान्तरे व्रतमुपैष्यन्समुद्रं मनसा ध्यायतीति सम्राडसि०दित्यमुपतिष्ठते ।

अग्ने व्रतपते व्रतं चरिष्यामीति ब्राह्मणोऽग्निमुपतिष्ठते ।

राध्यतामित्यन्तः ।

वायो व्रतपत इति वायुमादित्य व्रतपत
इत्यादित्यं व्रतानां व्रतपत इति व्रतपतिम् ।

अग्निर्वै देवानां व्रतपतिरिति श्रुतेराग्निमुपतिष्ठते । व्रतं चरिष्यामीति त्रिष्वप्यनुषङ्गः ।

एते साधारणा ऋतेऽग्नेः ।

अग्नेरुपस्थानमन्त्रं विनाऽन्ये मन्त्राः क्षत्रियवैश्ययोर्ब्राह्मणस्यापीत्यर्थः ।

यद्यस्तमितः स्यादाहवनीयमेवाऽऽदित्योपस्थानेनोपतिष्ठते ।

विकृत्यनुष्ठानेन दैवान्मानुषाद्वा व्रतोपायनं सूर्यास्तमये स्यात्तदाऽऽदित्योपस्थानं (न)मन्त्रेणाऽऽहवनीयमेवोपतिष्ठेत तत्राऽऽदित्यस्य प्रविष्टत्वात् ।

पर्वणि यजमानः स्वयमग्निहोत्रं जुहोति ॥ १ ॥

स्वयमेवेति यजमानः प्रारब्धप्रयोग एव पर्वणि अधिकृताधिकारोऽयं पर्वणीति पुनर्वचनात्सायं प्रातश्च नियमः । पर्वणीति ग्रहणमग्निहोत्रस्य प्रातस्येव पर्वणि नियमार्थं नतु दर्शपूर्णमासाङ्गतया याजमानं विधीयत इति दर्शयितुम् ।

यवाग्वाऽमावास्यायां[१] संनयन् ।

स्वयं यजमान इत्यनुवर्तते । द्रव्यं वैकल्पिकं नियम्यते यवाग्वैवेति । संनयन्नित्येव वक्तव्येऽमावास्याग्रहणं प्रतिपादि संज्ञातः प्रातर्मा भूत्तत्र नित्येनैव द्रव्येण भरद्वाज आहास्याममावास्यायां रात्रिं कुमारा न पयः पिबन्ति यवाग्वाऽस्यैतां रात्रिमग्निहोत्रं हुत्वेति । अत्र कुमाराणां पयःप्रतिषेधः सांनाय्ये सर्वगवां दोहविधिनिमित्तः । अतः संनयत एव रात्राबमावास्यायां रात्रिं कुमारा न पयः पिबन्ति यवाग्वाऽस्यैतां होमः । तत्रापि पर्वणि स्वयमेवातस्तु यवागूहोमो नासंनयतः । तदाह कात्यायनः—यवाग्वाऽग्निहोत्रहोमः संनयतस्तां रात्रिमिति । ननु पौर्णमास्यां संनयतो यवाग्वा न रात्रौ होमः स्यादिति चेन्न । गवां सांनाय्यार्थदोहाद्यत्र यवाग्वाऽग्निहोत्रमिति नियमः । नच प्रातरपि स्यादिति । रात्रिं न पयः पिबन्तीति प्रातरग्निहोत्रीं विनाऽन्यासां दोहः ।

---

१ च. ट. 'यां यवाग्वा हो' । २ च. ट. ठ. 'यन्नित्येवा' ।

तस्या उच्छेषणमातञ्चनार्थं निदधाति ।

तस्या यवाग्वा यथाऽग्निहोत्रं यस्याश्चतुरुन्नयनेनाग्निहोत्रं हुतं तस्या उच्छेषणमग्निहोत्रहवणीगतं भक्षणलोपेनाऽऽतञ्चनार्थमिति प्रयोजनकथनेनेदमुक्तं नोच्छेषणप्रतिपत्तिरियं तेनोच्छेषणनाशे प्रतिनिधिनाऽऽतञ्चनमित्युक्तमेव । नचाऽऽतञ्चनार्थं यवाग्वा होमः पुनर्युक्त आतञ्चनार्थं जुहुयादित्यविधानात् । स च स्वविधिप्राप्त एव संनयति यजमानेऽमावास्यायां यवाग्वा नियम्यतेऽत एव तस्या उच्छेषणमनुनिष्पन्नमेवाऽऽतञ्चनार्थमित्युक्तम् । तेन यदुक्तं बौधायनेनोच्छेषणार्थं पुनर्होम इति तत्प्रत्युक्तं न्यायशास्त्रविरोधात् ।

नानृतं वदति न मा९ँसमश्नाति न
स्त्रियमुपैति *नैता९ँ रात्रिमश्नाति ।

अनृतवदनस्य प्रतिषेधे सत्येवान्वाहिताग्नेः पुनर्वचनं कर्माङ्गत्वख्यापनार्थम् । तेन प्रमादादनृतवदने तदैव प्रायश्चित्तं कृत्वाऽग्रिमं कर्म कर्तव्यमिति दर्शितम् । न मांसमित्यपि भोजनव्यतिरेकेणापि प्रतिषिध्यते पूर्वे तु प्रातराशे व्यञ्जनत्वेन प्राप्तस्य प्रतिषेधः । अयं तु पुनरन्योऽपि प्राप्तस्य फलादेरिव । अथवा मासिकादिकर्तुः श्राद्धाङ्गसशेषभक्षणं प्राप्तं तत्रापि मांसव्यतिरिक्तमेव शेषं भक्षयेदिति निषेधसिद्धिः ।

आरण्यस्य सायमश्नाति ।

सायं यदश्नाति तदाऽऽरण्यस्याश्नाति । ग्राम्यपरिसंख्यार्थमिदम् । क्रमप्राप्तेऽपि सायंभोजने सायंग्रहणं द्वितीयभोजनस्योपलक्षणार्थं तेनैते त्रयो विकल्पा आरण्याशनमप्भक्षणमनशनं चेति द्वितीयभोजन एव । दैवात्प्रातराशे सायमुत्कृष्टेऽपि नैते विकल्पा भवन्ति किंतु प्रातराशः पूर्ववदेव भवतीति प्रयोजनम् ।

आमार्गादा मधुन आप्राशातिकादित्येकेषाम् ।

मृगमांसं मधु वर्जयित्वाऽन्यदारण्यस्याश्नाति । आङ्वधौ । एकेषां प्राशातिकं च वर्जयित्वाऽन्यदारण्यकम् । प्राशातिकं धान्यमपामार्गबीजसदृशमिति भाष्यकारमतिः । कोशीधान्यमित्यन्ये ।

आरण्यायोपवसन्नपोऽश्नीयान्न वा किंचन ।

आरण्याद्याऽऽरण्यमुपवसन्वर्ज[य]न्नपस्ता अपि नाश्नीयादिति तृतीयः पक्षः ।

उभावग्नी उपस्तृणते देवता उपवसन्तु
मे । अहं ग्राम्यानुपवसामि मह्यं गोप-
तये पशूनिति परिस्तीर्यमाणेषु जपति ।

परिस्तीर्यमाणेष्वग्निषु सकृन्मन्त्रः । उपस्तीर्यः पूर्वश्चेति ब्राह्मणे द्वयोर्ग्रहणं क्रमार्थं प्राधान्यात् ।

---

* नैता९ँ रात्रिमश्नातीति पाठः केवलसूत्रपुस्तकेष्वेव ।

आहवनीयागारे गार्हपत्यागारे वा संविशति ।

अगारमपवरकस्तत्र विश्रामति शेत इत्यर्थः ।

अमावास्यायां रात्रिं जागर्ति ।

स्पष्टम् ।

अपि वा यथा शक्नुयात्तथा कुर्यात् ।

स्पष्टम् ।

उपरि त्वेव न शयीत ।

उपरि खट्वादौ ।

कामं वोपरि शयीत ।

अत्रापि पूर्वेण विकल्पः ।

व्रतचारी त्वेव स्यात् ।

तस्यैतद्व्रतं नानृतं वदेन्न मांसमश्नीयान्न स्त्रियमुपेयादिति व्रतानि चरेत् ।

श्वोभूते ।

गतम् ।

भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं
त्वा वृणीमह इति ब्रह्मिष्ठं ब्रह्माणं वृत्वा ।

उत्कर इति सूत्रान्तरे । ब्रह्म वेदस्तन्निष्ठं तदध्यापनार्थविचारपरं च ।

अपरेणाऽऽहवनीयं दक्षिणाऽति-
क्रम्यापरेण ब्रह्मसदनमुपविशति ।

स्वसदने । गतार्थम् । आहवनीयाभिमुख इति भरद्वाजादयः । अत्राऽऽसीन एव कर्माणि करोति ।

आसंस्थानादन्वास्ते ।

' विहारान्न गच्छतीत्यर्थः । संस्थाजपपर्यन्तम् । आपस्तम्बादिभिरित ऊर्ध्वमयमेव संचर इति लौकिके संचारेऽग्रेणाऽऽहवनीयम् ।

यजमान वाचं यच्छेत्युच्यमाने
वाचं यच्छत्या हविष्कृतः ।

त्रिष्फलीप्रैषे वाचं विसृजते । व्याख्यातमेतदाध्वर्यवे ।

भूश्च कश्च वाक्चक्वं गौश्च वट्च खं च धूश्च नूश्च
पूश्चैकाक्षराः पूर्दशमा विराजो या इदं विश्वं
भुवनं व्यानशुस्ता नो देवीस्तरसा संविदानाः
स्वस्ति यज्ञं नयत प्रजानतीरिति प्रणीताः

प्रणीयमाना अनुमन्त्रयते ब्रह्मपूताः स्थ को वो युनक्ति स वो युनक्त्विति साद्यमानाः ।

स्पष्टम् ।

कस्त्वा युनक्ति स त्वा युनक्त्विति यज्ञं युनक्ति ।

एतद्व्याचष्टे—

सर्वमनुवीक्षते ।

सर्वं विहारमित्यापस्तम्बादयः ।

यजमान हविर्निर्वप्स्यामीत्युच्यमान ओ३म् निर्वपेति प्रत्याहाग्निᳫं होतारमिह तᳫं हुव इति हविर्निरुप्यमाणमनुमन्त्रयते निरुप्तं निर्वपणार्थं वा पात्रम् ॥ २ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठे प्रश्ने प्रथमः पटलः ॥ १ ॥

निरुप्यमाणमेकैकमभ्यस्तसकृत् । अत्र प्रणवस्त्रिमात्रः । ओमभ्यादान इति पाणिनिना प्लुतविधानात् ।

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने प्रथमः पटलः ॥ १ ॥

अथ षष्ठे प्रश्ने द्वितीयः पटलः ।

इदं तस्मै हर्म्यं करोमि यो वो देवाश्चरति ब्रह्मचर्यम् । मेधावी दिक्षु मनसा तपस्व्यन्तर्दूतश्चरति मानुषीष्विति वेदिदेशमभिमृशति ।

वेदिस्थलं हस्तेन स्पृशञ्जपति । एवं यत्राभिमृशतीति तत्र सर्वत्र ज्ञेयम् । इत ऊर्ध्वं द्वितीयया कर्मनिर्देशोऽभिमन्त्रयत इत्यनुकर्षणीयं व्यवहितमपि । कुतः । योग्यत्वात् । इदं तस्मा इति प्रत्यक्षेण पुरोऽवस्थितं निर्दिशत्यत्रैवाभिमृशतीत्युक्तं चतुःशिखण्डेत्यादौ न तथा निर्देशोऽस्ति तस्मान्नाभिमृशतीत्यध्याहारः । भरद्वाजादय एषु विनियोगमभिमन्त्रयत इत्येव पठन्ति । अनुमन्त्रयत इति तु प्रायेणाग्नौ प्रक्षिप्त एव प्रयुज्यते तस्मात्प्रकृतमभिमन्त्रयत इत्येवानुषञ्जनीयम् । परिस्तीर्यमाणेष्वित्यत्र नानुषञ्जनीयम् । सप्तम्या निर्दिष्टे तु जपतीत्येव ।

---

१ क. ख. ग. घ. ड. ठ. ण. °भमिम° ।

चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका भुवनस्य मध्ये । मर्मृज्यमाना महते सौभगाय मह्यं धुक्ष्व यजमानाय कामान् । वेदेन वेदिं बृहतीमविन्दन्सा पृथिव्यां प्रथतां पार्थिवानि । तस्यां बर्हिः प्रथतां साध्वन्तरहिꣳस्रा णः पृथिवी देव्यस्तु । वेदेन वेदिमिति वेदेन वेदिꣳ संमृज्यमानाम् ।

अभिमन्त्रयते । वेदेनेति पठितो मन्त्र आध्वर्यवे ।

यो मा हृदा मनसा यश्च वाचा यो ब्रह्मणा कर्मणा द्वेष्टि देवाः । यः श्रुतेन हृदयेनेष्णता च तस्येन्द्रवज्रेण शिरश्छिनद्मीति स्तम्बयजुर्ह्रियमाणम् ।

अभिमन्त्रयते ।

यदुद्घ्नन्तो जिहिꣳसिम पृथिवीमोषधीरपः । अध्वर्यवस्फ्यकृतस्फ्येनान्तरिक्षं मोरुपाव तस्मात् । यदुद्घ्नन्तो जिहिꣳसिम जीवमस्या वेदिं चक्षुषा मनसा देवयन्तः । मा तेन हेड उपगाम भूम्याः शिवा नो विश्वैर्भुवनेभिरस्त्विति स्फ्येनोत्तमां स्वचमुद्धन्यमानाम् ।

अभिमन्त्रयते ।

बृहस्पते परिगृहाण वेदिमिति परिग्राहयोः ।

जपति । ब्रह्मत्वे पठितो देव्यस्त्वित्यन्त एव योग्यत्वात् ।

भूमिर्भूत्वा महिमानं पुपोष ततो देवी वर्धयते पयाꣳसि । यज्ञिया यज्ञं वि च यन्ति शं चौषधीराप इह शक्वरीश्चेति कृताम् ।

अभिमन्त्रयते । कृतां वेदिम् ।

ईडेऽन्यक्रतूरहमपो देवीरुपब्रुवे दिवा नक्तं च सस्रुषीरपस्वरीरिति प्रोक्षणीरासाद्यमानाः ।

अभिमन्त्रयते ।

आज्यमसीत्याज्यमवेक्षते यथाऽध्वर्युरद्भिराज्यमाज्येनापः सम्यक्पुनीत सवितुः पवित्रैः । ता देवीः शक्वरीः शाक्वरेणेमं यज्ञमवत संविदाना इत्याज्यमपश्चोत्पूयमानाः ।

सकृदेव । अध्वर्योरन्यमन्त्राश्रय आदितोऽधिका विहिताः । ततस्तूभयोः समाना एवातो याजमाने पञ्चानामित्यावर्तते । अन्यथाऽन्तिमावृत्तौ विसंवादमुभयोः स्यात् । विशेषु चतुर्थस्य काम्ये सप्तदश कामयित्वेति ज्ञेयम् ।

पश्वानां त्वा वातानामित्येतैराज्यानि गृह्यमाणान्यभिश्रेम बर्हिरन्तः पृथिव्याꣳ संरोहयन्त ओषधीर्विचक्षणाः । यासां मूलमुदवधीः स्फ्येन शिवा नस्ताः सुहवा भवन्त्वित्यन्तर्वेदि बर्हिरासाद्यमानम् ॥ १ ॥ सुमनसो यजमानाय सन्त्वोषधीराप इह शक्करीश्च । वृष्टिद्यावापर्जन्य एना विरोहयतु हिरण्यवर्णाः शतवल्शा अदब्धा इति बर्हिः प्रोक्ष्यमाणमूर्णा मृदु प्रथमानꣳ स्योनं देवेभ्यो जुष्टꣳ सदनाय बर्हिः । सुवर्गे लोके यजमानꣳ हि धेहि मां नाकस्य पृष्ठे परमे व्योमन्निति बर्हिः स्तीर्यमाणम् ।

प्रतिधातु मन्त्रावृत्तिः ।

चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते । सा स्तीर्यमाणा महते सौभगाय सा मे धुक्ष्व यजमानाय कामानिति बर्हिषा वेदिꣳ स्तीर्यमाणाम् ।

वेदिं मध्यमेन धातुना ।

शिवा च मे शग्मा चैधि स्योना च मे सुषदा चैध्यूर्जस्वती च मे पयस्वती चैधि सूपचरणा च मे स्वधिचरणा चैधीषमूर्जं मे पिन्वस्व ब्रह्मतेजो मे पिन्वस्व क्षत्रमोजो मे पिन्वस्व विशं पुष्टिं मे पिन्वस्वाऽऽयुरन्नाद्यं मे पिन्वस्व प्रजां पशून्मे पिन्वस्वेति स्तीर्णाम् ।

अभिमन्त्रयते । वेदिं पूर्वेष्वनुषङ्गः । परेष्वभिमन्त्रयत इत्येव ।

अस्मिन्यज्ञ उपभूय इन्नु मे विक्षोभाय परिधीन्दधामि । धर्ता धरुणो धरीयानग्निर्द्वेषाꣳसि निरितो नुदाता इति परिधीन्परिधीयमानात् ।

परिधीन्दधामीति बहुवचनेन संसृष्टद्रव्यत्वाच्च सकृदेव सर्वानुमन्त्रणम् । तथैवोक्तं भरद्वाजेन सर्वानिति । वैखानसेनाऽऽवृत्तिरुक्ता यं(?)न्यायेन । अतः सूत्रकृता प्रथमत एव विनियोगमभिधाय ततो ध्रुवोऽसीत्युक्तं, तस्मात्प्रत्येकमावृत्तिर्बहुवचनमितरापेक्षं प्रत्येकमेव परिधीयमानत्वात् ।

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति च ।

प्रतिमन्त्रमेकैकम् । तथैवोक्तमापस्तम्बभरद्वाजाभ्याम् ।

युनज्मि त्वा यन्मे अग्न इति द्वाभ्यामार्भि परिधीयमानम् ।

तृतीयपरिधेः पूर्वमेव सूर्यस्त्वेत्यनेनापि परिधानस्यैव करिष्यमाणत्वात्तस्माद्वा पूर्वं युक्तम् ।

---

१ क. ग. च ट. ठ. ण. त्वा ब्रह्मणा यं ।

तेजिष्ठा ते तपना या च रोचना प्रत्योषन्तीस्त-
नुवो यास्ते अग्ने ताभिर्वर्माण्यभितो व्ययस्व मा
त्वा दभन्यातुधानाः पिशाचा इति परिधितम् ।

परिहितमिति वा पाठः । परिहितं व्याकरणसिद्धम् । परिधितं छान्दसम् ।

विच्छिनद्मि विधृतीभ्याꣳ सपत्नान्जातान्भ्रातृव्यान्ये च
जनिष्यमाणाः । विशो यन्त्राभ्यां विधमाम्येनानहꣳ स्वा-
नामुत्तमोऽसानि देवाः । विशो यन्त्रे नुदमाने अरातिं
विश्वं पाप्मानममतिं दुर्मरायुम् । सीदन्ती देवी सुकृतस्य
लोके धृती स्थो विधृती स्वधृती प्राणान्मयि धारयतं
प्रजां मयि धारयतं पशून्मयि धारयतमिति विधृती
साद्यमाने ॥ ४ ॥ अयं प्रस्तर उभयस्य धर्ता धर्ता
प्रयाजानामुतानूयाजानाम् । स दाधार समिधो विश्वरूपास्त-
स्मिन्स्रुचो अध्यासादयामीति विधृत्योः प्रस्तरꣳसाद्यमानम् ।

इत ऊर्ध्वं स्थालीमित्यन्तं साद्यमानां साद्यमानमिति यथायोगं ज्ञेयम् ।

आरोह पथो जुहु देवयानान्यत्रर्षयः प्रथमजा ये पुराणाः ।
हिरण्यपक्षाजिरासंभृताङ्गो वहासि मा सुकृतां यत्र लोकाः ।
जुहूरसि घृताची गायत्रियाम्नी कविभिर्जुषाणा । अव्यथमाना
यज्ञमनुयच्छस्व सुनीती यज्ञं नयास्युपदेवानाग्नेयेन शर्मणा
दैव्येनेति जुहूमवाहं बाध उपभृता सपत्नाञ्जातान्भ्रातृव्यान्ये च
जनिष्यमाणाः । दोहै यज्ञꣳ सुदुघामिव धेनुमहमुत्तरो भूयासम-
धरे मत्सपत्नाः । सुभृदस्युपभृद्घृताची त्रैष्टुभेन छन्दसा विश्व-
वेदः । अव्यथमाना यज्ञमनुयच्छस्व सुनीती यज्ञं नयास्युपदेवा
नैन्द्रेण शर्मणा दैव्येनेत्युपभृतं यो मा वाचा मनसा दुर्मरायुर्हृदारा-
तीयादभिदासदग्ने । इदमस्य चित्तमधरं ध्रुवाया अहमुत्तरो भूया-
समधरे मत्सपत्नाः । ध्रुवाऽसि धरणी धनस्य पूर्णा जागतेन
छन्दसा विश्ववेदः । अव्यथमाना यज्ञमनुयच्छस्व सुनीती यज्ञं
नयास्युपदेवान्वैश्वदेवेन शर्मणा दैव्येनेति ध्रुवाꣳ स्योनो मे
सीद सुषदः पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गे लोके दिवि
सीद पृथिव्यामन्तरिक्षेऽहमुत्तरो भूयासमधरे मत्सपत्नाः । अयꣳ
स्रुवो अभिजिहर्ति होमाञ्छतक्षरश्छन्दसाऽऽनुष्टुभेन । सर्वा
यज्ञस्य समनक्तु विष्ठा बार्हस्पत्येन शर्मणा दैव्येनेति स्रुवमियꣳ

स्थाली घृतस्य पूर्णा छिन्नपयाः शतधार उत्सः । मारुतेन शर्मणा दैव्येनेत्याज्यस्थालीम् ॥ ५ ॥ यज्ञोऽसि सर्वतः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयता्ँ शतं मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीरित्याग्नेयं प्रजापतिरसि सर्वतः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयता्ँ शतं मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीरित्यग्नीषोमीयं यो नः कनीय इह कामयाता अस्मिन्यज्ञे यजमानाय मह्यम् । अप तमिन्द्राग्नी भुवनां नुदेतां तामहं प्रजां वीरवतीं विदेयेत्यैन्द्राग्नम् ।

आसन्नमिति त्रिषु ज्ञेयम् । सांनाय्य आसाद्यमान इति विशेषस्य वक्ष्यमाणत्वात् ।

यस्त आत्मा पशुषु प्रविष्ट इति सांनाय्य आसाद्यमाने ।

जपति ।

इदमिन्द्रियममृतं वीर्यमनेनेन्द्राय पशवोऽचिकित्सन् । तेन देवा अवतोपमामिहेषमूर्जं यशः सह ओजः सनेय्ँ शृतं मयि श्रयतामिति शृतं यत्पृथिवीमचरत्तत्प्रविष्टं येनासिञ्चद्बलमिन्द्रे प्रजापतिः । इदं तच्छुक्रं मधु वाजिनीवद्येनोपरिष्टादधिनोन्महेन्द्रं दधि मां धिनोत्विति दधि ।

एतदन्तमभिमन्त्रयते ।

अयं यज्ञः समसदद्धविष्मानृचा साम्ना यजुषा देवताभिः । तेन लोकान्सूर्यवतो जयेमेन्द्रस्य सख्यममृतत्वमश्यामिति स्ँसन्नान्यभिमृशति ॥ ६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठप्रश्ने द्वितीयः पटलः ॥ २ ॥

स्ँसन्नानीति बहुवचनेन सर्वाणि गृह्यन्ते । तथैवोक्तमापस्तम्बभरद्वाजाभ्यामपि सर्वाणि हवीँषीति । प्रधानाङ्गार्थानि गृह्यन्ते । स्ँसन्नानीति समुपसर्गस्य ग्रहणं श्रुत्यनुविधानेन । न तु संसादयतीति विधिना कानिचित्सादितानि सन्ति किंतु सादयत्यासादयतीति । अथवा समुदायापन्नानि सान्ति सन्नानीति सामान्यमुभयेष्वप्यस्तीति युक्तम् । तथाचाऽऽज्यसमुदाय एक इतरसमुदाय एक इति प्रत्येकं मन्त्रावृत्तिः । अभिमृशति सकृत्ततस्तथैवान्यं संसन्नानीतिप्रयोगसामर्थ्यात् ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने द्वितीयः पटलः ॥ २ ॥

अथ षष्ठप्रश्ने तृतीयः पटलः ।

विहृव्यस्याष्टाभिः पौर्णमास्याꣳ हवीꣳ-
ष्यासन्नान्यभिमृशति चतुर्होत्रा च ।

ममाग्ने वर्च इत्यनुवाकस्याऽऽदितोऽष्टाभिर्ऋग्भिर्मा नो रीरिषो मा परादा इत्य-
न्ताभिः ।*

(+ पञ्चहोत्रैवामावास्यायामङ्गिरसो माऽस्य यज्ञस्य प्रातरनुवाकैरवन्त्वित्यनूच्यमानासु सामिधेनीषु जपति दशहोतारं पुरस्तात्सामिधेनीनामुपरिष्टाद्वा व्याचक्षीत समिद्धो अग्निराहुतः स्वाहाकृतः पिपर्तु नः । स्वगा दे-वेभ्य इदं नम इति समिद्धमग्निमुच्छुष्मो अग्न इति च मनोऽसि प्राजापत्यमिति स्रुवाघारमनुमन्त्रयते वागसीति स्रुच्यं देवाः पितरो देवा योऽहमस्मि स सन्यजे यस्यास्मि न तमन्तरेमि स्वं म इष्टꣳ स्वं दत्तꣳ स्वं पूर्तꣳ स्वꣳ श्रान्तꣳ स्वꣳ हुतं तस्य मेऽग्निरुपद्रष्टा वायुरुपश्रो-ताऽऽदित्योऽनुख्याता द्यौः पिता पृथिवी माता प्रजा-पतिर्बन्धुर्य एवास्मि स सन्यजे यस्यास्मि न तमन्तरे-मीति होतृप्रवरेऽध्वर्युप्रवरे च जपति मां देवेष्वाश्राव-याऽऽयुषे वर्चस इत्यध्वर्युप्रवरे वैशेषिकं चतुर्होतारं पुर-स्तात्प्रयाजानामुपरिष्टाद्वा व्याचक्षीत वसन्तमृतूनां प्रीणा-मीत्येतैः प्रयाजानाꣳ हुतꣳ हुतमनुमन्त्रयतेऽग्निश्चक्षुष्माꣳ-स्तस्याहं देवयज्यया चक्षुष्मान्भूयासमित्याग्नेयस्याऽऽ-ज्यभागस्य सोमश्चक्षुष्माꣳस्तस्याहं देवयज्यया चक्षु-ष्मान्भूयासमिति सौम्यस्याग्नीषोमयोरहमिति समस्ता-नुमन्त्रणमेके समामनन्ति पञ्चहोतारं पुरस्ताद्धवि-षामवदानानामुपरिष्टाद्वा व्याचक्षीताग्नेरहं देवयज्ययाऽ-न्नादो भूयासमित्याग्नेयस्य दब्धिरसीत्युपाꣳशुयाजस्या-ग्नीषोमयोरहमित्यग्नीषोमीयस्येन्द्राग्नियोरहमित्यैन्द्राग्नस्ये-न्द्रस्याहमित्यैन्द्रस्य महेन्द्रस्याहमिति माहेन्द्रस्याग्नेः

---

* अत्र सर्वटीकापुस्तकेषु अग्रत्यमेकं पत्रं त्रुटितमित्येवोपलब्धम् । + धनुश्चिह्नान्तर्गतं टीकापु-स्तकेषु नास्ति ।

स्विष्टकृतोऽहमिति स्विष्टकृतोऽग्निर्मा दुरिष्टात्पात्विति च
सुरूपवर्षवर्ण एहीतीडामाह्रियमाणां प्रतीक्षते ॥ ७ ॥
इड एह्यदित एहि भूयस्येहि श्रेयस्येहि वसीयस्येहि
चित्त एहि दधिष एहीत्युपाꣳशूपह्वे सप्त देवगवीर्ज-
पति चिदसि मनासि वस्वी रन्ती रमतिः सूनरी सूनृ-
तेत्युच्चैरुपह्वे सप्त मनुष्यगवीर्जपति विश्वा त्वं भूताऽनु-
प्राणिहि विश्वा त्वा भूताऽनुप्राणन्तु भूरस्यायुरसीष्टि-
रसि सुरूपवर्षवर्ण एहीमान्भद्रान्दुर्याꣳ अभ्येहि मामनु-
व्रतान्यु शीर्षाणि मृड्ढ्वꣳ सा नः प्रियासु प्रतूर्त्तिः प्रिया
नः सुहृत्सः प्रियवती मघोनी जुष्ट एहि रन्त एहि रमत
एहि सूनृत एहि सुहवाम एहि सह रायस्पोषेण देवीर्द-
वैरभि मा निवर्तध्वꣳ स्योना स्योनेन घृतेन मा समुक्षत
नम एतदुपदं भिषगृषिर्ब्रह्मा यद्दधौ समुद्रादुदश्नन्निव
स्रुचावागग्रे विप्रस्य तिष्ठति शृङ्गेभिर्दशभिर्दिशन्नित्यु-
च्चैरुपह्वे वायविडा ते मातेति होतारमीक्षमाणो वायुं
मनसा ध्यायेदुपहूतोऽयं यजमान इत्युच्यमान उपहूतः
पशुमानसानीति जपत्यस्मास्विन्द्र इन्द्रियं दधात्विति
चेडाया अहं देवयज्यया पुष्टिमान्पशुमान्भूयासमिडे भागं
जुषस्व नो जिन्व गा जिन्वार्वतस्तस्यास्ते भक्षिवाणः
स्याम सर्वात्मानः सर्वगणाः । इडा धेनुः सह-
वत्सा न आगादूर्जं दुहाना पयसा प्रपीना । सा
नो अन्नेन हविषोत गोभिरिडा जिन्वतां पय-
साऽभ्यस्मानित्युपहूतामिडां व्याख्याता मार्जनी ।)
मनो ज्योतिरिति मार्जनकृत् ।
अथ पिन्वस्व ददतो मे मा क्षायि कुर्वतो मे मोपदस-
दिशां क्लृप्तिरसि दिशो मे कल्पन्तां कल्पन्तां मे दिशो
दैवीश्च मानुषीश्चाहोरात्रे मे कल्पेतामर्धमासा मे कल्पन्तां
मासा मे कल्पन्तामृतवो मे कल्पन्ताꣳ संवत्सरो
मे कल्पतां क्लृप्तिरसि कल्पतां म आशानां त्वाऽऽ-
शापालेभ्यश्चतुर्भ्यो अमृतेभ्य इदं भूतस्याध्यक्षेभ्यो
विधेम हविषा वयमिति प्रतिदिशं व्यूहति
भजतां भागी भागं मा भागोभक्तनिरभागं भजा-

मोऽपस्विपन्वोषधीर्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टि-
मेरय ब्राह्मणानामिद्ँ हविः सोम्यानाँ सोमपीथिनां
निर्भक्तो ब्राह्मणो नेहाब्राह्मणस्यास्तीति च ॥ ८ ॥

अत्रापि जपति व्यू(व्यु)ह्येति ज्ञेयम्। अथवा विभज्योहति अभिमृशञ्जपति। अन्यथा प्रत्येकं मन्त्रयोर्विनियोगः कथं स्यान्नहि व्यूढस्य पुनर्व्यूहनम्। अतः प्रत्येकं मन्त्रसाध्यं जपादृष्टं नान्यत्। एवं पूर्वमपीति चेति सर्वत्र तेन न सर्वैरेतदन्तैश्चतुर्धा-करणानि पूर्वादिदिक्क्रमेण प्रतिदिशं सारयति। किं तु व्यू (व्यु)ह्य स्पृशन्सकृन्मन्त्रं जपतीत्यर्थः।

इदं ब्रह्मण इद्ँ होतुरिदमध्वर्योरिदमग्नीध इति चतुर्धा व्यादिशति।

चतुर्धाकरणानि पूर्वादिदिक्कृतानि व्यूढान्यभिमृश्य व्यादिशतीति श्रुतेः। अध्व-र्युणा चतुर्धाकृतानि यजमानेन व्यूढानि स एवाभिमृश्याभिमर्शनपूर्वकं मन्त्राञ्जप्त्वे-(पित्वे)त्यर्थः। हस्तेनाभिमृश्याऽऽदिशति निर्दिशति तत्तदृत्विक्संबन्धित्वेन निवेद-यति। ततस्तु संबन्धज्ञानजन्येन दृष्टेनैव प्रयोजनेन ज्ञानविषयाणां चतुर्धाकरणानां दृष्टः संस्कारो नह्यनिर्दिष्टानि तत्तत्तदृत्विक्संबन्धेनाज्ञा[ता]नि तैरादातुं शक्यानि।

आग्नीध्रप्रथमान्व्यादेशानेके समामनन्ति।

आग्नीध्रः प्रथमो येषु व्यादेशेषु ते तथा। इदमग्नीध इदं ब्रह्मण इति क्रमेणेत्यर्थः।

इयँ स्थाल्यमृतस्य पूर्णा सहस्रधार उत्सो अक्षी-
यमाणः। स दाधार पृथिवीमन्तरिक्षं दिवं च
तेनौदनेनातितराणि मृत्युमित्यन्तर्वेद्यन्वाहार्यमा-
सन्नमभिमृशति प्रजापतेर्भागोऽसीति च।

प्रथमे विकृतिषु यथार्थमूहो द्वितीये तु नोहः प्रजापतिभागमात्रत्वेन सर्वत्राभिधानं-संभवात्।

दक्षिणसद्भ्य उपहर्तवा इत्युच्यमाने दक्षिणत एतेत्यृत्विजः संप्रेष्यति।

अध्वर्युणोच्यमाने। ऋत्विग्ग्रहणान्न शमितुः प्रेषणं दक्षिणाभागश्च।

ब्राह्मणा अयं व ओदन इति दक्षिणतः परिक्रा-
न्तेभ्यस्तं चतुर्धा व्युद्धृत्यँ ददाति। एषा ते
अग्ने समित्तया वर्धस्व चाऽऽ च प्यायस्व। वर्धिषी-
महि च वयमा च प्यासिषीमहि। यं ते अग्न आवृ-

---

१ च. सादयं॰। २ क. ग. च. ठ. ण. ॰णं न दं॰। ३ क. ख. ग. च. ट. ठ. ण. ॰त्स पात्रेषु दं॰।

श्राम्यहं वाक्षिपितश्चरन् । प्रजां च तस्य मूलं च नीचैर्देवा निवृश्चत । अग्ने यो नो भिदा सति समानो यश्च निष्ट्यः । इध्मस्येव प्रक्षायतो मा त-स्योच्छेषि किंचन । यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम् । सर्वा॰स्तानग्ने संदह या॰श्चाहं द्वेष्मि ये च मामित्यनूयाजसमिधमाधीयमानाम् ।

अभिमन्त्रयत इति शेषः ।

वेदिर्बर्हिः शृत॰ हविरिध्मः परिधयः स्रुचः । आज्यं यज्ञ ऋचो यजुर्याज्याश्च वषट्काराः सं मे सन्न-तयो नमन्तामिध्मसंनहने हुत इतीध्मसंनहने हुते ।

जपति ।

अङ्गिरसो माऽस्य यज्ञस्य प्रातरनुवाकैरहौषुरित्यनूयाजेषु जपति सप्तहोतारं पुरस्तादनूयाजानामुपरिष्टाद्वा व्याचक्षीत बर्हिषोऽहं देवयज्यया प्रजावान्भूयासमित्येतैरनूयाजाना॰ हुत॰ हुतमनु-मन्त्रयते वाजस्य मा प्रसवेनेति द्वाभ्या॰स्रुचौ व्यूह्यमाने ॥ ९ ॥

अभिमन्त्रयते ।

वसून्देवान्यज्ञेनापिप्रेय॰ रुद्रान्देवान्यज्ञेनापिप्रेयमादित्यान्देवान्य-ज्ञेनापिप्रेयमिति परिधीनज्यमानान्समक्तां बर्हिर्हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः । समिन्द्रेण विश्वेभिर्देवेभिरक्तां दिव्यं नभो गच्छतु यत्स्वाहेति स्रुक्षु प्रस्तरमज्यमानमपिप्रे-ष्यज्ञो यज्ञमयाड्देवा॰ अरंकृतः सोमः । तं मित्रो वरुणो अर्यमा रायस्पोषा यजमानं विशन्त्विति प्रस्तरस्य तृणमपात्तम् ।

अभिमन्त्रयते ।

अग्नेरहमुज्जितिमनूज्जेषमितिसूक्तवाकेन[1] होता[2] यां यां दे[3]वतामभिव्याहरति तां तां यजमानोऽनुमन्त्रयते ।

तां तां यजमानः सन्ननुमन्त्रयते । तथाच यावत्य इष्टा देवतास्ताः सर्वा अपि शाखान्तरीयपाठेनानुमन्त्रयते । तथाचाऽऽह भाष्यकारः—अग्नेरहमिति । यथालिङ्गं देवता अनुमन्त्रयत इति लाघवेन वक्तव्ये यां यां देवतामभिव्याहरति तां तामिति

---

१ क. ख. ग. च. ट. ठ. ण. °ति यां । २ ड. ढ. °के हो° । ३ क. ख. ग. घ. ट. ठ. ण. °वतां होताऽभि° ।

वचनं यस्या यस्या अस्ति होतुरभिव्याहरणं तस्यास्तस्या अनुमन्त्रणं यथा स्यादिति । तेनोपांशुयाजस्याऽऽज्यपानां चासत्यपि तैत्तिरीयकपाठे कार्यमनुमन्त्रणम् । पाठः शाखान्तरीयोऽनुमेयः । केचिदुपांशुयाजाज्यपानां तद्विकाराणां सन्नदेवतानां च न कुर्वन्ति पाठाभावात् । तेषामाचार्यप्रयत्नानर्थक्यं स्यात् । ऐन्द्राग्नस्य निर्वापवदग्नीषोमीयस्य परिदानवत्तेषां शाखान्तरे पाठसद्भाव इति भगवतः सत्याषाढस्याभिप्रायः ।

यर्हि होता यजमानस्य नाम गृह्णीयात्तर्हि ब्रूयादेमा अग्मन्नाशिषो दोहकामा इति ।

यर्हि यदा तर्हि तदा ब्रह्मवर्चसं म आगम्यादित्यन्तः ।

सा मे सत्याऽऽशीर्देवेषु भूयान्मन्यान्मन्यतमाज्जुष्टोज्जुष्टतमादरेडता मनसा तच्छकेयं यज्ञो दिवꣳ रोहतु यज्ञो दिवं गच्छतु यो देवयानः पन्थास्तेन यज्ञो देवाꣳ अप्येत्वित्याशीःषु जपति ।

आशीःषु होत्राऽऽयुराशास्त इत्यादिषूच्यमानासु जपति ।

अदो म आगम्यादिति यत्कामयते तस्य नाम गृह्णाति ।

स्वर्गो माऽऽगम्यादित्यादिना यत्कामयते तस्य कामो यज्ञो माऽऽगम्याद्विष्णुभक्तिर्माऽऽगम्याद्ब्रह्मज्ञानं माऽऽगम्यादिति यद्रोचते तस्य नामानेन प्रकारेण गृह्णीयात् ।

रोहितेन त्वाऽग्निर्देवतां गमयत्वित्येतैः प्रस्तरमवसृष्टम् ।

आहवनीयेऽवसृष्टमनुमन्त्रयते त्रिभिः । इतः परमपि द्वितीयानिर्दिष्टं यद्यग्नौ प्रक्षिप्तं तर्हि तत्रानुमन्त्रयत इत्यनुषञ्जनीयमन्यत्र द्वितीयान्तेऽभिमन्त्रयत इति तथैव भरद्वाजोपदेशात् ।

दिवः खीलोऽवततः पृथिव्या अध्युत्थितः । तेनासहस्रकाण्डेन द्विषन्तं तापयामसि द्विषन्नस्ताप्यतां बहुमानागास्तप्यौषधय इति प्रस्तरस्य तृणमनुप्रहृतम् ।

आहवनीये ।

विष्णोः शंयोरहमिति शंयुवाके ।

जपति । गमेयमित्यन्तः ।

वि ते मुञ्चामि रशना इति द्वाभ्यामग्निं परिधिषु प्रह्रियमाणेषु ।

आहवनीयमभिमन्त्रयते ।

इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिराशीर्वाꣳ अथर्वभिः । तस्य मेष्टस्य वीतस्य द्रविणमागम्याद्वसुर्यज्ञो वसुमा-

---

१ ख. च. ट. ठ. °सं माऽऽग° । २ क. ख. ग ङ. च. ट. ठ. °ष्टाजुष्ट° । ३ क. ग. ङ. छ. भ. ठ. ढ. ण °मारे° । ४ क. ग. च. ट. ठ. ण. °दो माऽऽग° ।

न्यज्ञस्तस्य मा यज्ञस्य वसोर्वसुमतो वस्विहाऽऽगच्छत्वदो म आगच्छत्विति सꣳस्रावभागान्यत्कामयते तस्य नाम गृह्णाति ।

संस्रावाननुमन्त्रयते । अन्यत्पूर्ववत् ।

वेदोऽसि वित्तिरसीतिवेदमन्तर्वेद्यासन्नमभिमृशति ।

आसन्नं कृत्वाऽभिमृशति ।

विदेयेत्यस्य पुरस्तादुपरिष्टाद्वा यद्भ्रातृव्यस्याभिध्यायेत्तस्य नाम गृह्णीयात्तदेवास्य सर्वं वृङ्क्त इति विज्ञायते ॥ १० ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठे याजमानप्रश्ने तृतीयः पटलः ॥ ३ ॥

विदेयेति पदस्य पूर्वं पश्चाद्वा भ्रातृव्यस्य यद्यदभिध्यायेन्ममास्त्विति तस्य नाम गृह्णीयात्तथाऽऽत्मनो व्यावृत्तिं विदेयेति ज्ञेयम् । अर्थवादोऽन्यो विश्वासार्थः ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने तृतीयः पटलः ॥ ३ ॥

अथ षष्ठप्रश्ने चतुर्थः पटलः ।

पत्नीसंयाजेषु सोमस्याहं देवयज्यया सुरेता रेतो धिषीयेति सोमस्य त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयमिति त्वष्टुर्देवानां पत्नीनामहं देवयज्यया प्रजनिषीय प्रजया च पशुभिश्चेति देवपत्नी राकाया अहं देवयज्यया प्रजावान्भूयासमिति राकां सिनीवाल्या अहं देवयज्यया पशुमान्भूयासमिति सिनीवालीं कुह्वा अहं देवयज्यया पुष्टिमान्भूयासमिति कुहूमग्निर्गृहपतिर्यज्ञस्य प्रतिष्ठा तस्याहं देवयज्यया प्रतिष्ठावान्भूयासमित्यग्निं गृहपतिं देवानां पत्नीरग्निर्गृहपतिरिति समस्तानुमन्त्रणमेके समामनन्ति ।

यद्यत्र चत्वार एव पत्नीसंयाजास्तदा समस्तानुमन्त्रणम् । सौम्य(सोम)स्य त्वष्टुरित्युभयत्र हुतमिति ज्ञेयम् । अन्यत्र यद्यपि देवतास्तथाऽपि हुतमिति ।

---

१ क. ख. ग. च. ट. ठ. ण. सौम्यस्य ।

इडाऽस्माननुवस्तान्धृतेन यस्याः पदे पुनते देवयन्तः । वैश्वानरी शक्वरी वावृधा-नोपयज्ञमस्थित वैश्वदेवीत्याज्येडाम् ।

अभिमन्त्रयते ।

या सरस्वती यशोभगीना तस्यै ते स्वाहेति फलीकरणहोमे हूयमाने मुखं विमृष्टे । या सरस्वती वेशभगीना तस्यै ते स्वाहेति हुते मुखं विमृष्टे ।

हस्तेनानुलोमं मार्ष्टि । अग्नयेऽदब्धायवेऽशीततनव इदम् । विश्वेभ्यो देवेभ्य इदम् ।

वेदोऽसि वित्तिरसीति वेदꣳ होत्रा पत्न्यै प्रदीयमानम् ।

अभिमन्त्रयते होत्रा पत्न्यै प्रदीयमानम् । सनेयमित्यन्तः ।

वेदोऽसि वेदसे त्वा वेदो मे विन्देति वा ।

पूर्वस्य विकल्पार्थः ।

घृतवन्तं कुलायिनमिति वेदमुपस्थेऽस्यमानम् ।

पत्न्या उपस्थे क्षिप्यमाणं वेदमभिमन्त्रयते । वाजिनमित्यन्तः ।

वेदोऽसि वेदो म आहर तृप्तस्त्वं तृप्तोऽहं प्रजया पशुभिर्भूयासामिति वा ।

गतम् ।

त्वया वेदिं विविदुः पृथिवीं त्वया यज्ञो जायते विश्वदानिः । अच्छिद्रं यज्ञमन्वेषि विद्वान्त्वया होता संतनोत्यर्धमासानिति वेदꣳ स्तीर्यमाणम्[1] ।

होत्रा गार्हपत्यात् ।

अग्नेऽदब्धायो इति समिष्टयजुः ।

अनुमन्त्रयते । स्वाहान्तो मन्त्रः सकृदेव । समिष्टयजुर्नानात्वेऽप्यन्ते । वातायेदम् । अत्र नानादेवता पदानि श्रूयन्ते तथाऽप्युक्तमाध्वर्यवे तज्ज्ञेयम् ।

दिवः खीलोऽवततः पृथिव्या अध्युत्थितः तेना-सहस्रकाण्डेन द्विषन्तꣳ शोचयामासि द्विषन्मे बहु शोचत्वोषधे मो अहꣳशुचमिति बर्हिरनुप्रहृतम् ।

अनुमन्त्रयते ।

---

१ घ. ङ. ढ. °प्रहृरियमाणम् ।

सं यज्ञपतिराशिषेति ॥ ११ ॥ यजमानभागं प्राश्नाति शृतस्य दध्नश्च ब्राह्मणोऽश्नाति न वैश्यराजन्याविद्ꣳ हविः प्रजननं मे अस्त्विति शृतस्य दधिक्राव्णो अकारिषमिति दध्नः ।

स्पष्टम् ।

अन्तर्वेदि प्रणीतासु मार्जयते ।

उत्तरार्थमिदम् ।

अध्वर्युश्चास्मै संततां धारा स्रावयति सदसि सन्मे भूया इत्यानीयमानासु जपति ।

प्रणीतासु स्राव्यमाणास्वध्वर्युणा ।

प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तामिति प्रतिदिशं व्युत्सिञ्चति समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपिगच्छत । अच्छिद्रः प्रजया भूयासं मा परासेचिमत्पय इति शेषं निनयति ।

प्रणीताशेषं वेद्याम् ।

यदप्सु ते सरस्वति गोष्वश्वेषु यन्मधु । तेन मे वाजिनीवति मुखमङ्ग्धि सरस्वतीति मुखं विमृष्टे ।

हस्तेन ।

अत्र यजमानभागप्राशनमेके समामनन्ति ।

स्पष्टमन्यत् ।

अत एवोपोत्थाय विष्णोः क्रमोऽसीति चतुरो विष्णुक्रमान्क्रामति दक्षिणेन प्रक्रम्य सव्येनानुप्रक्रामति न सव्येन दक्षिणमतिक्रामति नाऽऽहवनीयमतिक्रामत्युत्तरमुत्तरं ज्यायाꣳसं तिष्ठꣳश्चतुर्थं जपति ।

अतो यजमानायतनादेवोत्थाय नान्यत्र स्थितः । दक्षिणपादेनाग्रे प्रक्रम्य सव्येन तदनूत्तरमुत्तरं प्रक्रमणं ज्यायो दीर्घं त्रीण्येव चतुर्थं प्रक्रमणं नास्ति तृतीये प्रक्रमणे तिष्ठंश्चतुर्थं विष्णोः क्रमोऽसि शत्रूयत इति जपति ।

उद्यन्नद्य मित्रमहः सपत्नान्मे अनीनशः । दिवैनान्विद्युता जहि निम्रोचन्नधरान्कृधि । उद्यन्नद्य

विनो भज पिता पुत्रेभ्यो यथा । दीर्घायुत्वस्य
हेशिषे तस्य नो देहि सूर्य । उद्यन्नद्य मित्रमह
आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य हरि-
माणं च नाशय । शुकेषु मे हरिमाणꣳ रोपणाकासु
दध्मसि । अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ।
उदगादयमादित्यो विश्वेन सहसा सह । द्विषन्तं
मम रन्धयन्मो अहं द्विषतो रधम् । यो नः शपाद-
शपतो यश्च नः शपतः शपात् । उषाश्च तस्मै
निम्रुक्च सर्वपापꣳ समूहताम् । यो नः सपत्नो
यो रणो मर्तो भिदासति देवाः । इध्म-
स्येव प्रक्षायतो मा तस्योच्छेषि किंचनेति ॥१२॥
आदित्यमुपतिष्ठतेऽगन्म सुवः सुवरगन्मेति च ।

वेहीत्यन्तः ।

इदमहममुं भ्रातृव्यमाभ्यो दिग्भ्योऽस्यै दिव
इति यं द्वेष्टि तस्य वधं मनसा ध्यायति ।

द्विष्म इत्यन्तः ।

यद्यभिचरेदिदमहममुष्याऽऽमुष्यायणस्य प्राणं नि-
वेष्टयामीति दक्षिणपादस्य पार्ष्ण्या निवेष्टयति ।

अमुष्येति षष्ठ्यन्तं नाम शत्रोर्गृह्णाति । अमुष्यायणस्येति यस्यापत्यं तस्य तद्धिता-न्तम् । अयज्ञसंयुक्तमिदं न यज्ञाङ्गम् ।

ऐन्द्रीमावृतमन्वावर्त इति प्रदक्षिणमावर्तते
पुण्या भवन्तु या लक्ष्मीः पराभवन्तु याः
पापीरिति दक्षिणमꣳसमभिपर्यावर्तते ।

दक्षिणस्कन्धमभिलक्षीकृत्याऽऽवर्तते ।

तेजोऽसीत्याहवनीयमुपपर्यावर्तते ।

प्रसव्यमाहवनीयमुपाभिपर्यावर्तते ।

समहं प्रजयेत्युपतिष्ठते ।

आहवनीयम् । पोष इत्यन्तः ।

समिद्धो अग्न इत्युपसमिन्धे ।

दीद्यासमित्यन्तः ।

वसुमान्यज्ञ इत्युपतिष्ठते ।

भूयासमित्यन्तः ।

अग्ने वह्ने स्वदितुं नस्तनय पितुं पच । विभुश्च शं तोकाय तनुवे स्योन इति दक्षिणाग्निमुपतिष्ठतेऽग्न आयूꣳष्यग्ने पवस्वेत्याग्निपावमानीभ्यां गार्हपत्यमुपतिष्ठतेऽग्ने गृहपत इति च तामाशिषमाशासे तन्तवे ज्योतिष्मतीमित्यजातपुत्रो ब्रूयात् ।

ब्रूयादुच्चैरविद्यमानपुत्रः ।

तामाशिषमाशासेऽमुष्मै ज्योतिष्मतीमिति जातपुत्रः ।

विद्यमानपुत्रः ।

बहुपुत्रः सर्वेषां पुत्राणां नामान्यनुद्रुत्य ज्योतिष्मतीमित्यन्ततो वदति ।

तामाशिषमाशासेऽमुष्मा अमुकशर्मणेऽमुकशर्मणे ज्योतिष्मतीमिति ।

ज्योतिषे तन्तवे त्वाऽसावनु मा ज्योतिषा तन्वित्यन्तराऽग्नी निषीदति ।

ज्योतिषे तन्तवे त्वेत्युक्त्वा नाम गृह्णाति ज्येष्ठस्य संबुद्ध्याऽमुकशर्मन्निति ।

वेदतृणान्युपस्थ आधाय ये देवा यज्ञहन इत्यन्तर्वेद्यासीनो[1]ऽतीमोक्षाञ्जपति ।

अतिमोक्षमन्त्रान् । उपस्थो दक्षिण जानु सव्ये कृत्वा पादयोः पार्ष्णी व्यत्यासेन सक्थ्नोः समीपे नयेदेष उपस्थो गोमुखासनमिति प्रसिद्ध योगशास्त्रे ।

कस्त्वा युनक्ति स त्वा विमुञ्चत्विति यज्ञं विमुञ्चति सर्वमनुवीक्षतेऽग्ने व्रतपते व्रतमचारिषमित्येतैर्व्रतं विसृजते यज्ञो बभूव स आबभूवेति यज्ञस्य पुनरालम्भं जपति गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञ इति प्राङुत्क्रम्य जपति ॥ १३ ॥

प्राचीं दिशमुत्क्रम्य ।

यज्ञ शं च ते यज्ञ नमो नमश्च ते यज्ञ शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्धिमनु संतिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नम इति जपति ।

---

१ क. ख. ग. ङ. च. ट. ठ. ण. °नोऽतिमो° ।

स्पष्टम् ।

तृप्तिरसि तृप्तश्च मे पाप्मानमृतात्सत्यमुपागामप्सु श्रद्धेत्यप उपस्पृश्य यथेतं प्रतिनिष्क्रामति ।

स्पष्टम् ।

ब्राह्मणाꣳस्तर्पयितवा इति संप्रेष्यति ।

बहुवचनादधिकांस्तर्पयति भक्ष्यभोज्यादिपरिवेषणेन । अष्टौ दश वेति वैखानसः । तथा पशौ शतमिति । तर्पयतेति प्रैषोऽध्वर्युं प्रत्यन्य पाकसंस्कर्तारं वा प्रति । आत्मानं प्रत्येवेति राद्धान्तः ।

एवं विहितं प्रवसतोऽपि याजमानम् ।

प्रवासगतस्यापि याजमानं भवत्येव ।

यस्यामस्य[1] दिश्यग्नयो भवन्ति तां दिशमभिमुखो मन्त्राञ्जपति ।

याजमानमन्त्रान् । स्पष्टम् ।

अध्वर्युः कर्माणि करोति ।

यद्यपि न यजमानस्य प्रतिनिधिस्तथाऽपि परार्थे ह्यस्त्येव प्रतिनिधिरतो यान्यन्यार्थानि तानि समन्त्राण्येव कुर्यादध्वर्युः । स्वामित्वप्रयुक्तसंस्कारेषु न प्रतिनिधिरित्येवमुपपादितम् । कर्तृत्वे त्वस्त्येव प्रतिनिधिरिति भावः ।

अन्यान्यभिमर्शनात् ।

अभिमर्शनं वेदेर्हविषां च तद्भिन्नाऽन्यानि, दर्शितमभिमर्शनं जपाङ्गमिति । यद्ययं करणमन्त्रः स्यात्तदाऽध्वर्योरेव समन्त्र कर्म स्यात् । न मन्त्रो जपपूर्वभाव्यङ्गम् । अत एवाभिमृश्य जपतीत्येतद्बलेन व्याख्यातम् । जपस्य वेदिसंस्कारत्वात्तस्मादभिमर्शनस्याङ्गत्वं संस्कारकं जपं प्रत्येव संस्कारस्य यजमानार्थत्वान्नाभिमर्शनं परार्थं किं तु जपस्य पूर्वभाव्यङ्गं तदर्थं सदपि यजमानसंस्कार एव ।

तस्याङ्गभूतस्य लोपेऽपि प्रधानार्थान्मन्त्राञ्जपेदेवेत्याह—

यजमानो मन्त्राञ्जपत्यन्यान्व्यादेशनात् ।

व्यादेशनं चतुर्धाकरणानामिद ब्रह्मण इत्यादि । तदभिमृश्यैवेदमित्यादिकमित्युक्तमेव । तत्राभिमर्शनसद्भावेऽपि तस्य व्यादेशनाङ्गता व्यादेशनं च परार्थमतोऽभिमर्शनमपि कृत्वाऽध्वर्युरेवेदमित्यादिशति करणमन्त्रत्वाभावेऽपि करणमन्त्रवदेव द्रव्यसंस्कारमन्त्राणामपि परार्थत्वादध्वर्युप्रतिनिधित्वमस्त्येव । तेन तान्न यजमानो जपतीत्यर्थः । ब्रह्मन् पिन्वस्वेत्यादिजपोऽपि व्यादेशनाङ्गं ब्राह्मणानामिदꣳ हविरितिलिङ्गात् । ततस्तु व्यादेशनशब्देन तदङ्गमन्त्रजपो लक्ष्यते । सोऽप्यध्वर्युणैव कार्य इत्येवं नाऽऽशङ्कनीयं जपस्य साक्षाद्यजमानसंस्कारत्वात्तेनैव कार्यः । ओं निर्वपेत्यस्य स्थानेऽग्ने हविर्नि-

---

१ क. ख. ग. च. ट. ठ. ण. यस्यां दिश्यस्याम॰ ।

र्वप्स्यामीत्युक्तमेव । युष्मदर्थं प्रत्यादेशो दक्षिणत एतेति ब्राह्मणा अयं व ओदन इति चाध्वर्युरेव भूपते भुवनपत इति ब्रह्मवरणमध्वर्युणा समन्त्रं कार्यं न तत्र जप इत्यर्थः । ओं निर्वपेत्यपि । आदेशनमन्त्रादन्यान्मन्त्रानित्यर्थः । स्पष्टीकृतं भाष्यकृता—अध्वर्युणा कर्तव्यानि । तानि वक्ष्यामः । ब्रह्मवरणम् । अग्ने हविः । इदं ब्रह्मण इति व्यादेशनम् । दक्षिणत एत ब्राह्मणा अयं व ओदन इति दानमन्त्रः । ब्राह्मणाँस्तर्पयितवा इति प्रैषश्च । आत्मानं प्रत्यपि परार्थत्वात् । अथामन्त्रकाण्यध्वर्युकर्तव्यानि । प्रस्तरधारणम् । इडारम्भः । इडाप्राशनम् । प्रतिदिशं व्यूहनं च । प्रणीतासु मार्जनं समिन्धनं च । अथ प्रवसता यजमानेन सर्वे मन्त्रा जपितव्याः प्रयोगक्रमेण । अध्वर्युकृतानि याजमानानि वर्जयित्वा । यथा ब्रह्मवरणम् । ओं निर्वपेत्यादि । अध्वर्युवर्ज्यानि । यजमान वाचं यच्छ । यजमान हविर्निर्वप्स्यामि । वर्षतु ते पर्जन्य इत्येतानि । एतयोरपि यजमानं स्मृत्वा जप इत्येव न्याय्यम् । अन्या-ऽव्यादेशनादित्यभिधानात्प्रतिदिशं व्यूहनमध्वर्युः । जपो याजमानं ब्रह्मेति व्यादेशनं समन्त्रमेवेदं ब्रह्मण इत्यादिकमध्वर्योः । अन्यथा सूत्रविरोधः स्यात् ।

एवं विहितमिष्टिपशुबन्धानां याजमानम् ।

एवं विकृतेष्टिषु[1] निरूढादिपशुबन्धेषु चेदमेव वैशेषिकं तत्र तत्रैवोक्तम् ।

यथाविकारमनुमन्त्रणाः ।

अग्नेरहं देवयज्ययेति यद्यपि देवतामात्रं श्रूयते तथाऽपि तस्य हुतस्यानुमन्त्रणमित्यु-क्तमेव । हविष एव विकारेणानुमन्त्रणमन्त्रा ज्ञेया नतु द्विदेवतस्य द्विदेवत एकदेवतस्यै-कदेवत्य इति, इन्द्रस्य चेन्द्रियावीति किंतु हविःसामान्यात् । अनुमन्त्रणमन्त्रो यो यस्य हविषो विकारस्तस्य तस्य तेनाविकृतेनोहितेन वा ।

अपवादमाह—

इन्द्रस्य वैमृधस्याहं देवयज्ययाऽसपत्नो भूयासꣳ सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयं पूष्णोऽहं देवयज्यया पुष्टिमान्पशुमान्भूयासमदित्या अहं देवयज्यया प्रजानिषीय प्रजया च पशुभिश्च द्यावापृथिव्योरहं देवयज्ययोभयोर्लोकयोर्ऋध्यासं भू-मानं प्रतिष्ठां गमेयमर्यम्णोऽहं देवयज्यया स्वर्गं लोकं पुषेयं विश्वेषां देवानामहं देवयज्यया प्राणैः सायु-ज्यं गमेयमिन्द्रस्येन्द्रियावतोऽहं देवयज्ययेन्द्रियावी

---

१ च. °कृतीष्टि° ।

पशुमान्भूयासमिन्द्रस्य त्रातुरहं देवयज्यया त्रातो भूयासमिति प्रत्यक्षाम्नाता अनुमन्त्रणाः ॥ १४ ॥

इति हिरण्यकेशिसूत्रे षष्ठे याजमानप्रश्ने चतुर्थः पटलः ॥ ४ ॥

एतेषु हविःषु प्रकृतितोऽतिदेशेन प्राप्ता अनुमन्त्रणमन्त्रास्तेषामनारभ्य प्रत्यक्षवचनैः प्राप्तैर्बाधः । एते मन्त्रा लिङ्गेन यत्र यत्र यस्य प्रतिपाद्या देवता तत्र हविषि पुरोडाशे चरावामिक्षायां वा प्राप्नुवन्ति । न तु विकारेष्वन्यदेवताकेषु तेषु दर्शपूर्णमासाभ्यामेवातिदेशात् । निरूपितमेतत् ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने चतुर्थः पटलः ॥ ४ ॥

अथ षष्ठप्रश्ने पञ्चमः पटलः ।

अग्न्याधेयस्य याजमानं व्याख्यास्यामः ।

स्पष्टम् ।

पुरस्ताद्ब्राह्मौदनिकात्केशश्मश्रूणि वापयते नखानि निकृन्तते दतो धावते स्नात्यहतं वासः परिधत्ते ।

प्रथमब्रह्मौदनात्पूर्वं स्पष्टमन्यत् ।

ब्रह्मौदनं प्राशितवद्भ्यो वरं ददाति ।

परोऽनाढ्यस्य गुञ्जाद्वयं सुवर्णमृत्विग्भ्यः ।

आहितासु समित्सु मिथुनावसिक्तरेतसौ ददाति ।

अभ्यन्याऽऽहितासु तेभ्य एव स्त्रीपुंसौ पूर्वमसिक्तमगतं रेतो ययोस्तादृशौ गावौ ददाति ।

न प्रयाति न प्रवसति ।

सगृहो न प्रयाति विना गृहेण प्रवासस्तमपि न करोति ।

नास्याग्निं गृहाद्धरन्ति ।

अस्य यजमानस्य गृहादन्ये नाग्निं नयन्ति ।

अन्यतश्च नाऽऽहरन्ति ।

तदीया अन्यतोऽपि नाऽऽनयन्ति । लौकिकाग्निप्रतिषेधोऽन्यस्य तु हरणं न प्राप्तमेव ।

शिल्पैरेताꣳ रात्रिं जागर्ति ।

एतां रात्रिं यस्यामभ्योदिते सूर्य आहवनीयमाधास्यन्भवति । शिल्पैर्वीणावेणुमृदङ्गादिभिर्निद्रामतिवाहयति ।

शल्कैरग्निमिन्धान उभौ लोकौ सनेम-
हम्। उभयोर्लोकयोर्ऋद्ध्वाऽतिमृत्युं तरा-
म्यहमिति शल्कैस्ताꣳ रात्रिमग्निमिन्धे।

ब्राह्मौदनिकमग्निं शल्कैः काष्ठतक्षणैर्दीप्तं करोति। सकृन्मन्त्रस्तूष्णीमनन्तरं, रात्रिमिति कालाध्वनोरत्यन्तसंयोग इति वचनात्संततम्।

मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयीणाम्। अन्तर्वत्नी जन्यं जातवेदसमध्वराणां जनयथः पुरोगामीत्यरणी प्रदीयमाने प्रतीक्षत आरोहतं दशतꣳ शक्करीममर्तेनाग्र आयुषा वर्चसा सह। ज्योग्जीवन्त उत्तरामुत्तराꣳ समां दर्शमहं पूर्णमासं यज्ञं यथा यजा इति प्रतिगृह्णात्यृतिवयवती स्थो अग्निरेतसौ गर्भं दधाथां ते वामहं ददे तत्सत्यं यद्वीरं बिभृथो वीरं जनयिष्यथः। ते मत्प्रातः प्रजनयिष्येथे ते मा प्रजाते प्रजनयिष्यथः। प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोक इति प्रतिगृह्याभिमन्त्रयते।

सकृदेव पूर्वे मन्त्राः।

आत्मन्नग्निं गृह्णीते यथाऽध्वर्युरिदमहमनृतात्सत्यमुपैमि सत्यान्मानुषमुपैमि मानुषाद्दैव्यमुपैमि दैवीं वाचं यच्छामीति वाचं यच्छति प्रजापतेस्त्वा प्राणेनाभि प्राणिमि पूष्णः पोषेण मह्यम्। दीर्घायुत्वाय शतशारदाय शतꣳ शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्यायेति जातमभिप्राणित्यहं त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेद इति जातमभिमन्त्र्य वरं ददाति।

जातमग्निमभि उपरि नासया श्वासं मुञ्चति।

वाचं विसृजतेऽत्र क्षौमे वाससी परिदधाते यजमानः पत्नी च।

परिदधाते इति द्विवचनेन याजमाने दंपत्योरेव ग्रहणे पुनर्निर्देशो यजमानद्वित्वशङ्कानिवृत्त्यर्थः।

ते अपवृत्तेऽग्न्याधेयेऽध्वर्यवे दत्तो याभ्यां याभ्यां व्याहृतिभ्यां येन येन यथर्ग्याधानेन याभ्यां

याभ्या५ सार्पराज्ञीभ्यां येन येन च घर्मशिरसा
दधाति सर्वत्र तेन तेनोपातिष्ठते ॥ १९ ॥

स्पष्टम् ।

सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीः श्रेयसी-
र्दधत् । अग्ने सपत्ना५ अपबाधमानो रायस्पोष-
मिषमूर्जमस्मासु धेहीत्याहितं गार्हपत्यमुपतिष्ठत
इमा उ मामुपतिष्ठन्तु राय आभिः प्रजाभिरिह
संवसेय । इहो इडा तिष्ठतु विश्वरूपी मध्ये
वसोर्दीदिहि जातवेद इति मध्यदेशे ह्रियमा-
णमभिमन्त्रयते समयार्धे वरं ददात्यानशे व्या-
नशे सर्वमायुर्व्यानश इत्याहितमाहवनीयमुपतिष्ठते ।

समयार्धेऽर्धोदिते सूर्ये वरं ददाति ।

ये ते अग्ने शिवे तनुवौ विराट्च स्वराट्च ते मा
विशतां ते मा जिन्वतां ये ते अग्ने शिवे तनुवौ
सम्राट्चाभिभूश्च ते मा विशतां ते मा जिन्वतां ये
ते अग्ने शिवे तनुवौ विभूश्च परिभूश्च ते मा विशतां
ते मा जिन्वतां ये ते अग्ने शिवे तनुवौ प्रभ्वी च
प्रभूतिश्च ते मा विशतां ते मा जिन्वतां यास्ते अग्ने
शिवास्तनुवस्ताभिस्त्वा दध इति शिवाभिस्तनू-
भिराहितमाहवनीयमुपतिष्ठते स्निक्च स्नीहितिश्च
स्निहितिश्च सदाम्नी चामतिश्चानाहुतिश्च निर्ऋ-
तिरेतास्ते अग्ने घोरास्तनुवोऽमर्त्या मर्त्यस्तान्ग-
च्छन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति
पुरस्तात्पूर्णाहुतेर्घोराभिरुपतिष्ठते पूर्णाहुतौ वरं
ददात्युपरिष्टात्पूर्णाहुतेः शिवाभिरुपस्थानम् ।

ये ते अग्ने शिवे तनुवावित्याद्युक्ताभिः पुनः ।

विराजक्रमैरुपतिष्ठतेऽथर्वपितुं मे गोपायास्मै प्राणेन
संमितम् । त्वया गुप्ता इषमूर्जं मदन्तः शतं
जीवेम शरदः सवीरा इति दक्षिणाग्निं नर्य प्रजां
मे गोपाय मूलं लोकस्य संततिम् । आत्मनो

हृदयाग्निर्मितां तां ते परिददाम्यहमिति गार्ह-
पत्य१ँ शँ१स्य पशून्मे गोपाय विश्वरूपं धनं वसु ।
गृहाणां पुष्टिमानन्दं ताँ१स्ते परिददाम्यहमित्याह-
वनीय१ँ सप्रथसभां मे गोपायेन्द्रियं भूतिवर्धनम् ।
विश्वजनस्य छायां तां ते परिददाम्यहमिति स प्रथ
सभां मे गोपाय ये च सभ्याः सभासदः । तानि-
न्द्रियावतः कुरु सर्वमायुरुपासतामिति सभ्यमहे
बुध्निय मन्त्रं मे गोपाय श्रियं च यशसा सह । अहये
बुध्नियाय मन्त्रं श्रियै यशः परिददाम्यहमित्याव-
सथ्यं पञ्चधाऽग्नीन्व्यक्रामद्विराट्सृष्टा प्रजापतेः ।
ऊर्ध्वारोहद्रोहिणी योनिरग्नेः प्रतिष्ठितिरिति सर्वान् ।

अग्नीन्सकृत् । स्वशाखाविराजक्रमाणामेतैर्विकल्पः ।

यत्रास्मै ॥ १६ ॥ शतमक्षान्प्रयच्छति तेषु कृतं
विजित्य सभासद्भ्यः प्रयच्छति ते यजयन्ति
तदुभयमन्न१ँ सँ१स्कृत्य ब्राह्मणान्भोजयति ।

व्याख्यातमेतदाधान एव ।

आग्नेयस्य दक्षिणाकालेऽजं पूर्णपात्रमुपबर्हण१ँ
सार्वसूत्रमश्व१ँ रथं वासः षड्गा द्वादश चतुर्वि१ँ-
शतिरपरिमिता वर्धमाना ददाति तासां धेनुरन-
ड्वान्मिथुनौ चाऽऽदिष्टरूपाण्यजं पूर्णपात्रमुपबर्हणं
चाग्नीधे ददात्यश्वं ब्रह्मणे धेनु१ँ होत्रे गार्हप-
त्यदेशेऽनड्वाहमाहवनीयदेशेऽध्वर्यवे शेषः साधा-
रणस्त्रि१ँशन्माने पूर्वयोः पवमानेहविषोर्हिरण्ये द-
क्षिणां ददाति चत्वारि१ँशन्मानमुत्तमे धेनुमादित्ये ।

व्याख्यातमेतदाधनान्त एव ।

आधानप्रभृति यावज्जीवं नानृतं वदेत् ।

अत्र भाष्यकारः शब्दानृतमर्थानृतं च शब्दानृते सारस्वतीष्टिर्भगवता पतञ्जलि-
नोक्ता । अर्थानृते व्रातपत्येन । आचमनव्याहृतिजपविष्णुस्मरणानि सर्वत्र समुच्ची-
यन्ते च ।

---

१ घ. ङ. ञ. °नयोर्हि° ।

नास्य ब्राह्मणोऽनाश्वान्गृहे वसेत् ।

अकृतभोजनो ब्राह्मणोऽस्याऽऽहिताग्नेर्गृहे न वसेदिति यथा स्यात्तथाऽऽहिताग्निः कुर्यात्तस्यैव व्रतं यावज्जीवमित्यनुवर्तते न ब्राह्मणस्य । तस्माद्वसत्यर्थं ब्राह्मण आगते तस्य सत्यां भोजनेच्छायामन्नं दद्यादेव तदभावेऽन्यत्क्षुन्निवारकं दद्यात्तदसंभवे तु भाष्यकारेणोक्तं व्याहृतिजपो ब्राह्मणभोजनं चेति वाधूल इति ।

सूर्योढमतिथिं वसत्यै नापरुन्ध्यात् ।

अस्तमितसूर्यमतिथिं पूर्वं यस्य स्थितिर्नास्ति सोऽतिथिः । कश्चनापि यदि वासार्थं प्राप्तोऽस्यापरोधं निवारणं न कार्यं निवासार्थं स्थलं यथायोग्यं दातव्यमेवेत्यर्थः । अत्रापि वाधूलोक्तमेवाकरणे प्रायश्चित्तम् ।

न नक्तमन्यत्रान्नाद्दद्यात् ।

अन्नादन्यन्नक्तं रात्रौ न दद्यात् । हिरण्यधान्यादि गवादि च न रात्रौ दद्यात्परस्वत्वापादनं न कुर्यात् । ग्रहोपरागादौ पुण्यकाले रात्रौ संकल्प्य श्वोभूते पात्रसात्कुर्यादिति गम्यते । केचित्तु दानमात्रस्यापि प्रतिषेधं व्याचक्षते । अत्राग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्व्रत्यमिव चरेदेतदेव प्रायश्चित्तमुक्तमापदि स्वाहुतिरिति ।

अन्नं रात्रौ देयमित्युक्तं तत्राप्याह—

अन्नं दद्नक्तमदयीत ।

दीयमानमप्यन्नं नक्तं गृह एवादयीत भोजयेत् । न बहिर्नेतुं दद्यात् । अदयीतेति पाठोऽनेकसूत्रगतो व्याख्यातो मया भाष्यकृता तु न दयीतेति पाठो व्याकृतः । दय दाने परस्वत्वापादनं दानं तेन लक्षितं गृहाद्बहिर्नयनं तन्न कुर्यादित्यभिप्रायेण व्याख्यातं स एवार्थो यस्त्वदयीतेति पाठोक्तः ।

नर्बीषपक्वस्याश्नीयात् ।

गर्तादौ स्थापितं फलादिकमुपरिष्टाद्व्यवधानेनाग्निना पक्वं यत्तदृबीषपक्वं तन्नाश्नीयादित्येके व्याचक्षते । निरुक्ताभिप्रायेणान्ये व्याचक्षते । निरुक्ते हि पृथिवीवचनो निरुक्त ऋब्बीषशब्दः षकारोपधोऽयं तैत्तिरीयसूत्रकारैः पठ्यते । कात्यायनेन तु सकारोपधस्तत्रोभयोरपि पृथिव्येव वाच्या तया पक्वस्तद्गतेनाग्निनोष्मणेति यावत्तथा च योऽयमृबीसः पृथिव्यामग्निरिति, भाष्यकारेण तु पाठ ऋजीषपक्वस्येत्युपलब्धो व्याख्यात ऋजीषमुद्धृतसारं तक्रपिण्यादि तन्नाश्नीयादिति । ऋबीषमित्ययं पाठस्तैत्तिरीयकसूत्रेषु सर्वत्रास्मत्सूत्रे च दृश्यते युक्तश्च । नहि किंचिदृजीषेण पच्यते तेनापि कर्मधारय ऋजीषशब्दात्पक्वशब्दस्य पूर्वनिपातः स्यात्तस्मादृबीषमित्येवायं पाठश्च ।

या अन्तर्नाव्या आपस्तासां नाश्नीयात् ।

नावि नौकायामन्तर्भवाः स्थापिता वा पतिता वा छिद्रैः प्रविष्टा वा तासां प्राशनं न कुर्यात् । पात्रान्तरव्यवधानस्थितानां न दोषः । आपस्तम्बोऽन्तर्नाव्यपां नाश्नीयादित्याह । नावि स्थित्वेति चार्थः संभवति । अतो नाव्यानामपां नाश्नीयादन्तश्चापां नाश्नीयादर्थान्नाव्यन्तरपि किमप्युदकं न प्राश्नीयादित्यर्थः ।

रजतꣳ हिरण्यं बर्हिषि न दद्यात् ।

यत्र हिरण्यं देयत्वेनोक्तं गवादिप्रत्याम्नायत्वेन वा प्राप्तं तत्र रजतं न देयं किंतु सुवर्णमेवेत्यर्थः । बर्हिषि यज्ञे श्रौते कर्मणीति यावत् ।

क्लिन्नं दारु नाभ्यादध्यादभ्यादध्याद्वा ।

अग्नाविति शेषः । क्लिन्नमुदकेन । अभ्यादध्याच्च तदन्यस्यालाभ इति व्याख्येयमन्यथा सूत्रद्वयमनर्थकमेव स्यात् ।

स्वकृत इरिणे प्रदरे वा नावस्येत् ।

स्वभावोखरे देशे नावस्येदवसानमवस्थानं न कुर्यात् । प्रदरो भूमिगर्तस्तत्रापि ।

हिंकृत्य वाग्यतः स्त्रियं संभवेत् ।

हिमिति कृत्वा पश्चात्स्त्रियं गच्छेत् ।

व्याहरेद्वा ।

न व्याहरेद्वेत्यर्थः ।

नैतस्मिन्संवत्सरे पशुनाऽनिष्ट्वाऽनादिष्टो माꣳसं भक्षयेत् ।

रागतः प्राप्ते मांसभक्षणे निरूढेनाग्नेयपशुना वाऽनिष्ट्वा नैतस्मिन्संवत्सरे मांसं भक्षयेत् । आदिष्टो भक्षयेदपि ।

यदि भक्षयेन्मनसाऽग्निभ्यः प्रहिणोमि भक्षं मम वाचा तं सह भक्षयन्तु । अप्रमायन्नमप्रमत्तश्चरामि शिवेन मनसा सह भक्षयतेत्युक्त्वाऽऽदिष्टो भक्षयति ।

ब्राह्मणैरादिष्टो भक्षयेदनिष्ट्वाऽपि पशुना ।

द्वादशरात्रमजस्रेष्वग्निष्वाज्येन स्वयमग्निहोत्रं जुहोति ।

रात्रिशब्दोऽहोरात्रे प्रयुज्यते । अत्राऽऽरम्भविधिस्त्वाध्वर्यव एवोक्तस्तथा कृत्वाऽऽरम्भप्रभृति द्वादशरात्रं सायंप्रातश्चतुर्विंशतिहोमानाज्येन स्वयमग्निहोत्रं जुहोति । अजस्रता तु विधेया द्वादश दिनानि ।

अतमाह—

अहतं वासो वस्ते ।

द्वादशरात्रमहतमप्रच्छिन्नाग्रमरजकधौतमहतम् ।

काममन्यो जुहुयात् ।

स्वयमित्यस्य विकल्पः ।

व्रतचारी त्वेव स्यात् ।

न मांसमश्नीयान्न स्त्रियमुपेयादित्यर्थः ।

स्वयं त्रयोदशीं जुहोति ।

स्वयमेवेत्यर्थः । त्रयोदशीं रात्रिं पयसेति यावत् ।

यां प्रथमामग्निहोत्राय दुहन्ति साऽग्निहोत्रस्य दक्षिणा ।

त्रयोदश्यामाग्निहोत्राय यां गां दुहन्ति तां गां दद्यात् । पूर्वं यद्यन्यो जुहुयात्तस्मै । अथवाऽऽरम्भेऽग्निहोत्रस्य वाऽध्वर्युस्तस्मै । भाष्ये तु आधानादूर्ध्वं द्वादशाहमाश्वपदिकधारणमिति बौधायनाश्वलानयोरिष्टम् । द्वादशाहमाश्वपदिकमाग्निं धारयेदिति श्रुतेः । केचित्पवमानेष्टेः परं द्वादशाहमिति व्याचक्षते तदन्तत्वादग्निसिद्धेः । शाट्यायनके द्वादशाहधारणं स्वयंहोमाज्यहोमाश्च श्रुता इति सत्याषाढेनाऽऽचार्येण होमः प्रधानमेवोपदिष्टम् । अतोऽग्निहोत्रोपक्रमात्परमिति । मध्येऽन्वारम्भणीयाप्राप्तौ तेष्वेवाग्निषु कार्या पौर्णमासी च । केचित्तु यत्र द्वादशाहावकाशस्तत्र धारणमेव । यत्राल्पोऽवकाशो नक्षत्राधानादौ तत्राऽऽरम्भणीयायां न धारणम् । पौर्णमास्याधानेऽवकाशाभावान्न धारणमिति वर्णयन्ति । तदयुक्तम् । संकोचे कारणाभावात् । स्यादेतत् । सेष्टपवृज्येति वचनं संकोचकमिति । न तस्य सांवत्सरादिकल्पव्यावृत्तिपरत्वात् । सोमाधानेनाजस्रा इति भारद्वाजः । अस्माकमजस्रधारणस्य होमप्रधानत्वादुदवसानीयायां तदूर्ध्वं द्वादशाहधारणम् । आश्वपदिक एव होमा इतरेषामजस्रत्वादजस्र इति वक्तव्ये[२] बहुवचननिर्देशस्य प्रयोजनं पक्षहोमसमारोपणनिषेधो होमप्रधानत्वादेव । द्वितीयाधाने नाजस्रादिधर्माः । प्रोषिते यजमाने सर्वप्रायश्चित्तं कृत्वाऽजस्रेष्वेवाऽऽज्यहोमः कर्तव्यः । द्वादशाहात्परं प्रणयनं च । केचित्प्रत्यागते प्रातर्भूतिं चेच्छन्ति । तेषां तदहः प्रायश्चित्तं त्रयोदश्यां प्रातर्हुत्वाऽग्नित्यागः । अहा० स्ते । वाम० होति । अत्राप्यजस्रत्वमाज्यहोमश्च । यां प्र० क्षिणा । अध्वर्यवे देया प्रथममिति वचनात् । प्रथमहोमः पयसा । ततः परमाज्येन । अथवा द्वादशाहादूर्ध्वं यः सायंहोमः स पयसा प्राथम्यस्यापेक्षितत्वात् । मिथु० दाति । अग्निहोत्रदर्शपूर्णमासयोर्यथाकालप्रारम्भे पवमानेष्टि-

१ क. ग. च. ट. ड. मामि' । २ च. 'नेषु ना° । ३ ख. ठ. °भृतं चे° ।

रिति वाधूलः । अनन्तरे मुख्यकाल एवाऽऽरम्भः । उभा० दक्षिणा । परिवा० ब्राह्मणम् । अनड्वान्दक्षिणेति श्रुत्यन्तरमिति भाष्यग्रन्थः ।

मिथुनौ गावावन्वारम्भणीयायां ददात्युभयीः पुनराधेय अग्न्याधेयिकीर्दत्त्वा पौनराधेयिकीर्ददाति पुनर्निष्कृतो रथः पुनरुत्स्यूतं वासः पुनरुत्सृष्टोऽनड्वाञ्शतमानं च हिरण्यं पुनराधेयस्य दक्षिणाऽपि वा पौनराधेयिकीरेव दद्यादिति पैङ्ग्यब्राह्मणम् ॥ १७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठप्रश्ने पञ्चमः पटलः ॥ ५ ॥

पुनरित्यादि बौधायनेन व्याख्यातम् । पुनर्निष्कृतो रथो दक्षिणेति पुनःसंस्कृत एषां भवति पुनरुत्स्यूतं वासः पुनःसंस्कृतमेव तत् । पुनरुत्सृष्टोऽनड्वानित्यत्रशीर्ण एवैष उक्तो भवति । अत्राऽऽहानुग्रहमापस्तम्बः—यदीतराणि न विद्येरन्नप्यनड्वाहमेव प्रदद्यादनडुहि ह वा एते कामा अतश्च भूयांस इति पैङ्गायनिब्राह्मणमितीति ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने पञ्चमः पटलः ॥ ५ ॥

अथ षष्ठप्रश्ने षष्ठः पटलः ।

अग्न्याधेयः समाप्तः ।

अग्निहोत्रस्य याजमानं व्याख्यास्यामः स्वयमिध्ममाहरन् ।

अन्येनाऽऽहृतमपि विहारं प्रत्यानयति स्वयमेव ।

विश्वदानीमाभरन्तोऽनातुरेण मनसा । अग्ने मा ते प्रतिवेशा रिषामेति विहारमभ्येति ।

स्पष्टम्[1] ।

यदग्ने यानि कानि चेति प्रतिमन्त्रमाहवनीये वर्षिष्ठमिध्ममादधाति[2] ।

आहवनीये वर्षिष्ठमन्येषु ततोऽल्पीयांसमल्पीयांसमिध्ममादधाति प्रत्यृचमेकैकस्मिन् ।

उद्धरेत्युद्ध्रियमाणमभिमन्त्रयते[3] ।

स्वयंहोमेऽनुमन्त्रणमन्यं प्रति प्रैषः प्रेषित उद्धरतीत्याध्वर्यव उक्तत्वात् । अत्रोद्धर-

---

१ घ. एष । २ क. ख. ग. ङ. ञ. ञ. ट. ट. 'ष्ठमा' । ३ क. ख. ग. ट. ठ. ण. °मनुम° ।

णानन्तरमिध्माधाने वक्तव्ये द्वादशरात्रमजस्रेष्वाग्निहोत्रं जुहोतीति विधानमेव पूर्वमुक्तं [तेन]त्रयोदशीमारभ्योद्धृत आधानमिध्माधानमर्थात्सिध्यतीति दर्शितम्।

उद्धरणप्रभृति नाश्नीयादाहोमाद्विद्युदसीत्यप उपस्पृश्यापरेणाऽऽहवनीयं दक्षिणाऽतिक्रम्य दक्षिणत उपविशति पत्नी पत्न्या लोक इडाऽसि व्रतभृदहं नावुभयोर्व्रतं चरिष्याम्यादित्य व्रतभृदहं नावुभयोर्व्रतं चरिष्यामि सुरूपेऽहं नावुभयोर्व्रतं चरिष्यामीड एहि मयि श्रयस्वेति यदग्निहोत्र्यां व्रतं तदात्मन्कुरुते।

अग्निहोत्र्यां गवि व्रतं तृणपर्णादि भु(उ)क्तं तदात्मनि भावयेत्।

श्रद्ध एहि सत्येन त्वाऽऽह्वयामीत्याहूयमानामियमासि तस्यास्तेऽग्निर्वत्सः सा मे स्वर्गं च लोकमुभयं च धुक्ष्वेति दुह्यमानामोमुन्नेष्याम्युन्नयामीति वोच्यमाने हविर्देवानामसि मृत्योर्मेऽभयꣳ स्वस्ति मेऽस्त्वभयं मे अस्त्वित्युपांꣳशूक्त्वोमुन्नयेत्युच्चैः प्रत्याहोन्नीयमाने तिष्ठति न चंक्रम्यते वाचं यच्छत्याहोमादुन्नीत उपविशति।

अग्नय इ० ओषधीभ्य इ० प्रजापतय इ० प्रातः सूर्यायेदं०।

उत्तरामाहुतिमुपोत्थाय कवातिर्यङ्ङिव।

ईषत्प्राङ्मुख आहवनीयाभिमुखश्चेषत्कवातिर्यङ्ङिव।

आहवनीयमुपतिष्ठते सर्वैरुपस्थानैः।

यावन्त्युपस्थानानि वैकल्पिकानि तैः सर्वैरनादेश आहवनीयमेव। उत्तरामाहुतिमित्यविशेषविधानादुभयकालमप्यनादेशे।

उपप्रयन्तो अध्वरमिति षड्भिस्तासामग्नीषोमीयया पूर्वपक्ष उपतिष्ठतैन्द्राग्न्याऽपरपक्षे।

तासां मध्येऽयं ते योनिरित्येतस्याः पूर्वमग्नीषोमीया यथापाठमैन्द्राग्न्या।

अग्नीषोमाविमꣳ सुम इत्यग्नीषोमीयोभा वामिन्द्राग्नी इत्यैन्द्राग्नी तयोः।

तयोर्मध्ये पूर्वमुक्तयोरग्नीषोमीययैन्द्राग्न्येति अयं ते योनिरिति षष्ठ्योपस्थायेत्यर्थः।

---

१ ख च झ. म. ठ. ड. पत्न्या। २ क. ग. ङ. च. झ. ञ. ट. ठ. ड. °ति चोच्य°।

परस्ताद्विहव्यस्याऽऽदितश्चतसृभिरुपतिष्ठते ।

ममाग्न इत्येताभिरभिवोचता म इत्यन्ताभिः ।

तासामुपरिष्टादग्न आयूꣳषि पवस इति षड्भिराग्निपावमानीभिः ।

आहवनीयमेव । एताभिरेव पुनः संवत्सरे ।

संवत्सरे गार्हपत्यमुपतिष्ठत आयुर्दा अग्नेऽ-
स्यायुर्मे देहीति चतुर्भिराहवनीयं चित्रावसो
स्वस्ति ते पारमशीयेति द्विरावर्तयत्यसौ
स्वस्ति तेऽस्त्वसौ स्वस्ति तेऽस्त्विति सर्वेषां
पुत्राणां नामानि गृह्णाति द्विर्द्विरेकैकस्य ।

यज्ञशर्मन्स्वस्ति तेऽस्तु द्विः ।

अग्नेः समिदस्यभिशस्त्या मा पाहि सोमस्य
समिदसि परस्या म एहि यमस्य समिदसि
मृत्योर्मा पाहीत्येतैस्तिस्रः समिध आदध्या-
दिन्धानास्त्वा शतꣳ हिमा इति चतुर्थीम् ।

प्रत्यग्नि ।

वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तो अशी-
महीति मुखं विमृष्टे सं त्वमग्ने सूर्यस्य वर्चसा गथा इति च ।

पुनः ।

संपश्यामि प्रजा अहमिति ॥ १८ ॥ मनुष्यानुपतिष्ठतेऽ-
म्भस्थाम्भो वो भक्षीयेति पशून्रेवती रमध्वमित्यन्त-
राऽग्नी तिष्ठन्नुपति सꣳहिताऽसि विश्वरूपीरिति गामा-
लभते वत्सं वोप त्वाऽग्ने दिवे दिव इति षड्भिर्गायत्री-
भिर्द्विपदाभिर्गार्हपत्यमुपतिष्ठत ऊर्जा वः पश्याम्यूर्जा मा
पश्यतेति गोष्ठं भुवनमसि सहस्रपोषं पुषिसहस्रपोषस्ये-
शिषे तस्यास्ते भूयिष्ठभाजो भूयास्मेति पुनरेव गामालभते
वत्सं वा महित्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः[2] ।
दुराधर्षं वरुणस्य । नहि तेषाममा चन नाध्वसु वारणेषु ।
ईशे रिपुरघशꣳसः । ते हि पुत्रासो अदितेः शर्म यच्छन्त्व-
जस्रम् । प्रदाशुषे वार्याणीति माहित्रेण तृचेनोपतिष्ठते

१ व. इत्यादिभि° । २ घ. ङ. ट. ड. °णेभ्या । ई° ।

तत्सवितुर्वरेण्यमिति सावित्र्या सोमानꣳ स्वरणमित्येषा सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः । यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः । मा नः शꣳसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पत इति ब्राह्मणस्पत्याभिरु- पतिष्ठते कदाचन स्तरीरसि कदाचन प्रयुच्छसीति द्वे परि त्वाऽग्ने पुरं वयमित्येषा परि ते दूढभो रथोऽस्माꣳ अश्नोतु विश्वतः । येन रक्षसि दाशुष इति पर्यावर्त्यान्तत उपतिष्ठते ।

पर्यावर्त्य परि त्वाऽग्न इति पूर्वपठितया विपरीत इत्यस्या अनन्तरमुपतिष्ठेत तथा शाखान्तरे पाठात् ।

यथादर्शिते पाठेऽपि प्रमाणमाह—

दूढभवतीमुत्तमामेके समामनन्ति निमृदोऽसि न्यहं तं मृधासं योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति पुरस्तात्प्रपदे- नावगृह्णीयाद्यदि श्रेयसा स्पर्धेत प्रभूरसि प्राहं तमभिभूयासं योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणतः पदोऽव- गृह्णीयाद्यदि सदृशेन स्पर्धेताभिभूरस्यभ्यहं तमभिभूयासं योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति पश्चात्पार्ष्ण्याऽवगृह्णी- याद्यदि पापीयसा स्पर्धेत ॥ १९ ॥ पूषा मा पशुपाः पातु पूषा मा पथिपाः पातु पूषा माऽधिपाः पातु पूषा माऽधिपतिः पात्विति जपित्वा प्राची दिगग्निर्देवता यो मैतस्यै दिशो भिदासादग्निꣳ स ऋच्छत्वग्निर्मे तस्यै दिशो गोपायतु दक्षिणा दिगिन्द्रो देवता यो मैतस्यै दिशो भिदासादिन्द्रꣳ स ऋच्छत्विन्द्रो मे तस्यै दिशो गोपायतु प्रतीची दिङ्मरुतो देवता यो मैतस्यै दिशो भिदासान्म- रुतः स ऋच्छतु मरुतो मे तस्यै दिशो गोपायन्तु उदीची दिङ्मित्रावरुणौ देवता यो मैतस्यै दिशो भिदासान्मि- त्रावरुणौ स ऋच्छतु मित्रावरुणौ मे तस्यै दिशो गोपा- येताम् । ऊर्ध्वा दिग्बृहस्पतिर्देवता यो मैतस्यै दिशो भिदासाद्बृहस्पतिꣳ स ऋच्छतु बृहस्पतिर्मे तस्यै दिशो गोपायतु । इयं दिगदितिर्देवता यो मैतस्यै दिशो भिदा- साददितिꣳ स ऋच्छत्वदितिर्मे तस्यै दिशो गोपाय-

त्विति दिश उपस्थाय धर्मो मा धर्मिणः पातु विधर्मो मा विधर्मिणः पात्वायुश्च प्रायुश्च चक्षुश्च विचक्षुश्च प्राणश्चापानश्च प्राश्चावाश्चोरुग उरुगोऽर्कस्य ते वयं वाचा संभक्तेन गमेम ब्रध्निष्ठो दैव्यस्तन्तुर्मा मनुष्यश्छेदि दिव्याद्धाम्नो मा छित्सि मामायुषा ज्योतिषे तन्तवे त्वाऽसावनु मा ज्योतिषा तन्विल्यन्तराऽग्नी तिष्ठञ्जपत्यग्न आयुꣳष्यग्ने पवस्वेत्याग्निपावमानीभ्यां गार्हपत्यमुपतिष्ठतेऽग्ने गृहपत इति च तामाशिषमाशासे तन्तवे ज्योतिष्मतीमित्यजातपुत्रो ब्रूयात्तामाशिषमाशासेऽमुष्मै ज्योतिष्मतीमिति जातपुत्रो बहुपुत्रः सर्वेषां पुत्राणां नामान्यनुद्रुत्य ज्योतिष्मतीमित्यन्ततो वदति सायꣳ सायमुपतिष्ठते॥२०॥

उत्थाय। उत्तरस्या आहुत्याः समीपेऽनन्तरमेवोत्थाय स्वयं होमे प्राक्प्राशनात्। उपप्रयन्त इति षडृचस्तैत्तिरीयके समाम्नाताः। पैङ्गके तासां याऽग्नीषोमीया तां पञ्चमीं कृत्वा षड्भिः पूर्वपक्ष उपतिष्ठते। ऐन्द्राग्नीं पञ्चमीं कृत्वा यथापाठं षड्भिरपरपक्षे यं त इत्यस्याः पुरस्ताद्विहव्यस्य ममाग्न इत्यादिभिस्तसृभिरुपतिष्ठते। तासां विहव्यानामुपरिष्टादग्न आयूꣳषि पवस इति षड्भिः प्रथमे गार्हपत्यमुपस्थाय संवत्सरे संवत्सरे ताभिरुपतिष्ठते नान्तराले। केचिदाहुः षड्भिरुत्तराभिरितिश्रुतेर्नित्यत्वाद्द्वादशभिरुपस्थानं नित्यं संवत्सरान्त आवृत्तिरिति, तत्र युक्तं ग्राह्यम्। संवत्सर आग्निपावमानीभिरुपस्थानस्य नियतत्वात्तस्य च पूर्वाभिः संबन्धात्संवत्सरे संवत्सरे नियतं महोपस्थानं सर्वस्मिन्पक्षे कार्यम्। तत आयुर्दा वर्चोदास्तनूपा अग्न इति चतुर्भिराहवनीयमुपतिष्ठते। चतुर्थे मन्त्रे च यश्चित्रावसो स्वस्ति ते पारमशीयेति तद्द्विरावर्तयति। तदनन्तरं देवदत्तशर्मन्स्वस्ति तेऽस्तु यज्ञदत्तशर्मन्स्वस्ति तेऽस्तु इति द्विर्द्विरेकैकस्य नाम गृह्णाति। अग्नेः सोमस्य यमस्येन्धाना इति सर्वेष्वग्निषु समिध आधायोपतिष्ठते। अम्भस्थेति मनुष्यान्पशूनपि। रेवतीरिति गार्हपत्याहवनीययोर्मध्ये तिष्ठञ्जपति। सꣳहिताऽसीति गामग्निहोत्रीमालभते वत्सं वा यस्याः पयसा होमः। इदमूप त्वेति तिस्रो गायत्र्योऽग्ने त्वं न इति तिस्रो द्विपदः। ताभिः षड्भिर्गार्हपत्यमुपतिष्ठते। ऊर्जा व इति गोष्ठगतान्पशूनुपतिष्ठते। भुवनमसीति पूर्ववत्। महित्रीणामवो अस्त्विति तृचेनाऽऽहवनीयमुपतिष्ठते। तत्सवितुर्वरेण्यं सोमानं येरवान्यो मा नः शंस इति सावित्रिया ब्राह्मणस्पत्याभिश्चाऽऽहवनीयमेवोपतिष्ठते। कदाचन स्तरीरसि कदाचन प्रयुच्छसि परि त्वाऽग्ने परि ते दूढम इत्येतेनानुक्रमेणाऽऽहवनीयमेवोपस्थायात्रैव तिष्ठन्पूषा मेति जपित्वा प्राची दिगिति यथालिङ्गं दिश उपस्थायान्तराऽग्नी तिष्ठन्धर्मो मेति जपति। अत्र ज्येष्ठस्य नामग्रहणम्। अत्र

आयुष्यग्ने पवस्वाग्ने गृहपत इति तिसृभिर्गार्हपत्यमुपतिष्ठते तामाशिषमसुष्मै बहुपुत्र-स्तामाशिषमाशासे देवदत्तशर्मणे ब्रह्मदत्तशर्मणे यज्ञदत्तशर्मणे ज्योतिष्मतीमिति । उपप्रयन्त इत्येवमादिना ज्योतिष्मतीमित्यन्तेनोभयकालं प्राप्ते विकल्पः । सायं सायमुपतिष्ठत इति अत्र सायं सायमिति सूत्रेण सायं सायमेवेत्यवधारणं सायमेवोपस्थानं न प्रातरित्युक्तम् । अत्र वाशब्दाभावः श्रुत्यनुविधानात् । अग्निहोत्रं जुहोतीत्यविशेषेणोपस्थानं विधाय पुनर्नक्तमुपतिष्ठते न प्रातरिति विहितप्रतिषिद्धत्वाद्विकल्पः । एवं सूत्रेऽप्युभयत्र प्रातः पुनः सायमिति ग्रहणात्सायमेव न प्रातरित्यर्थात्सिध्यतीति सायं नियतं प्रातर्विकल्पः ।

अत्रैवोपस्थानं प्रातरत्राप्युपस्थानान्याह विकल्पेन—

अपि वो दिवैतत् ।

वक्ष्यमाणेषूपस्थानेषु दिवा विकल्पोऽपि वेत्यनेनोक्तः ।

भूर्भुवः सुवः सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैरिति वा काममैन्द्रो वित्तादिति वा श्रद्धा मे मा व्यगादिति वा भर्तुं वः शकेयमिति वा ।

स्पष्टम् ।

तत्सर्वं कृताकृतम् ।

कालद्वयोपस्थानं कर्तव्यं न कर्तव्यं वेत्यर्थः । तथा च श्रुतिरुपस्थेयोऽग्निरित्युपक्रम्य तस्मान्नोपस्थेय इत्युक्त्वाऽपि वदति तस्मादुपस्थेय इति विहितप्रतिषिद्धत्वादुपस्थाने विकल्पः । उपस्थानपक्षेऽपि महोपस्थानेन नक्तं भूरित्यादिचतुर्णामेकेन दिवोपस्थानं न वा दिवेति नक्तमुपतिष्ठते न प्रातरहरुपतिष्ठत इति श्रुतयः प्रमाणम् ।

चतुर्भिः सह विकल्पान्तरमाह—

प्रातरवनेकेन प्रातरुपस्थेयः ।

प्रातरवनेक इति कर्मनामधेयं तद्गतैरेव मन्त्रैरुपस्थेयः । आहवनीयोऽनादेशे ।

तत्राधिश्रित उन्नीयमाने वा ।

अग्निहोत्रहविष्यधिश्रिते वोन्नीयमाने वाऽग्रे वक्ष्यमाणं कार्यमित्यर्थः ।

विहव्यस्याऽऽदितस्तसृभिरुपस्थाय ।

ममाग्ने वर्च इत्यादिभिराहवनीयमुपस्थाय ।

अपां पत इति त्रीनुदकाञ्जलीन्निनयति प्रातिषिक्ता अरातय इति त्रिः परिषिञ्चति काकाय वा जैत्रि-

---

१ च. °शिवं भूयात् । तामा० सेऽसु° । २ च. ङ. वा यदेवे° । ३ च. °इरस्व° ।

याय वामिति पाणी प्रक्षालयत इदमहं दुरब्मन्यां निःप्लाव-
यामीत्यप आचम्य निष्ठीवति भ्रातृव्याणाꣳ सपत्नाना-
मिति पुनरेव पाणी प्रक्षालयत इन्द्रियवतीमद्याहं वाच-
मुद्यासमिति यथारूपं[1] प्राणायतनानि संमृज्योत्तरेणानुवा-[2]
केनोपतिष्ठते तत्रावाग्वसोः स्वस्ति ते पारमशीयेति त्रिरा-
वर्तयत्यसौ स्वस्ति तेऽस्त्वसौ[3] स्वस्ति तेऽस्त्विति सर्वेषां[4]
पुत्राणां नामानि गृह्णाति त्रिरेकैकस्य पुरस्तादग्नीषोमीयो-
द्विहव्यस्योत्तराभिश्चतसृभिरुपस्थायानुवाकशेषेणोपतिष्ठते ।

प्रत्यञ्जलि मन्त्रावृत्तिः प्रतिप्रतिषेकं पुरस्ताद्देवीः षडुर्वीरिति चतसृभिः । स्पष्टमन्यत् । शाखान्तरीयमन्त्राणां पाठस्त्वापस्तम्बेन दर्शितः—अपां पते येषां भागः स्त एकस्त्रीनुदकाञ्जलीन्निनयति । प्रतिषिक्ता अरातयः प्रतिषिक्ता अरातय इति त्रिर्भूमौ परिषिच्य कालाय वां मैत्रियाय वामौद्भेत्रियाय वामन्नाद्याय वामवनेनिजे सुकृताय वामिति पाणी प्रक्षालयते । इदमहं दुरब्मन्यां निःप्लावयामीत्याचम्य निष्ठिवने मन्त्रः । भ्रातृव्याणाꣳ सपत्नानामहं भूयासमुत्तमः । अपां मेत्रादिवोदकमिति हस्तौ प्रक्षाल्य । अग्निमस्तु नाऽस्मत्सूत्रकृता विनियुक्तः । आपस्तम्बेन च विनियुक्तः श्रियं धातर्मयि धेहि श्रियो माऽधिपतिं कुरु । विशाभीशानो मघवेन्द्रो मा यशसा नयेदिति जपित्वाऽग्नयव्युष्टा देवं ब्रूतावीडुच्छपथजम्मनीम्न आपो मज्ञमिवि[7] प्राणिजन्नस्मन्यु(?)शपथा२ अधीत्याचम्येति मन्त्रद्वयमधिकमापस्तम्बीयम् । इन्द्रियावतीमद्याहं वाचमुद्यासं वाचं दीर्घप्राणोच्छिन्नोऽदब्धो गोपाः सकृन्नासापुटे अजस्रं दैव्यं ज्योतिः सौपर्णं चक्षुः, चक्षुषी शृतौ[8] कर्णौ देवश्रुतौ कर्णौ केशा बर्हिः शिखाप्रस्तरे शिखां यथास्थानं करपञ्चꣳसꣳ हृदयादौ मा मा हासिष्टेति सर्वाण्यङ्गानि । एवं यथालिङ्गमङ्गानि संमृश्य, इत ऊर्ध्वं सर्वाग्न्युपस्थानं तन्नाऽस्मत्सूत्रकृतोक्तम् । वर्चोऽसि वर्चो मयि धेह्यायुकृतायुपत्नीस्वधा वो गोप्रियोगेस्थ गोपायत मा रक्षतमात्मसदौ मेस्थामोनः कश्चित्प्रघान्मा प्रमेष्महयुपप्रत्नमुप भूर्भुवः सुवरायुर्मे यच्छेति सर्वानुपस्थायेत्यापस्तम्बीयम् । उत्तरेणानुवाकेनाऽऽहवनीयमुपतिष्ठते । उपप्रयन्त इत्यनुवाकेन तच्छाखायामुत्तरो भवति तस्मिन्ननुवाके चित्रावसो

१ क. ख. ग. ट. ठ. ण. यथायतनं । २ घ. ङ. च. ढ. °मृशत उत्त° । ३ झ. ञ. ढ. त्रिश्चिरं° । ४ ङ. ढ. °भीयया विह° । ५ घ. °या विह° । ६ च. ट. °वजूता । ७ च. °मिव प्रा° । ८ च. सूश्रुतौ ।

स्वस्तीत्यस्मात्पूर्वः पुत्राणां नामान्येकैकं त्रिरावर्तयेत्पूर्ववत् । तत्रापि विशे विश इत्यस्मादनन्तरं पूर्वपक्षेऽग्नीषोमाविमश्सुम इत्यपरपक्ष उभा वामिन्द्राग्नी इत्युपस्थायायं ते योनिरिति अनुवाकशेषेणोपतिष्ठते । वर्माजठराञ्चादमोमद्यास्मिञ्जने भूयासमनन्नादः स योऽस्मान्द्वेष्टि कवी मातरिश्वा मापशुमन्तामामद्य ।

तस्मात्पुरा प्रातरग्निहोत्रे नोपावरोहेदित्येकेषाम् ।

अग्निहोत्रेऽपराग्नेः पुरतो नोत्सर्पेदित्येकेषां शाखिनां मते नोपस्थेय इत्यर्थः । केचिद्याजमानं सर्वमपि निवर्तत इति व्याचक्षते ।

अग्नेस्तृणान्यपाचिनोति तेजस्वी ब्रह्मवर्चसी भवतीति विज्ञायते ॥ २१ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठप्रश्ने षष्ठः पटलः ॥ ६ ॥

अग्नेराहवनीयात्तृणानि परिस्तरणानि निर्गमय्य स्थापयतीत्यर्थः । विज्ञायते श्रुतौ ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने षष्ठः पटलः ॥ ६ ॥

अथ षष्ठप्रश्ने सप्तमः पटलः ।

ऋते गृहस्य प्रवासं व्याख्यास्यामः ।

विनाऽग्निभिर्भार्यया च प्रवासम् ।

अग्नीन्समाधेहीति संप्रेष्यति प्रवत्स्यन्भास्वत उपतिष्ठते मम नाम प्रथमं जातवेद इति चतसृभिराहवनीयं पशून्मे शंस्यै पाहि तान्मे गोपायास्माकं पुनरागमादित्याहवनीयमुपस्थायाभिप्राण्याग्ने सहस्राक्षेत्युपतिष्ठते प्रजां मे नर्य पाहि तां मे गोपायास्माकं पुनरागमादिति गार्हपत्यमुपस्थायाभिप्राण्याग्ने गृहपत इत्युपतिष्ठतेऽन्नं मे बुध्न्य पाहि तन्मे गोपायास्माकं पुनरागमादिति दक्षिणाग्निमुपस्थायाभिप्राण्याग्ने वह्न इत्युपस्थाय विराजक्रमैरुपतिष्ठते यथा पुरस्तादिमान्मे मित्रावरुणा गृहान्गोपायतं युवम् । अवि-

---

१ च. 'शेषः । वि' । २ च. 'मादया' । ३ क. ग. च. ट. ठ. ण. 'स्मि जने । ४ टीकापुस्तकेषु 'स्य पशून्मे पा' इति पाठः । ५ च. ढ. 'रुणौ गृ' ।

नष्टानविहृतान्पुषैनानभिरक्षत्वस्माकं पुनरागमादित्यन्त· राऽग्नी तिष्ठञ्जपति मा प्रगाम पथो वयं मा यज्ञादिन्द्र सोमिनः । मा तस्थुर्नो अरातयः । उदस्मा ᳪ उत्तराग्ने याग्ने घृतेनाऽऽहुत । रायस्पोषेण सᳪसृज प्रजया च बहून्कृधीति प्रक्रामति सकाशेऽग्नीनां वाचं यच्छत्य· सकाशे विसृजते व्रतकालेषु व्रतं चरति ।

उद्धरणप्रभृति नाश्नीयाद्दाहोमादित्यादिव्रतं विद्युदसीत्याद्यपि यजमानसंस्कारो जपश्चेडाऽसीति हविर्देवानामिति चोपस्थानानि च दर्शपूर्णमासवत्सर्वं ज्ञेयम् । उप· स्थाने समिदाधानमध्वर्युरेव । गवालम्भस्तु लुप्यते परार्थत्वात् । विहाराभिमुखो मन्त्रा· ञ्जपतीति सूत्रान्तरम् । तथाऽऽह भरद्वाजः—एवं विहितमेवास्य प्रवसतोऽप्युपस्थाने परिसंमृश्य कर्माणि चाध्वर्युस्तानि कुर्याद्यजमानो मन्त्राञ्जपेदिति ।

ऋतुं प्रत्युपतिष्ठते ।

प्रवासविलम्बे प्रत्यृतु प्रवासोपस्थानं कुर्यान्मासद्वये मासद्वय इत्यर्थः ।

यद्यनुपस्थिताग्निरापद्यते प्रवासः ।

दैवान्मानुषाद्वाऽग्नीननुपस्थाय प्रवसति तदाऽग्ने वक्ष्यमाणमुपस्थानम् ।

इहैव सं तत्र सतो वो अग्नयः प्राणेन वाचा मनसा बिभर्मि । तिरो मा सन्तमायुर्मा प्रहा· सीज्ज्योतिषा वो वैश्वानरेणोपतिष्ठ इत्युपतिष्ठते ।

यत्र तिष्ठति तत्रैव विहाराभिमुखः । सकृदेव प्रत्येत्याभयंकरेणोपस्थानम् ।

प्रोष्य ।

प्रवासादागत्य ।

समिधो धारयन्विश्वदानीमाभरन्तोऽनातुरेण मनसा । अग्ने मा ते प्रतिवेशा रिषामेति विहारमभ्येत्य सकाशेऽ· ग्नीनां वाचं यच्छति, सकाशे विसृजतेऽग्नीन्समाधेहीति संप्रेष्यति ॥ २२ ॥ ज्वलत उपतिष्ठते नमस्ते अस्तु मीढुषे नमस्त उपसद्वने । अग्ने शुम्भस्व तन्वा सं मा रय्या सᳪसृजेत्युपसमिन्धेऽग्नेः समिदस्यभिशस्त्या मा पाहीत्येतै· स्तिसृभिस्तिस्रः समिध आदध्यादिन्धानास्त्वा शतᳪ हिमा इति चतुर्थीं, मनो ज्योतिर्जुषतामित्यध्वर्युराहुतिं जुहोति यदि दशरात्रमतिप्रवसति, मम, नाम तव च जातवेद इति चतसृभिराहवनीयं पयून्मे ब्रह्मस्याज्ञुपस्थान्मे

पुनर्देहीत्याहवनीयमुपस्थायाभ्यपान्याग्ने सहस्राक्षेत्युपतिष्ठते प्रजां मे नर्याजुगुपस्तां मे पुनर्देहीति गार्हपत्यमुपस्थायाभ्यपान्याग्ने गृहपत इत्युपतिष्ठतेऽन्नं मे बुध्न्याजुगुपस्तन्मे पुनर्देहीति दक्षिणाग्निमुपस्थायाभ्यपान्याग्ने बह इत्युपस्थाय विराजक्रमैरुपतिष्ठते यथा पुरस्ताद्विमान्मे मित्रावरुणा गृहानजुगुपतं युवम् । अविनष्टानविहृतान्पूषैनानभ्यरक्षीदास्माकं पुनरागमादित्यन्तराऽग्नी तिष्ठ-न्नुपति गोपायाजुगुप इति सर्वत्रानुषजति गोपायेति वा ।

स्पष्टम् ।

अथैकेषां विज्ञायते कः श्रेयाꣳसं विपुलं बोधयिष्यतीत्यमादुष्कृतानामेवोपस्थानꣳ स्यादभयंकराभयं मे कुरु स्वस्ति मेऽस्तु प्रवत्स्यामीति प्रवत्स्यन्नभयंकराभयं मेऽकार्षीः स्वस्ति मेऽस्तु मावात्स्यमिति प्रोष्य ॥ २३ ॥ गृहा मा बिभीत मा वेपीढ्वमूर्जं बिभ्रत एमसि । ऊर्जं बिभ्रद्वसुवनिः सुमेधा गृहानेमि मनसा मोदमानः । येषामध्येति प्रवसन्येषु सौमनसो बहुः । गृहानुपह्वयामहे ते नो जानन्तु जानतः । उपहूता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलाल उपहूतो गृहेषु नः । उपहूता भूरिसखाः सखायः स्वादु संमुदः । अरिष्टाः सर्वपूरुषा गृहा नः सन्तु सर्वदा । ऊर्जस्वन्तः पयस्वन्त इरावन्तो ह सामुदः । अनश्या अतृष्या गृहा मास्मद्बिभीतनेति गृहानभ्येति क्षेमाय वः शान्त्यै प्रपद्ये शिवꣳ शग्मꣳ शंयोः शंयोरिति प्रविशति न तदहरागतः कलहं करोति गृहानहꣳ सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् । इरां वहन्तः सुमनस्यमानास्तेष्वहꣳ सुमनाः संविशामीति संविशति विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विष इति भार्याꣳ समीक्षते ॥ २४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठप्रश्ने सप्तमः पटलः ॥ ७ ॥

---

१ ख. ग. ङ. °हणौ गृ° । २ क. ङ. °पाग्रातिवीति । ३ क. ग. ङ. ट. ण. वीरवतः

अप्रादुष्कृतोपस्थानपक्षेऽथैकेषामित्यादिनोक्तमेवानुपस्थिताग्नेः प्रवसत आगतस्योपस्थानं प्रोष्येत्यादि तु समानं प्रवासादागतस्य । संविशतीति धर्ममात्रम् । स्पष्टमन्यत् । मनस्वती तु होतव्याऽध्वर्युणा याजमानकाण्डे पठिता । सा च प्रादुष्कृतोपस्थानान्तर्गतेति नाभयंकरोपस्थानेनापोहेत्युपस्थान इत्याह भाष्यकृत् । अन्ये तु होमार्थमुद्भूने मनस्वतीमिच्छन्ति तथाऽजस्रेऽप्याहवनीये । ऋत्वतिप्रवासे व्रातपती व्रातभृती वा । संवत्सरातिप्रवासे पवित्रेष्टिराश्वलायनभरद्वाजाभ्यामुक्ता । वैश्वानरी बौधायनेन मनस्वत्या समुच्चयः । सर्वत्राग्नीन्विहाय दंपत्योरुभयोः प्रवासे त्वाधानं स्मर्यते—

विहायाग्नीन्सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते ॥ इति ।

बहुभार्यस्यैकस्या अपि संनिधौ न दोषः ।

तथा—असमक्षं हि दंपत्योर्होतव्यं नर्त्विगादिना ।
द्वयोरप्यसमक्षं चेद्भवेद्धुतमनर्थकम् ॥ इति ।

प्रवसति यजमाने भार्यायां रजस्वलायां तु तामपरुध्य होतव्यमिति भाष्यकृत् । तयेष्टिस्तु शुद्धायामित्याह । अन्ये तु तामपरुध्यैवेष्टिमिच्छन्ति । नित्येष्टेः करणमुक्तं स्मृतिभिरिति तामपरुध्यैवेष्टव्यमिति त्वाहुः । अत्र भाष्यकृतोक्तं तथा संध्ययोर्नदीतरणे सीमालङ्घने वाऽऽधानं तथा समारोप्याग्नीन्प्रयाणे सीमानद्यतिक्रमे[2] पत्न्यरणी अन्वारभते । आपत्काले तु समस्यापि होम उक्तो भरद्वाजेन । पर्वणि सायं सायं यावन्तः सायं होमा आगामिचतुर्दशीसायंहोममभिव्याप्य तावन्ति चतुरुन्नीयैकस्यामेव समिधि तन्त्रेण होमः । प्रातरपि पुनस्तावन्ति चतुरुन्नीय शेषं पूर्ववत् । अत्यापदि सायं वा प्रातर्वोभयहोमान्परिगणय्योन्नयाम्युन्नेष्यामीत्युभयं प्रत्येवं चतुरुन्नीय प्रातश्चेत्प्रथमां सौरीं द्वितीयामाग्नेयीं सायं चेद्विपरीतं हुत्वा शेषं तन्त्रेण सौर्यमाग्नेय९ हविरिति संनमति विपरीतं वा हुत्वा शेषं समाप्य प्रयाति पर्वणः प्रातर्मथित्वा प्रातःसायंहोमौ, इष्टिः पशुश्च यदि पर्वणि न मन्येत्तत ऊर्ध्वं तन्तुमतीष्टिर्होमातिक्रमप्रायश्चित्तं च द्वितीयपर्वपर्यन्तं तत्राप्यशक्ये मन्थने चाऽऽधानमेव ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्ने प्रवासाख्यः सप्तमः पटलः ॥ ७ ॥

अथ षष्ठप्रश्नेऽष्टमः पटलः ।

आग्रयणेष्टौ वत्सं प्रथमजं ददाति नानातन्त्रे श्यामाके बभ्रुं पिङ्गलं मधुपर्कं मधुमन्थं दधिमन्थं क्षीरौदनस्य वा

---

१ च. °नापोहे° । २ क. ख. ग. ठ. ठ. ण. 'जेनाप' ।

पात्रं क्षौमं वासो वर्षासु घृतं भद्राश्चः श्रेयः समनैष्ट देवा इति व्रीहीणां प्राश्नात्यग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिरिति श्यामाकानामेतमु त्यं मधुना संयुतं यवꣳ सरस्वत्या अधिमनाऽवचर्कृषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति यवानाम् ।

प्राश्नातीति संबन्धः । प्रथमजो वत्सः संवत्सरमध्ये प्रथमतः संवत्सरप्रवृत्तिरेकाष्टकातः फाल्गुनीतश्चैत्रीतो वा समानतन्त्र एकैव सा दक्षिणा । बभ्रुः कपिलः पिङ्गलः पिङ्गाक्ष एवं द्विरूपो गौः । दधि मधु घृतमापः सक्तवो वा मधुपर्कः । मधुना युक्ताः सक्तवो मधुमन्थः । दध्ना युक्ता दधिमन्थः । क्षीरयुक्तस्यौदनस्य पूर्णपात्रं क्षौमं वास उक्तं वर्षाकाले घृतम् । स्पष्टमन्यत् ।

यथाविकारं पञ्चावेकादश प्रयाजाननुमन्त्रयते ।

यो यस्य प्रयाजस्य विकारः स तस्यानुमन्त्रणेन ।

तदेव स्पष्टयन्नाह—

चतुरश्चतुर्भिरादितश्चतुर्थस्यानुमन्त्रणेन दुरःप्रभृतीꣳश्चतुर उत्तमेनेतरान् ।

संख्यायुक्तेषु प्रयाजादिषु विकृतौ यत्राधिकसंख्याऽभ्यासेन पूरणीया तत्र चतुर्थपञ्चमयोर्मध्ये विकाराः श्रूयन्तेऽतस्ते चतुर्थपञ्चमयोरेव विकाराः सांनिध्यादित्यभिप्रायेणेदमुक्तं चतुरश्चतुर्भिरादितो यथाप्रकृति चत्वारश्चतुर्थस्य विकारा नवमाद्यास्त्रय उत्तमस्य देवता याज्योक्ता अग्निपदान्ताः ।

स्वर्विदसि स्वर्वित्त्वा स्वरिहि स्वर्मह्यं स्वः पशुभ्यो लोकविदसि लोकं वित्त्वा लोकमिहि लोकं मह्यं लोकं पशुभ्यो गातुविदसि गातुं वित्त्वा गातुमिहि गातुं मह्यं गातुं पशुभ्यो नाथविदसि नाथं वित्त्वा नाथमिहि नाथं मह्यं नाथं पशुभ्यो न वा उवेतन्म्रियस आशानां त्वा विश्वा आशा इति पशौ संज्ञप्यमाने जपति हुतायां वपायां परं ददाति तिस्रो वा दक्षिणा नयेत् ।

परं धेनुम् । याः काश्चित्तिस्रो वा गाः । वरे न दक्षिणाधर्म इति केचित् । उभयत्राप्यस्त्येव दक्षिणाधर्म इति सर्वमतं, नयेद्दद्यात् ।

यथाविकारं पञ्चावेकादशानूयाजाननुमन्त्रयते श्रीꣳश्चानेकैकेन प्रथमेन दशममुत्तमेनोत्तमम् ।

प्रथमः प्राकृतः स्पष्टः । तस्यैवाभ्यासो दशमः । स्विष्टकृत्तु प्राकृतवदेकादशः

प्रणीयतेऽतो नियतौ द्वौ । ततो नवावशिष्यन्ते । तत्र तेषु प्रयाजेषु प्राकृतप्रथमानुमन्त्रणेन प्रथमस्य प्राकृतत्वात्तत्समीपस्थौ द्वौ वैकृतौ प्रथमस्य विकारौ । तथाच त्रीन्प्रथमान्प्रथमानुमन्त्रणेनानुमन्त्रयते । ततोऽवशिष्टानां क्रमेण विनियोगे प्राप्तेऽष्टमस्य स्पष्टस्य नराशंसस्य स्विष्टकृद्विकारत्वं वक्तुमयुक्तं क्रमस्य लिङ्गेन बाधात्ततो नराशंसात्पूर्वं वैकृत[1]श्चतुर्थप्रभृतिचत्वारः क्रमेण द्वौ नराशंसस्य द्वावन्यौ स्विष्टकृतः । एवं च नराशंसेन सह त्रीन्द्वितीयेनानुमन्त्रणेन नवमः परिशेषान्नराशंसानन्तरत्वान्न स्विष्टकृतो विकारः । एवं च षष्ठसप्तमनवमांस्त्रींस्तृतीयेनानुमन्त्रणेन तथा त्रींस्त्रीनेकैकेनेत्युपपाद्यं यथाविकारमेकादशानुयाजानिति स्थितेऽपि पुनः प्रथमेन दशममित्युदाहरणत्वेन प्रदर्शितम् । तेन च प्रथमाष्टमयोरपि निर्णयः सिद्धः । ततस्तु समानामवशिष्टाना पूर्वोक्तक्रमानन्तर्यन्यायेन यथाविकारं विनियोग इत्यर्थः ।

गृह्णाणीवेच्छृङ्गिणा संददृश्रिरे चषालवन्तः स्वरवः पृथिव्याम् । ते देवासः स्वरवस्तस्थिवांसो नमः सखिभ्यः सन्नान्माऽवगातेति ॥ २९ ॥ हुतः स्वरुमुपतिष्ठत आशासानः सुवीर्यमिति संस्थिते यूपम् ।

उपतिष्ठते ।

चातुर्मास्येष्वनड्वाहमनडुहौ वा हिरण्यं वैश्वानरे ददाति धेनुं पार्जन्ये यथाविकारं नव प्रयाजाननुमन्त्रयते चतुरश्चतुर्भिरादितश्चतुर्थस्यानुमन्त्रणेन पुरःप्रभृतींश्चतुर उत्तमेनोत्तमं वत्सं प्रथमजं वैश्वदेवे ददाति यथाविकारं नवानूयाजाननुमन्त्रयते त्रींस्त्रीनेकैकेन ।

कृतव्य स्थानमादर्थये ।

तद्दतं तत्सत्यं तद्व्रतं तच्छकेयं तेन शकेयं तेन राध्यासमिति सर्वत्र केशेषूप्यमानेषु जपति चतुरो मासाननृतं वदति न मांसमश्नाति न स्त्रियमुपैति नोपर्यास्ते जुगुप्सेतानृतात्माक्षेते न मध्वश्नाति नाञ्जीत नाभ्यञ्जीततौ जायामुपेयात्सर्वेषां चातुर्मास्यानामेतान्यन्तरालव्रतानि भवन्ति धेनुं वरुणप्रघासेषु दद्यादृषभं प्रवय-

---

[1] ख. ट. ग. 'मानु°'।

सं साकमेधेषु यस्य रवते जुहोति तमेव पौर्णा-
दर्श्येऽश्वं श्वेतमादित्ये गां वा श्वेतं षड्गवं
द्वादशगवं वा सीरमुष्ट्रौ(रौ) वोष्टारं वाऽन्यतरं
शुनासीरीयेऽश्वं श्वेतं सौर्ये गां वा श्वेतं
तदभावेऽगौः श्वेतः स्याच्छ्वेतः स्यात् ॥ २६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे षष्ठप्रश्नेऽष्टमः पटलः ॥ ८ ॥

इति हिरण्यकेशिसूत्रे षष्ठः प्रश्नः ॥ ६ ॥

नोपरि मञ्चकादावास्ते । प्राचीनशिराः शेते । प्रवयसं वृद्धम् । यस्य शब्दे पूर्णा-दर्श्येण जुहोति तमेव वृषभं तस्य दक्षिणां ददाति अध्वर्यवे । षड्भिर्गोभिर्युक्तो हलो द्वादशभिर्वा । उष्ट्रौरो(रौ)वोष्टारा(?)महान्बलीवर्दः । तदभावे श्वेतस्य गोरभावे त्वगौरन्यः श्वेतोऽजो मेषो वा । गोरजस्य मेषस्य च परस्परप्रतिनिधिभावो विध्यपराधप्रश्ने च वक्ष्यते । अभ्यासः प्रश्नसमाप्त्यर्थः ।

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवकृतायां प्रयोगवैजयन्त्यां षष्ठे याजमानप्रश्न आग्रयणपशुचातुर्मास्ययाजमानमष्टमः पटलः ॥ ८ ॥

इति हिरण्यकेशिसूत्रव्याख्यायां षष्ठः प्रश्नः ॥ ६ ॥

समाप्तेयं महादेवकृतप्रयोगवैजयन्तीव्याख्या ।

---

१ ख. ग. ङ. श्वेताद । २ क. च. °मुष्टारौ° । ३ ख. ग. ङ. श्वेत । ४ ख. ङ. क. च. °ष्टारावौ° ।